Universiteit Leiden
The Netherlands

# The Niśvāsamukha, the Introductory book of the Niśvāsatattvasaṃhitā : critical edition, with an introduction and annotated translation appended by Śivadharmasaṅgraha 5-9

Kafle, N.

**Citation**
Kafle, N. (2015, October 15). *The Niśvāsamukha, the Introductory book of the Niśvāsatattvasaṃhitā : critical edition, with an introduction and annotated translation appended by Śivadharmasaṅgraha 5–9*. Retrieved from https://hdl.handle.net/1887/35808

Version: Corrected Publisher's Version
License: Licence agreement concerning inclusion of doctoral thesis in the Institutional Repository of the University of Leiden
Downloaded from: https://hdl.handle.net/1887/35808

**Note:** To cite this publication please use the final published version (if applicable).

Cover Page

Universiteit Leiden

Leiden University Repository

The handle http://hdl.handle.net/1887/35808 holds various files of this Leiden University dissertation

**Author**: Kafle, Nirajan
**Title**: The Niśvāsamukha, the introductory book of the Niśvāsatattvasaṃhitā : critical edition, with an introduction and annotated translation appended by Śivadharmasaṅgraha 5–9
**Issue Date**: 2015-10-15

# शिवधर्मसङ्ग्रहे
# पञ्चमाध्यायतो नवमाध्यायपर्यन्तम्

ईश्वर उवाच।

अज्ञानार्जितपापानां ब्रवीमि ध्वंसनं प्रिये।
विज्ञायार्जितपापानां न ब्रवीमि कदाचन॥ 5:1॥

न ज्ञानबलमाश्रित्य पापं कुर्वीत संयमी।
लोकाः किम्मृत्युना योज्या बलमाश्रित्य भूभुजाम्॥ 5:2॥

संवृत्तिं ज्ञानिनामेवं युक्तमेवाभिरक्षितुम्।
विरुद्धाशनविच्छित्तिर्भैषजामेव शोभते॥ 5:3॥

वमनै रेचनैः स्वेदैरौषधीनां बलेन च।
रोगार्तान्शमयन्तीति किं सेव्या न हितैषिभिः॥ 5:4॥

---

**5:0** ईश्वर उवाच ] $CE_N$; --- श्वर उवाच A **5:1** विज्ञायार्जितपापानां ] C; विज्ञाया-जितपापानां A; विज्ञानार्जितपापानां $E_N$ **5:1** न ब्रवीमि कदाचन ] $AE_N$; न ब्रवीमि कदाचनः C **5:2** भूभुजाम् ] $AE_N$, लो ⏑̱ किं मृत्युना यो ⏑̱ बलमा ⏑̱ त्य भूभु ⏑̱ ⏑̱ C **5:3** संवृत्तिं ज्ञानिनामेवं ] $CE_N$; संवृत्ति ज्ञानिनामे --- A **5:3** युक्तमेवाभिरक्षितुम् ] $CE_N$; युक्त ⏑̱ वाभिरक्षितृम् A **5:3** विरुद्धाशनविच्छित्तिर्भैषजामेव ] *em.*; विरुद्धाशन-विच्छित्तिभैषजामेव A; विरुद्धाशनविच्छित्तिभिषजामेव C; विरुद्धासनविच्छित्तिर्भिषजा-मेव $E_N$ **5:4** वमनै रेचनैः स्वेदैरौ॰ ] $E_N$; वमनै विरेचनैः स्वेदैरौ॰ A (unmetrical); वमनै रेचनैः ⏑̱ दैरौ॰ C **5:4** रोगार्तान् शमयन्तीति ] C; रोगा ⏑̱ ⏑̱ शमयन्तीति A; रोगार्त्तान् समयन्तीति $E_N$ **5:4** सेव्या न हितैषिभिः ] $E_N$; सेव्याश्च हितैर्षिभिः A; सेव्या न हितेषिभिः C

दानधर्मं प्रवक्ष्यामि प्रेतलोकाग्र्गलम्परम्।
विधुरध्वान्तमार्तण्डं सोपानं सुरवेश्मनाम्॥ 5:5॥

इज्याध्ययनदानानि तपः सत्यं क्षमा धृतिः।
अलोभ इति मार्गो ऽयं धर्म्मस्याष्टविधः स्मृतः॥ 5:6॥

तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते।
ऊर्ध्वश्चोत्तरवर्गस्तु स महात्मसु तिष्ठति॥ 5:7॥

इज्या तपः स्वाध्ययनं दानानि विविधानि च।
दममूलानि सर्वाणि तस्मादुपशमी भवेत्॥ 5:8॥

दानाच्छोषमुपैति वैरजलधिर्द्दानाच्च लोकः प्रियः।
दानात्कीर्तिरतीव रूपविभवः श्रीभोगसम्पत्तथा।
मृत्योर्ल्लोकगतः सुखानि परमाण्याप्नोति दानादपि।
स्वर्गे नन्दति दानतो ऽपि सुचिरन्दानाद्धि सर्वं भवेत्॥ 5:9॥

नागेन्द्रास्तुरगाः पदानि विभवो यानानि वन्दिस्तथा।
दिव्याहारविहारभूषणसुखं सिंहासनञ्चामरम्।

---

**5:5** दानधर्मं ] $CE_N$; दानधर्म्मं A **5:5** प्रेतलोकाग्र्गलम्परम् ] $CE_N$; प्रेतलोकाग्गल परम् A **5:5** °मार्तण्डं ] AC; °मार्तण्ड° $E_N$ **5:5** सुरवेश्मनाम् ] $E_N$; सुरवे --- A; सु ⏑̄ वे ⏑̄ मनम् C **5:6** इज्याध्ययनदानानि ] $E_N$; --- न ⏑̄ ⏑̄ नि A; ⏑̄ ⏑̄ ध्ययन ⏑̄ नानि C **5:6** स्मृतः ] $AE_N$; ⏑̄ तः C **5:7** चतुर्वर्गो ] $CE_N$; चतुर्वग्र्ग A **5:7** दम्भार्थमपि ] AC; दम्भाथमपि $E_N$ **5:7** स ] $E_N$; त $A^c$; ता $A^{ac}$; ना C **5:8** इज्या तपः स्वाध्ययनं ] $CE_N$; इज्या तप स्वाध्यय A (unmetrical) **5:8** दममूलानि सर्वाणि ] *em.*; दमोमूलानि स --- A; दशमूलानि सर्वाणि C; दमो मूलानि सर्वाणि $E_N$ **5:8** तस्मादुपशमी ] *em.*; --- मी A; त ⏑̄ दुपशमी C; तस्यादुदसमी $E_N$ **5:9** दानाच्छोषमुपैति ] $E_N$; दानाशोषमुपैति A; दानाच्छो ⊔ C **5:9** वैरजलधिर्द्दानाच्च ] $E_N$; वैरजलधिदानाच A; ⊔ C **5:9** लोकः प्रियः ] *em.*; लोक प्रिये A; ⊔ C; लोकप्रियो $E_N$ **5:9** दानात् कीर्तिरतीवरूपविभवः ] *em.*; दाना कीर्त्तिरतीवरूपविभवः A; ⏑̄ नात् ⏑̄ ⏑̄ रतीव ⊔ C; दानात् कीर्त्तिरतीवरूपविशवः $E_N$ ल्क् स ⏑̄ त्तथा C **5:9** मृत्योर्ल्लोकगतः ] $E_N$; मृत्योलोकगतः A; मृ ⏑̄ ⏑̄ कगतः C **5:9** परमाण्याप्नोति ] $CE_N$; परमान्याप्नोति A **5:9** नन्दति दानतो ऽपि ] AC; नन्दतिदानतो ऽपि $E_N$ **5:9** दानाद्धि सर्वं भवेत् ] $AE_N$; दाना ि ⊔ C **5:10** नागेन्द्रास्तुरगाः पदानि विभवो ] $E_N$; नागे --- भवो A; ⊔ C **5:10** यानानि वन्दिस्तथा ] A; ⊔ C; यानानि वन्दी तथा $E_N$ **5:10** दिव्याहारविहारभूषणसुखं सिंहासनञ्चामरम् ] $AE_N$; ⊔ C

अर्थाशापरिपूरणं युवतयो हर्म्याः शशाङ्कप्रभाः।
प्रज्ञा बोधगुणाः सदा निरुजता प्राग्दानचिह्नं नृणाम्॥ 5:10॥

गृहस्थस्योपजीवन्ति वरधेनोश्चतुस्तनान्।
देवताः पितरश्चैव मानुषाश्च गिरीन्द्रजे॥ 5:11॥

स्वाहाकारवषट्कारानुपजीवन्ति देवताः।
स्वधाकारं पितृगणा हन्तकारञ्च मानुषाः॥ 5:12॥

शूद्रो ऽपि पञ्चभिर्यज्ञैर्यजते मन्त्रयोगतः।
अतो ऽन्यथा तु यो भुङ्क्ते स ऋणं नित्यमश्नुते॥ 5:13॥

गृहस्थः सर्वदा कुर्याद्ददातियजतिक्रियाः।
दानधर्ममकुर्वाणो द्रव्ये सति स यात्यधः॥ 5:14॥

उदपानं तु यः कुर्यात्पापात्मा दुष्टचेतसः।
विधूय पापसंघातं पितृभिः सह मोदते॥ 5:15॥

पुष्करिण्याश्च यः कर्त्ता मोदते दिवि शक्रवत्।
कुलैश्च सप्तभिर्युक्तो यावत्कीर्त्तिर्न नश्यति॥ 5:16॥

गृहं द्रव्यसमोपेतं दद्याद्द्विप्राय यो नरः।

---

**5:10** अर्थाशापरिपूरणं युवतयो ] $AE_N$; ⊔ C **5:10** हर्म्याः शशाङ्कप्रभाः ] A; ⊔ C; हर्म्यं शशाङ्कप्रभम् $E_N$ **5:10** प्रज्ञा बोधगुणाः सदा निरुजता ] $E_N$; प्रज्ञा बोधगुण सदा निरुजता A; प्रज्ञा ⏑̲ ध गुणा ⏑̲ दा ⏑̲ निरुजता C **5:10** प्राग्दानचिह्नं ] $CE_N$; प्राग्दानचिह्न A **5:11** गृहस्थस्योपजीवन्ति ] $AE_N$; गृहस्थानुपजीवन्ति C **5:11** वरधेनोश्चतुस्तनान् ] C; वरधेनोश्चतुस्त --- A; वत्सो धेनोश्चतुस्तनान् $E_N$ **5:11** देवताः पितरश्चैव ] $CE_N$; --- A **5:11** मानुषाश्च गिरीन्द्रजे ] $E_N$C; ⏑̲ नुषश्च गिरीन्द्रजे A **5:12** देवताः ] $AE_N$; देव ⏑̲ C **5:12** स्वधाकारं ] $E_N$; स्वाथाकार A; ⊔ C **5:12** हन्तकारञ्च ] A; ⊔ C; पाङ्कारश्च $E_N$ **5:13** शूद्रो ऽपि पञ्चभिर्यज्ञैर्यजते ] $E_N$; शूद्रो ऽपि पञ्चभियज्ञैयजन्ते A; ⊔ य ⏑̲ ⏑̲ C **5:13** अतो ऽन्यथा तु यो भुङ्क्ते ] $AE_N$; ⊔ C **5:13** स ऋणं नित्यमश्नुते ] *em.*; स ऋण नित्यमश्नुते A; ⏑̲ ⏑̲ ⏑̲ ˙ नित्य ⏑̲ नुते C; स त्राणंनित्यमश्नुते $E_N$ **5:14** गृहस्थः सर्वदा कुर्याद्ददातियजतिक्रियाः ] $CE_N$; गृहस्थः सर्वदा कु --- A **5:14** दानधर्ममकुर्वाणो ] $CE_N$; --- कुर्वाणो A **5:15** यः कुर्यात् ] $CE_N$; य कुर्यात् A **5:15** पितृभिः सह मोदते ] $AE_N$; पि ⊔ C **5:16** पुष्किरिण्याश्च यः कर्त्ता मोदते दिवि ] $E_N$; ⊔ वि C; पुष्किरिण्याश्च यः कर्त्ता मोदते दिवि A **5:16** कुलैश्च सप्तभिर्युक्तो ] $AE_N$; कु ⊔ भिर्युक्तो C **5:17** दद्याद्द्विप्राय यो नरः ] $E_N$; दद्य --- A; दद्या विप्राय यो नरः C

तस्य हेममयं दिव्यं गृहं स्वग्गे प्रजायते॥ 5:17॥

उद्यानं कुरुते यस्तु देवदेवस्य मंदिरे।
तस्य दानफलं यत्तत्पुष्पे पुष्पे निबोध मे॥ 5:18॥

दशसौवर्णिकं पुष्पं माला लक्षेण संमिता।
कोटिर्मालाशतेनाहुरनन्तं लिंगपूरणे॥ 5:19॥

एवं कुर्वन्ति ये नित्यं ते गणा मम चाक्षयाः।
न तेषां मर्त्यभावो हि कल्पकोटिशतैरपि॥ 5:20॥

ऋषय ऊचुः॥
पृच्छन्ति ऋषयो भीताः संसारभयविह्वलाः।
तुष्यते च कथन्देव अर्चितस्य च किम्फलम्॥ 5:21॥

क्षीराज्यदधितोयेन स्नापितस्य च किं फलम्।
पुष्पाणाञ्चैव सर्व्वेषां गन्धधूपस्य किम्फलम्॥ 5:22॥

वस्त्रालङ्कारनैवेद्यैर्ध्वजादर्शवितानकैः।
किं फलं च्छत्रदीपाश्च गवादिमहिषीषु च॥ 5:23॥

अजवारणदानस्य दासीदासस्य यत्फलम्।
सन्मार्ज्जने फलं किं स्यात्तथा चैवोपलेपने॥ 5:24॥

---

**5:17** तस्य ] $CE_N$; --- स्य A **5:17** स्वग्गे प्रजायते ] A; स्वर्ग्गेषु जायते $CE_N$ **5:18** उद्यानं ] $CE_N$; उद्यान A **5:18** तस्य दानफलं यत्तत् ] Cf. NiMukh; तस्य दानं फल यन्न A; तस्य दानफलं सम्यक् $CE_N$ **5:18** निबोध मे ] AC; निबोधमे $E_N$ **5:19** पुष्पं ] $E_N$; पुष्प A; ⊔ C **5:19** माला लक्षेण संमिता ] $AE_N$; ⊔ C **5:19** कोटिर्मालाशतेनाहु° ] *em.*; कोटिमालाशतेनाहु° $AE_N$; ⊔ तनाहु° C **5:20** एवं कुर्वन्ति ये नित्यं ] A; एवं कुर्वीत यो नित्यं C **5:20** ते गणा मम चाक्षयाः ] *em.*; --- आः A; स गणो मम चाक्षयः $CE_N$ **5:21** ऊचुः ] $CE_N$; ऊचु A **5:22** क्षीराज्यदधितोयेन स्नापितस्य च किं फलम् ] $AE_N$; क्षीराज्यदधि ⊔ C **5:22** पुष्पाणाञ्चैव सर्व्वेषां ] $AE_N$; ⊔ सर्वेषां C **5:22** गन्धधूपस्य किम्फलम् ] C; गन्धधूप (?) --- A; गन्धपुष्पस्य किं फलं $E_N$ **5:23** वस्त्रालङ्कारनैवेद्यैर्ध्वजा° ] C; --- लंकारनैवेद्यैर्ध्वजा° A; वस्त्रालङ्कारनैवेद्यैर्द्ध्वजा° $E_N$ **5:23** किं फलं च्छत्रदीपाश्च ] A; किं फलं च्छत्रदीपेषु $CE_N$ **5:24** अजवारण° ] $CE_N$; अजावारण° A **5:24** सन्मार्ज्जने ] C; सम्मार्जने $AE_N$ **5:24** फलं किं स्यात्तथा चैवोपलेपने ] $E_N$; फल किं स्या तथा चैवोपलेपयेत् A; फलं किं स्या तथा चै ⏑ पलेपनेन C

गीतनृत्यफलं ब्रूहि तन्त्रीवाद्यफलञ्च यत्।
कृष्णाष्टम्यां चतुर्दश्यां जागरस्य फलं वद॥ 5:25॥

उपवासस्य यत्पुण्यं देवदेवाश्रितस्य तु।
एतत्सर्वं समाख्याहि उपसन्नाः स्म ते वयम्॥ 5:26॥

नन्दिकेश्वर उवाच।
शतं संमार्ज्जने दानं सहस्रमुपलेपने।
निष्काणां प्राप्नुयात्पुण्यं शिवभक्त्या समन्वितः॥ 5:27॥

उपलिप्य शिवागारं शुचीभूय समाहितः।
अर्चयेत्सततं देवं ज्ञानदीक्षाविवर्जितः॥ 5:28॥

पत्रपुष्पफलैश्चैव दधिक्षीरघृतादिभिः।
विचित्रैर्भक्तिपूतैश्च यः पूजयति नित्यशः॥ 5:29॥

यस्तु नैवेद्यच्छत्रैश्च ध्वजादर्शवितानकैः।
घण्टाचामरदानेन अलङ्कारौदनेन वा॥ 5:30॥

सुवर्ण्णमणिवस्त्रैश्च गन्धधूपोपलेपनैः।
गीतवादित्रनृत्तैश्च हुड्डुङ्कारस्तवेन च॥ 5:31॥

वक्ष्यामि सर्वमेवन्तु अपरिज्ञातकारणे।
केवलम्भक्तिमापन्ने शृणुध्वं पूजने फलम्॥ 5:32॥

---

**5:25** गीतनृत्यफलं ब्रूहि तन्त्रीवाद्यफलञ्च यत् ] A$E_N$; गीतनृत्यफलं ब्रूहि त ⊔ ञ्च यत् C **5:25** कृष्णाष्टम्यां चतुर्दश्यां जागरस्य फलं वद ] $E_N$; कृष्णाष्ट --- गरस्य फलं वद A; ⊔ फलं वद C **5:26** देवदेवाश्रितस्य ] AC; देवदेवश्रितस्य $E_N$ **5:26** उपसन्ना स्म ते वयम् ] A; उपसन्नाः स्म ते वयम् C; उपसत्यः स्म ते वयं $E_N$ **5:27** नन्दि° ] A, नन्दी म्स्भ् **5:27** पुण्यं ] C$E_N$; पुण्य A **5:28** उपलिप्य शिवागारं ] C$E_N$; --- रं A **5:28** शुचीभूय ] A; शुचीर्भूत्वा C$E_N$ **5:28** अर्चयेत्सततं ] AC; अर्च्चयन् सततं $E_N$ **5:29** पत्रपुष्पफलैश्चैव ] C; पत्रपुष्पफलं चैव A; बभ्रुपुष्पफलञ्चैव $E_N$ **5:29** विचित्रैर्भक्तिपूतैश्च ] *em.*; विचित्रैभक्तिपूतैश्च A; विचित्रैभक्तिपूजैश्च C; विचित्रैर्भक्तिपूजैश्च $E_N$ **5:30** घण्टाचामरदानेन अलङ्कारौदनेन वा ] C$E_N$; घण्टाचामरदान --- A **5:31** °वस्त्रैश्च ] AC; °रत्नैश्च $E_N$ **5:31** हुड्डुङ्कारस्तवेन ] *em.*; हुडुङ्कारास्तवेन A; हंहुंकारस्तवैस्तथा C; हुहुङ्काररैस्तथैव च $E_N$ **5:32** अपरिज्ञातकारणे ] C; संपरिज्ञातकारणे C; अपरिज्ञातकारणं $E_N$ **5:32** शृणुध्वं ] C$E_N$; शृणुध्व A **5:32** पूजने ] *conj.*; पूजते A; पूजा C (unmetrical); पूजया $E_N$

तोयेन स्नापयेल्लिङ्गं गन्धदिग्धेन चैव हि।
एकरात्रेण मुच्यन्ते मानसात्किल्विषान्नराः॥ 5:33॥

दशरात्रात्कायिकेन महापापेन पक्षतः।
मासेन स्वर्गमाप्नोति अब्दाद्गाणेश्वरीं गतिम्॥ 5:34॥

त्र्यब्देन पितृतां याति पञ्चभिः कुलमुद्धरेत्।
द्विषड्कैरीशसायुज्यं यावज्जीवं शिवं विशेत्॥ 5:35॥

कृष्णाष्टम्याञ्चतुर्दश्यां यो दध्ना स्नापयेच्छिवम्।
यावज्जीवकृतैः पापैर्मुच्यते नात्र संशयः॥ 5:36॥

प्रत्यहं स्नापयेद्यस्तु मासमेकं शुचिर्नरः।
क्रतूनां फलमाप्नोति भिन्ने देहे सुरालयम्॥ 5:37॥

षण्मासं स्नापयेद्यस्तु सुराणां चोत्तमो भवेत्।
अब्दस्नानेन पितरस्तस्य यान्ति सुरालयम्॥ 5:38॥

त्र्याब्देन रुद्रसायोज्यं द्वादशाब्दैः कुलैः स्वयम्।
घृतेन स्नापयेल्लिङ्गमेकाहमपि मानवः॥ 5:39॥

दग्ध्वा तु सर्वपापानि अश्वमेधमवाप्नुयात्।

---

**5:33** स्नापयेल्लिङ्गं ] $CE_N$; स्नापये लिङ्गं A **5:33** मानसात्किल्विषान्नराः ] $CE_N$, मानसकिल्बि --- म्सा **5:34** दशरात्रात्कायिकेन ] $CE_N$; --- कायिकेन A **5:34** अब्दाद्गाणेश्वरीं गतिम् ] *conj.*; अब्दांगाणेश्वरी गतिं A; अब्दागाणेश्वरीं गतिम् C; आब्दाद्गाणेश्वरीं गतिं $E_N$ **5:35** याति ] $CE_N$; यान्ति A **5:35** द्विषड्कैरीशसायुज्यं ] $E_N$; द्विषड्कैरीशसायुज्य A; द्विषड्कैरीशसायोज्यं C **5:35** विशेत् ] $AE_N$; शेत् C (unmetrical) **5:36** चतुर्दश्यां ] $CE_N$; चतुर्दश्या A **5:36** स्नापयेच्छिवम् ] $CE_N$; स्नापये शिवम् A **5:36** यावज्जीवकृतैः पापैर्मुच्यते नात्र संशयः ] $CE_N$; यावजीवकृतैः प --- A **5:37** मासमेकं शुचिर्नरः ] C; मासमेक शुचिनरः A; मासमेकं सुचिर्न्नरः $E_N$ **5:37** क्रतूनां ] AC; केतूनां $E_N$ **5:37** भिन्ने देहे ] AC; भिन्नदेहे $E_N$ **5:37** सुरालयम् ] $CE_N$; सुरालये ज A **5:38** षण्मासं स्नापयेद्यस्तु ] $AE_N$; षमासं स्नाप यस्तु C **5:38** अब्दस्नानेन पितरस्तस्य ] AC; अब्दस्नानेपितरस्तस्य $E_N$ **5:39** त्र्याब्देन रुद्रसायोज्यं ] C; त्र्यब्देन रुद्रसायुज्य A; अयब्देन रुद्रसायुज्यं $E_N$ **5:39** द्वादशाब्दैः कुलैः स्वयम् ] $CE_N$; द्वादशाब्दे कुलै स्वयम् A **5:39** घृतेन स्नापयेल्लिङ्गमेकाहमपि मानवः ] $CE_N$; घृतेन स्न --- नवः A **5:40** दग्ध्वा तु सर्वपापानि ] AC; दध्ना तु सर्व पापानि $E_N$

दशरात्रात्स्वर्ग्गगतिम्मासाद्गाणेश्वरीङ्गतिम्॥ 5:40॥

पितॄन्नरकगर्तस्थानुद्धरत्यविकल्पतः।
षड्मासं स्नापयेद्यस्तु नित्यं चाभग्नयोगतः॥ 5:41॥

तस्यापि पितरो यान्ति नित्यं गाणेश्वरीङ्गतिम्।
द्विरब्देनैव सायुज्यं व्रजन्ति पितृभिस्सह॥ 5:42॥

घृतस्नानात्परन्नास्ति उद्धरेत्कुलसप्तकम्।
त्रिनेत्राः शूलहस्ताश्च वृषाङ्काश्चन्द्रशेखराः॥ 5:43॥

सर्वज्ञाः सर्वगा नित्या भवन्ति जगदीश्वराः।
कृष्णाष्टम्यां चतुर्द्दश्यां मधुना स्नापयेच्छिवम्॥ 5:44॥

राजसूयस्य यज्ञस्य फलं प्राप्नोति मानवः।
प्रत्यहं स्नापयेद्यस्तु वर्षेणैव गणेश्वरः॥ 5:45॥

पञ्चाब्देन तु सायोज्यं प्रयाति पितृसंयुतः।
प्रत्यहं पञ्चगव्येन यः शिवं स्नपयेन्नरः॥ 5:46॥

न तस्य दृश्यते चान्तं देवलोकञ्च गच्छति।
सम्वत्सरेण शुद्धात्मा शिवसायोज्यतां व्रजेत्॥ 5:47॥

---

**5:40** दशरात्रात्स्वर्गगतिम् ] $CE_N$; दशरात्रा स्वर्गगति A **5:40** मासाद्गाणेश्वरीङ्गतिम् ] $CE_N$; मासाद्गणेश्वरीगतिम् A **5:41** पितॄन्नरकगर्तस्थानुद्धरत्यविकल्पतः ] $CE_N$; पितृं नरकगर्त्तस्थानुद्धरत्वविकल्पतः A **5:42** तस्यापि पितरो ] AC; तस्योपरिवरा $E_N$ **5:42** गाणेश्व॰ ] $AE_N$; गानेश्व॰ C **5:42** द्विरब्देनैव सायुज्यं व्रजन्ति पितृभिस्सह ] *em.*; द्विर --- ⏓ स्सह A; दिरब्देनैव सायोज्यं व्रजन्ति पितृभिः सह C; द्विरब्देनैव सायोज्यं व्रजन्ति पितृभिः सह $E_N$ **5:43** घृतस्नानात्परन्नास्ति ] C; घृतस्नानपर नास्ति A; घृत स्नानात्परं नास्ति $E_N$ **5:43** उद्धरेत्कुलसप्तकम् ] $CE_N$; उद्धरे कुलसप्तकम् A **5:43** त्रिनेत्राः शूलहस्ताश्च ] $CE_N$; तृणेत्र शूलहस्ताश्च A **5:43** वृषाङ्काश्चन्द्रशेखराः ] $CE_N$; वृषांक चन्द्रशेखरः A **5:44** सर्वज्ञाः सर्वगा नित्या ] $CE_N$; सर्वज्ञा सर्वगा नित्यं A **5:44** श्नापयेच्छिवम् ] $CE_N$; श्नापये शिवम् A **5:45** राजसूयस्य ] $AE_N$; राजसूर्यस्य C **5:45** प्रत्यहं श्नापयेद्यस्तु वर्षेणैव गणेश्वरः ] $CE_N$; प्रत्यहं श्नापयेद्यस्तु व --- A **5:46** सायोज्यं ] $CE_N$; सायुज्य A **5:46** यः शिवं श्नपयेन्नरः ] $CE_N$; य शिवं श्नपये नरः A **5:47** दृश्यते ] AC; दृष्यते $E_N$ **5:47** चान्तं ] $A^{c}CE_N$; चिन्तं $A^{ac}$ **5:47** देवलोकञ्च ] A; देवलोकं स $CE_N$ **5:47** ॰सायोज्यतां ] C; ॰सायुज्यतां $AE_N$

द्विवर्षेण पितॄन्सप्त समुद्धृत्य शिवं व्रजेत्।
गन्धैश्च स्नापयेल्लिङ्गं दिव्यैश्चैव सुगन्धिभिः॥ 5:48॥

वाजपेयस्य यज्ञस्य फलं प्राप्नोति मानवः।
कर्प्पूरव्यतिमिश्रेण चन्दनेन तु लेपयेत्॥ 5:49॥

विद्याधरत्वमाप्नोति रमते सुरपूजितः।
अश्वमेधफलञ्चैव दशरात्रेण चाप्नुयात्॥ 5:50॥

मासेन गणतां याति अब्दात्सायोज्यमाप्नुयात्।
अभग्नयोगो यो दद्यात्प्रत्यहं लिङ्गलेपनम्॥ 5:51॥

पितरस्तस्य सर्वे ते गतिं यस्यन्ति चोत्तमाम्।
अगरुन्दशसाहस्रं षट्साहस्रन्तु चन्दनम्॥ 5:52॥

अनन्तो गुग्गुलश्चैव सहाज्येन सुयोजितः।
द्वे सहस्रे पलानां तु महिषाक्षस्य गुग्गुलोः॥ 5:53॥

प्रदहेत्तद्गतात्मा यः सर्वपापैः प्रमुच्यते।
देवि सम्वत्सरे पूर्णे नन्दीश्वरसमो भवेत्॥ 5:54॥

एकाहं दहते यस्तु देवदेवस्य संनिधौ।
सर्वपापविशुद्धात्मा अग्निष्टोममवाप्नुयात्॥ 5:55॥

---

**5:48** पितॄन्सप्त ] C; पितृ सप्त A; पितृन्सप्त $E_N$ **5:48** स्नापयेल्लिङ्गं दिव्यैश्चैव सुगन्धिभिः ] $CE_N$; स्नपये लिंगं --- A **5:49** यज्ञस्य फलं ] C; यज्ञस्य फल A; याज्ञस्य फलं $E_N$ **5:49** चन्दनेन ] $CE_N$; चन्दनेना A **5:50** अश्वमेधफलञ्चैव ] $CE_N$; अश्वमेधफल चैव A **5:50** दशरात्रेण चाप्नुयात् ] A; दशरात्रादवाप्नुयात् $CE_N$ **5:51** मासेन गणतां याति ] *em.* Cf. NiMukh; मासेन गणता यान्ति A; मासेनैकेन गणतां $CE_N$ म्स्छ्$E_N$; अब्दा सायुज्यमाप्नुयात् A **5:51** अभग्नयोगो यो दद्यात्प्रत्यहं लिङ्गलेपनम् ] C; अभग्नयोगो यो --- पनम् A; अहग्नयोगो यो दद्यात्प्रत्यहं लिङ्गलेपनम् $E_N$ **5:52** पितरस्तस्य सर्वे ते गतिं ] $CE_N$; पितरस्तस्य सवे ते गति A **5:52** षट्साहस्रन्तु ] $CE_N$; षट्सहस्रं तु A **5:53** अनन्तो ] $CE_N$; अनंत्यो A **5:53** सहाज्येन ] $AE_N$; सहाजेन C **5:53** महिषाक्षस्य गुग्गुलोः ] $CE_N$; महिसाखस्च गुगुलोः A **5:54** प्रदहेत्तद्गतात्मा ] *conj.*; प्रदहेत्तर्गतानां यः A; प्रदहेत्तङ्गतात्मा यः C; प्रदहेत्तङ्गतात्मायः $E_N$ **5:54** देवि सम्वत्सरे पूर्णे नन्दीश्वरसमो भवेत् ] $CE_N$; देवि संवत् --- र समो भवेत् A **5:55** एकाहं दहते यस्तु ] C; एकाहो ऽपि दहेद्यस्तु A; एकान्हं दहते यस्तु $E_N$

भक्तिमान्प्रदहेद्यस्तु धूपं गुग्गुलमुत्तमम्।
मासैकेन समाप्नोति क्रतूनां शतमुत्तमम्॥ 5:56॥

वर्षमेकन्दहेद्यस्तु स गणश्चोत्तमो भवेत्।
न तस्य सम्भवो मर्त्ये पितृभिः सह मोदते॥ 5:57॥

द्व्यब्दं दहति यो देवि शुचीभूय दिने दिने।
स्वकुलञ्चोद्धृतं तेन शिवभक्तेन धीमता॥ 5:58॥

वस्त्रध्वजवितानं वा यो दद्याल्लिङ्गसन्निधौ।
लभते परमैश्वर्यं जायते चोत्तमे कुले॥ 5:59॥

सकृद्दानफलं ह्येतद्द्विस्त्रिधा गतिरुत्तमा।
प्राप्नुयान्मानवः शीघ्रं सोमलोकं न संशयः॥ 5:60॥

शतसाहस्रदानेन गतिर्गाणेश्वरी भवेत्।
पितृभिः संयुतश्चैव लक्षदानान्न संशयः॥ 5:61॥

मेखलाङ्कटिसूत्रञ्च यो दद्याल्लिङ्गमूर्धनि।
चतुःसागरपर्यन्तक्ष्मायान्तु स भवेन्नृपः॥ 5:62॥

---

**5:56** भक्तिमान् ] CE$_N$; भक्तिमा A **5:56** मासैकेन ] E$_N$; मासैकंन A$^c$; तमासैकंन A$^{ac}$; मासेकेन C **5:56** क्रतूनां ] AC; क्रतुनां E$_N$ **5:57** वर्षमेकन्दहेद्यस्तु ] AC; मासमेकं दहेद्यस्तु E$_N$ **5:57** गणश्चोत्तमो भवेत् ] CE$_N$; गणश्चो --- A **5:57** सम्भवो मर्त्ये पितृभिः ] CE$_N$; संभव मत्ये पितृभि A **5:58** द्व्यब्दं दहति ] A; द्व्यब्दं हति C (unmetrical); व्द्यब्दं दहति E$_N$ **5:58** शुचीभूय ] AC; शुचीर्भूतो E$_N$ **5:58** तेन शिवभक्तेन ] AE$_N$; तेना सभक्तेन C (unmetrical) **5:59** वस्त्रध्वजवितानं वा ] A; वस्त्रध्व ⊔ न चC; वस्त्रध्वजवितानन्तु E$_N$ **5:59** दद्याल्लिङ्गसन्निधौ ] CE$_N$; दद्या लिङ्गसंनिधौ A **5:59** लभते परमैश्वर्यं ] CE$_N$; लभते परमेश्वर्यं A **5:59** जायते चोत्तमे कुले ] CE$_N$; जातः परमके कुले A **5:60** एतद् द्विस्त्रिधा गतिरुत्तमा ] *em.*; द्वित्रिधा गतिरुत्तमा C; द्वितृधा गतिरु --- A; °त्रिधागतिरुत्तमां E$_N$ **5:60** प्राप्नुयान्मानवः ] E$_N$; प्राप्नुयात्मानवः C; ---नवः A **5:60** सोमलोकं ] CE$_N$; सोमलोक A **5:61** गतिर्गाणेश्वरी भवेत् ] E$_N$; गतिपाणेश्वरीम्भवेत् A; गतिमार्गाणेश्वरी भवेत् C **5:61** पितृभिः संयुतश्चैव ] A$^c$E$_N$; पितृभि संयुतश्चैव A$^{ac}$; पितृभिः संयुतंश्चैव C **5:61** लक्षदानान्न ] CE$_N$; लक्षदानं न A **5:62** मेखलाङ्कटिसूत्रञ्च ] C; मेखला कटिसूत्रञ्च A; मेखलां कटिसूत्रश्ञ्च E$_N$ **5:62** °मूर्ध्निषु ] A; °मूर्धनि CE$_N$ **5:62** चतुःसागरपर्यन्तक्षायान्तु स भवेन्नृपः ] C; चतुसागरपयन्तं क्षमाया स भवे नृपः A; चतुःसागरपर्यन्त क्षायां नु स भवेन्नृपः E$_N$

मुकुटं कुण्डलं चैव चित्रपट्टकदायकः।
सकलान्तु महीं भुङ्क्ते अङ्गाभरणदानतः॥ 5:63॥

मुखकोशे तथैवेह पट्टात्प्रादेशिको नृपः।
चित्रके चित्रभोगानि निस्सपत्नमवाप्नुयात्॥ 5:64॥

पुनः पुनश्च यो दद्याद्रत्नाभरणभूषणम्।
गाणापत्यमवाप्नोति अक्षयं परमं ध्रुवम्॥ 5:65॥

मुक्तिमण्डपिकां भक्त्या दत्वा यो ऽर्च्चयते शिवम्।
न तस्य पुनरावृत्तिर्गणश्चैवोत्तमो भवेत्॥ 5:66॥

रोचनां कुंकुमं चैव लिंगस्योपरि यो नरः।
प्रत्यहं लेपनन्दद्यात्स विद्याधरतां व्रजेत्॥ 5:67॥

द्वादशाब्देन गणतां कर्पूरागरुलेपनैः।
कटकेयूरदानेन आधिपत्यं महेच्छताम्॥ 5:68॥

प्राप्नुवन्ति नरा लोके शिवभक्तिपरायणाः।
रत्नदानानि दिव्यानि यो ददाति शिवाय वै॥ 5:69॥

दशसौवर्णिकं पुष्पं निर्ग्गन्धि यदि भाविनि।
शतसाहस्रिका माला अनन्तं लिंगपूरणे॥ 5:70॥

---

**5:63** चित्रपट्टकदायकः ] CE$_N$; चित्रपट्टक --- A **5:63** सकलान्तु महीं भुङ्क्ते ] *em.*; --- तु मही भुंक्ते A; सकलान्तु मही भुङ्क्ते C; सकलान्तु महीं मुङ्क्ते E$_N$ **5:63** अङ्गाभरणदानतः ] AE$_N$; अङ्गाभरणदानततः C **5:64** मुखकोशे तथैवेह ] AC; मुसकोशेतथैवेह E$_N$ **5:64** पट्टात् प्रादेशिको नृपः ] C; पट्टप्रादेशिको नृपः A; षट्टात्प्रादेशिको नृपः E$_N$ **5:64** निस्सपत्नमवाप्नुयात् ] *em.*; निस्वपत्नमवाप्नुयात् A; निःसपत्नान्यवाप्नुयात् C; निः सम्पन्नान्यवाप्नुयात् E$_N$ **5:65** गाणापत्यमवाप्नोति ] C; गणापत्यमवाप्नोति A; गाणपत्यमवाप्नोति E$_N$ **5:65** अक्षयं ] A; चाक्षम् C (unmetrical); चाक्षयं E$_N$ **5:66** मुक्तिमण्डपिकां भक्त्या ] *em.*; मुक्तमण्डपिका भक्त्या A; मुक्तामण्डपिकां भक्त्या C; मुक्तिमण्डपिकाभक्त्या E$_N$ **5:66** यो ऽर्च्चयते शिवम् ] CE$_N$; --- A **5:66** °रावृत्तिर्ग° ] E$_N$; °रावृत्तिग° AC **5:67** रोचनां ] C; रोचन A; रोचना E$_N$ **5:68** कर्पूरागरु° ] C; कपूरागरु° A; कर्पूरागुरु° E$_N$ **5:68** कटकेयूरदानेन ] AC; कटकेयूर दानेन E$_N$ **5:69** प्राप्नुवन्ति नरा लोके शिवभक्तिपरायणाः ] CE$_N$; प्राप् --- भक्तिपरायणाः A **5:70** दशसौवर्णिकं ] CE$_N$; दशसौवर्णिक A **5:70** निर्ग्गन्धि ] A; निर्गधि C; निर्गन्धं E$_N$ **5:70** भाविनि ] A; भामिनि CE$_N$ **5:70** शतसाहस्रिका ] AC; शतसाहस्रिकां E$_N$

निर्गन्धिकुसुमस्यायं विधिः ख्यातो द्विजोत्तमाः।
शोभनैर्दिव्यगन्धाद्यैः शृणु तत्र तु यत्फलम्॥ 5:71॥

एकपुष्पप्रदानेन लिंगेषु प्रतिमासु वा।
अशीतिकल्पकोटीनां दुर्गतिं न नरो व्रजेत्॥ 5:72॥

एवं वै निरयाः सर्वे नियतं शून्यतां गताः।
एकपुष्पप्रदानेन कस्य योगो न विद्यते॥ 5:73॥

वित्तसंपत्तिसंशुद्धं शेषं संपत्तिभावितम्।
तृणमप्युत्तमार्थाय कोटिवेधि रसेन्द्रवत्॥ 5:74॥

नन्दिकेश्वर उवाच।
एकपुष्पप्रदानेन योगः सर्वस्य विद्यते।
न चतुःसम्पदायोगः किं तु सर्वस्य विद्यते॥ 5:75॥

अकामाभ्यर्च्चिते लिङ्गे एतदुक्तं मया फलम्।
कामेनाभ्यर्च्यमानस्य शृणु तस्यापि यत्फलम्॥ 5:76॥

अर्क्कस्य करवीरस्य बुकस्योन्मत्तकस्य च।
चतुर्णां पुष्पजातीनां गन्धं जिघ्रति शंकरः॥ 5:77॥

सुवर्ण्णनिष्कं पुष्पे तु सर्वस्मिन्देवि कथ्यते।

---

**5:71** निर्गन्धिकुसुमस्यायं विधिः ख्यातो द्विजोत्तमाः ] $E_N$; निगन्धिकुसुमस्यैषा विधिः ख्याता द्विजोत्तमाः A; निर्ग्गन्धिकुपुमस्यायं विधिः ख्यातो द्विजोत्तम C **5:71** शोभनैर्दिव्यगन्धाद्यैः शृणु तत्र तु यत्फलम् ] $CE_N$; शोभनैदिव्य --- तु यत्फलम् A **5:72** व्रजेत् ] $CE_N$; भवेत् A **5:73** निरयाः सर्वे ] $CE_N$; वितयं A **5:74** वित्त° ] A; वृत्तिं C; वृत्ति° $E_N$ **5:74** °भावितम् ] AC; °भाषितं $E_N$ **5:74** तृणमप्युत्तमार्थाय कोटिवेधि रसेन्द्रवत् ] C; तृणमप्युत्तमाथा --- A; तृणमप्युत्तमार्थाय कोटिवधिरसेन्द्रवत् $E_N$ **5:75** नन्दिकेश्वर ] $AE_N$; नन्दीकेश्वर C **5:75** योगः सर्वस्य विद्यते ] $CE_N$; योग सर्वस्य विद्वन्ति A **5:75** चतुःसम्पदायोगः ] C; चतुम्पदायोग A; चतुःसम्पदा योगः $E_N$ **5:76** अकामाभ्यर्च्चिते लिङ्गे एतदुक्तं ] $CE_N$; अकामाभ्यर्चये लिङ्गमेतदुक्तं A **5:76** कामेनाभ्यर्च्य° ] $E_N$; कामेनाभ्यर्च° AC **5:76** यत्फलम् ] $CE_N$; यतफलम् A **5:77** चतुर्णां पुष्पजातीनां गन्धं जिघ्रति ] $E_N$; चतुणां --- A; चतुर्णां पुष्पजातीनां गन्ध जिघ्रति C **5:78** सुवर्ण्णनिष्कं पुष्पे ] *em.*; सुवर्ण्णनिष्कपुष्पे AC; सुवर्ण्णनिष्कं पुष्पं $E_N$ **5:78** सर्वस्मिन् ] $E_N$; सर्वस्मिं A; सर्वस्मि C

सहस्रे त्वन्यपुष्पाणां दत्ते यत्कथ्यते फलम्॥ 5:78॥

एकस्मिन्करवीरस्य दत्ते पुष्पे हि तत्फलम्।
करवीरसहस्रस्य भवेद्दत्तस्य यत्फलम्॥ 5:79॥

तदेकस्य तु पद्मस्य दत्तस्य फलमश्नुते।
पद्मानाञ्च सहस्रस्य मम दत्तस्य यत्फलम्॥ 5:80॥

तत्फलं लभते पत्रे दत्ते बिल्वस्य शोभने।
बिल्वपत्रसहस्रे तु दत्ते मे यत्फलं स्मृतम्॥ 5:81॥

बुकपुष्पे तदेकस्मिन्मम दत्ते लभेत्फलम्।
बुकपुष्पसहस्रे तु दत्ते यत्कीर्तितं फलम्।
पुष्पे दत्ते तदेकस्मिन्लभेद्धुतूरकस्य तु॥ 5:82॥

बुकेन वरदो देवः करवीरैर्द्धनप्रदः।
अर्केण श्रियमाप्नोति मोक्षं धुत्तूरकेन तु॥ 5:83॥

नीलोत्पलैर्भवेद्भोगो यो ऽर्चयेल्लिङ्गमुत्तमम्।
रक्ताब्जैः प्राप्नुयाद्राज्यं पुण्डरीकैश्च चक्रिणम्॥ 5:84॥

---

**5:78** सहस्रे त्वन्यपुष्पाणां ] C; सहस्रे त्वत्यपुष्पाणां A; सहस्रन्त्वन्यपुष्पाणां $E_N$ **5:78** यत्कथ्यते ] $CE_N$; यकथ्यते A **5:79** एकस्मिन्करवीरस्य दत्ते पुष्पे हि तत्फलम् ] AC; eyeskip $E_N$ **5:79** करवीरसहस्रस्य भवेद्दत्तस्य यत्फलम् ] C; करवीरसहस्रस्योम्भवे दत्त-स्य यत्फलम् A; करवीरसहस्रस्य भवेत्तदस्य यतफलं $E_N$ **5:80** पद्मस्य ] AC; पुष्पस्य $E_N$ **5:80** पद्मानाञ्च ] A; पद्मानान्तु $CE_N$ **5:80** सहस्रस्य मम दत्तस्य यत्फलम् ] $CE_N$; स --- फलम् A **5:81** तत्फलं ] $CE_N$; ततफलं A **5:81** बिल्वपत्रसहस्रे तु दत्ते मे यत्फलं ] $E_N$; बिल्वपत्रसहस्रं तु दत्तं मे यतफलं A; बिल्वपत्रसहस्रे तृ दत्ते मे यत्फलं C **5:82** बुकपुष्पे तदेकस्मिन् मम दत्ते लभेत्फलम् ] $CE_N$; बुकपुष्पन्तदेकस्मिं मम दत्ते लभते फलम् A (unmetrical) **5:82** बुकपुष्पसहस्रे तु दत्ते यत्कीर्तितं फलम् ] C; बुकपु-ष्पं सहस्रं तु दत्ते यत्फलम्किर्त्तितम् A; एयेस्किप् $E_N$ **5:82** तदेकस्मिन् ] C; च्चदेकस्मिं (?) A; यदेकस्मिन् $E_N$ **5:82** लभेद्धुतूरकस्य ] C; लभे धुतूरकस्य A; लभेद्धुतुरकस्य $E_N$ **5:83** बुकेन वरदो देवः करवीरैर्द्धनप्रदः ] C; बुकेन वरदो दे --- A; वः वुकेन वरदो देवः करवीरैर्द्धनप्रदः $E_N$ **5:83** अर्केण श्रियमाप्नोति ] AC; अर्केण प्रियमच्छिन्ने $E_N$ **5:83** धुत्तूरकेन ] A; धुत्तुरकेण C; धत्तूरकस्य $E_N$ **5:84** नीलोत्पलैर्भ° ] $AE_N$; नीलोत्पलैभ° C **5:84** यो ऽर्चयेल्लिङ्ग° ] $CE_N$; योर्चये लिङ्ग A **5:84** रक्ताब्जैः ] *em.*; रक्ताब्जै A; रक्ताब्दैः C; रक्तार्कैः $E_N$

चम्पकैः सर्वकामानि पुंनागैर्नागकेशरैः ।
ईप्सितांल्लभते कामांस्तथा केशरदामकैः ॥ 5:85 ॥

मन्त्रसिद्धिमवाप्नोति बृहत्यागस्तिपुष्पकैः ।
यो ऽर्चयेत्परमेशानं सिद्धकेन तथैव हि ॥ 5:86 ॥

सर्वकामानवाप्नोति यो ऽर्च्चयेद्गन्धपुष्पकैः ।
कुब्जकैर्विपुलो लाभः सौभाग्याय च वारुणी ॥ 5:87 ॥

कन्याकामस्तु जातीभिर्यो ऽर्च्चयेत्परमेश्वरम् ।
स लभेच्चोत्तमां कन्यां षण्मासेन न संशयः ॥ 5:88 ॥

मल्लिका ज्ञानकामाय अर्च्चयेद्यो महेश्वरम् ।
लभते परमं ज्ञानं संसारभयनाशनम् ॥ 5:89 ॥

पुत्रकामाय कुन्दैस्तु अर्च्चयीत शुचिर्न्नरः ।
लभते बहुपुत्रत्वं धनवंतं चिरायुषम् ॥ 5:90 ॥

आरोग्यं कुशपुष्पैस्तु अशोकैः प्रियसङ्गमम् ।
कर्ण्णिकारैर्धनं विद्याद्वश्यार्थे द्रोणपुष्पिका ॥ 5:91 ॥

---

**5:85** चम्पकैः ] CE$_N$; चम्पकै A **5:85** ईप्सितांल्लभते कामांस्तथा ] *conj.*; ईप्सितंल्लभते कामन्तथा A; ईप्सिताल्लभते कामांस्तथा C; ईप्सितां लभते कामांस्तथा E$_N$ **5:86** बृहत्यागस्तिपुष्पकैः ] C; --- A; बृहत्यगचस्तिपुष्पकैः E$_N$ (unmetrical) **5:86** सिद्धकेन ] *em.*; सिद्धिकेन A; सितार्क्केण CE$_N$ **5:87** सर्वकामानवाप्नोति ] CE$_N$; सर्वकानमावाप्नोति A **5:87** यो ऽर्च्चयेद्गन्धपुष्पकैः ] C; यो ऽर्च्चये गन्धपुष्पकैः A; यो ऽउर्चयेद्गन्धपुष्पकैः E$_N$ **5:87** कुब्जकैर्विपुलो लाभः ] *conj.*; तूचकै विपुलं लाभं A; कुन्दकैविपुलो लाभः C; कुपुकैर्विपुलोलाभः E$_N$ **5:87** सौभाग्याय च वारुणी ] *em.*; सौभाग्यंय च वारुणी A; शौभाग्याय च वारुणी C; सौभाग्याय च वारुणं E$_N$ **5:88** जातीभिर्यो ऽर्च्च° ] CE$_N$; जातीभियो ऽर्च्च° A **5:88** स लभेच्चोत्तमां कन्यां ] CE$_N$; स लभे चोत्तमां कन्या A **5:89** ज्ञानकामाय अर्च्चयेद्यो महेश्वरम् ] *conj.*; ज्ञानकामे य --- A; ज्ञानकामार्थमर्च्चयन्तो महेश्वरम् CE$_N$ **5:89** लभते परमं ] *em.*; लभन्ते परमं CE$_N$; लभन्ते तश्वर A **5:90** कुन्दैस्तु अर्च्चयीत शुचिर्न्नरः ] C; कुंदेस्तु अर्चये शुचिनरः A; कुन्दैस्तु अर्च्चयीत शुच्चिर्न्नरः E$_N$ **5:90** लभते ] CE$_N$; लभन्ते A **5:90** धनवंतं ] A; धनवंन्तं C; धनवत्वं E$_N$ **5:91** कुशपुष्पैस्तु ] CE$_N$; कुयपुष्पैस्तु A **5:91** कर्ण्णिकारैर्धनं विद्याद्वश्यार्थे द्रोणपुष्पिका ] C; कर्ण्णिकारे धनं विद्यांद्वश्यार्थे द्रोणपुष्पिकाः A; कर्णिकारं धनं विद्याद्वश्यार्थे द्रोणपुष्पिकां E$_N$

कदम्बेनार्चयेल्लिङ्गं सततं नियतव्रतः।
शत्रूणां वशकामाय नित्यमेव प्रदापयेत्॥ 5:92॥

नश्यन्ति व्याधयस्तस्य यो ऽर्चयेदरिमुस्तकैः।
सिंदुवारस्य पुष्पेण बद्धो मुच्येत बन्धनात्॥ 5:93॥

अंकोटासितवर्णानि निर्गन्धिकुसुमानि च।
तानि शत्रुविनाशाय देवदेवाय कल्पयेत्॥ 5:94॥

पीतकानि तु पुष्ट्यर्थे पुष्पाणि विजयाय च।
नित्यमेव तु यो दद्यात्सर्वकाममवाप्नुयात्॥ 5:95॥

जलजानि तु पुष्पाणि वश्यार्थे तु प्रकल्पयेत्।
नीलरक्तानि यो दद्यात्तानि वश्यकराणि तु॥ 5:96॥

सर्वकामप्रदं बिल्वं दारिद्र्यभयनाशनम्।
बिल्वपत्रात्परं नास्ति येन तुष्यति शङ्करः॥ 5:97॥

विजयार्थे दमनकं योजयेन्नियमस्थितः।
विजिताः शत्रवस्तेन यो ऽर्चयेद्वृषभध्वजम्॥ 5:98॥

---

**5:92** कदम्बेनार्चयेल्लिङ्गं ] $E_N$; कदंबेनाच --- A **5:92** सततं नियतव्रतः ] C; --- यतव्रतः A; सततं नियते व्रतः $E_N$ **5:92** नित्यमेव ] $AE_N$; नित्यमेवं C **5:93** व्याधयस्तस्य ] $CE_N$; व्याधयस् सवे A **5:93** यो ऽर्चयेदरिमुस्तकैः ] A; यो ऽर्चयेदतिमुस्तकैः C; यो ऽर्चयेदतिमुक्तकैः $E_N$ **5:93** बद्धो ] $CE_N$; बधो A (unmetrical) **5:94** अङ्कोटासितवर्णानि ] C; अंकोटसितवर्णानि A; अंकोलासितवर्णानि $E_N$ **5:94** निर्गन्धिकुसुमानि च ] A; निर्ग्गन्धकुसुमानि च C; निर्गन्धकुसुमा प्रिये $E_N$ **5:94** तानि शत्रुविनाशाय देवदेवाय कल्पयेत् ] $CE_N$; तानि शत्रुविनाशाय दे --- A **5:95** पुष्ट्यर्थे पुष्पाणि विजयाय ] *conj.*; पुष्ट्यर्थ पुष्पाणि विजयानि A; पुष्ट्यर्थे पुष्पाणि वित्रयाय C; पुष्ट्यर्थं पुष्पाणि विजयाय $E_N$ **5:95** सर्वकाममवाप्नुयात् ] A; सतत्काममवाप्नुयात् $CE_N$ **5:96** जलजानि तु पुष्पाणि वश्यार्थे तु ] AC; जलजानितु पुष्पाणि वश्यार्थं तु $E_N$ **5:96** यो दद्यात् ] *em.*; यो दद्या A; यान्येव $CE_N$ **5:97** सर्वकामप्रदं बिल्वं ] $CE_N$; सर्वकामयद चैवं A **5:97** दारिद्र्यभयनाशनम् ] A; दारिद्र्यस्य प्रमोचनम् $CE_N$ **5:97** बिल्वपत्रात्परं नास्ति येन तुष्यति ] $CE_N$; बिल्वप --- A **5:98** विजयार्थे दमनकं ] C; विजयार्थन्दवनद्दं A; विजयार्थं दमनकं $E_N$ **5:98** योजयेन्नियमस्थितः ] C; योजये नियमस्थितः A; योजयेन्नियमास्थितः $E_N$ **5:98** विजिताः शत्रवस्तेन यो ऽर्चयेद्वृषभध्वजम् ] $E_N$; विजया शत्रुवस्तेन योजयेद्वृषभध्वजः A; विजिताः शस्त्रवस्तेन यो ऽर्च्चयेद्वृषभध्वजम् C

सुखं मरुवकन्दद्याज्जम्बुटः सर्वकामदः।
तिलको धनकामाय गोकामाय च वंकुली॥ 5:99॥

सौख्यदश्चापि तगरः किङ्कराटश्च कामदः।
आरोग्यञ्च धनञ्चैव फलिनी कामदा स्मृता॥ 5:100॥

शालः प्रियकरश्चैव किंशुकादायुराप्नुयात्।
हस्त्यश्वपशुकामाय कुटजेनार्च्चयेद्धरम्॥ 5:101॥

कर्पूरदमनं दद्याच्छत्रूणाञ्च विनाशने।
नश्यन्ति शत्रवः शीघ्रं देवदेवस्य पूजनात्॥ 5:102॥

श्यामा चारोग्यदा नित्यं जवापुष्पम्तथैव च।
कुरण्टकस्य वश्यार्थं नित्यं लिङ्गस्य पूजनात्॥ 5:103॥

विद्वेषे यूथिका योज्या देवदेवे महेश्वरे।
केतकी शत्रुनाशाय क्रुद्धो लिङ्गं तु यो ऽर्चयेत्॥ 5:104॥

सर्वकामप्रदा ह्येषा व्याघ्री देवि प्रकीर्त्तिता।
ज्योत्स्नाकारी तथैवेह नित्यमेव हि कामदा॥ 5:105॥

वासकेनार्चयेद्देवं बलमायुश्च वर्धते।

---

**5:99** सुखं मरुवकन्दद्याज्जम्बुटः सर्वकामदः ] C; सुखम्मरु (?) वकन्दद्या जम्युट सर्वकामदः A; सुखे मरुवकं दद्याज्जम्बुटः सर्वकामदः $E_N$ **5:99** वंकुली ] AC; वंकुलौ $E_N$ **5:100** तगरः ] B, तरारः म्सा **5:100** तगरः किङ्कराटश्च ] C; तगरङ्किङ्कराटश्च A; तगरः किङ्किरातश्च $E_N$ **5:100** आरोग्यञ्च धनञ्चैव फलिनी कामदा स्मृता ] $CE_N$; आरोग्यञ्च धनं --- A **5:101** किंशुकादायुराप्नुयात् ] $CE_N$; किंशुकारायुदाप्नुयात् A **5:102** कर्पूरदमनं ] AC; कर्पूरदमनकौ $E_N$ **5:102** दद्याच्छत्रूणाञ्च ] $E_N$; दद्या शत्रूणाञ्च A; दद्याच्छत्रूणा च C **5:102** शत्रवः ] $CE_N$; तत्रव A **5:103** जवापुष्पम् ] AC; जपापुष्पं $E_N$ **5:103** कुरण्टकस्य वश्यार्थं ] A; कुरुण्टकस्य वश्यार्थ C; कुराण्टकस्य वश्यार्थं $E_N$ **5:103** नित्यं लिङ्गस्य पूजनात् ] $CE_N$; नित्यं --- A **5:104** योज्या देवदेवे महेश्वरे ] $AE_N$; योज्या देवदेवमहेश्वरे C **5:104** शत्रुनाशाय ] $AE_N$; शत्रुनाया C (unmetrical) **5:105** सर्वकामप्रदा ह्येषा ] C; सवकामपदो ह्येषा A; सर्वकामप्रदा ह्यैषा $E_N$ **5:105** व्याघ्री देवि प्रकीर्त्तिता ] *em.*; व्याघ्री देवि प्रकीर्त्तिताः A; व्याघ्री देवी प्रकीर्त्तिता $CE_N$ **5:105** ज्योत्स्नाकारी तथैवेह ] A; ज्योत्स्नाकरी तथैवेह C; ज्योत्स्नाकरी तथैवाह $E_N$ **5:106** वासकेनार्चयेद्देवं ] $AE_N$; वाशकेनार्चयेद्देवं C **5:106** बलमायुश्च वर्धते ] $CE_N$; बलमायुश्च वधते A

झिण्टिका सुखदा नित्यं तथा चाप्सरचम्पकम्॥ 5:106॥

डिम्बाक्षी व्याधिनाशार्थमश्वकर्ण्णस्तथैव च।
जयन्ती जयकामाय श्वेता च गिरिकर्णिका॥ 5:107॥

विद्वेषोच्चाटनार्थाय निम्बपुष्पेण यो ऽर्च्चयेत्।
भण्डी चाकर्षणे योज्या मदयन्ती तु या भवेत्॥ 5:108॥

ऋषिपुष्पी रुद्रजटी हन्ति सर्वानुपद्रवान्।
शणपुष्पञ्च यत्प्रोक्तं कोकिलाक्षस्तथैव च॥ 5:109॥

सर्वशुक्लं तु शान्त्यर्थे सर्वपीतन्तु पौष्टिके।
सर्वरक्तन्तु वश्यार्थे कृष्णं चैवाभिचारुके॥ 5:110॥

पत्रं पुष्पं फलं तोयं तृणञ्चैव तथा पयः।
प्रत्यहं शम्भवे दद्यान्नासौ दुर्ग्गतिमाप्नुयात्॥ 5:111॥

यस्य वृक्षस्य पुष्पाणि पत्राणि च फलानि च।
महादेवोपयुक्तानि सो ऽपि याति पराङ्गतिम्॥ 5:112॥

नास्ति पापसमः शत्रुर्न च धर्मसमः सखा।

---

**5:106** झिण्टिका सुखदा नित्यं ] C; गण्टिका सुखदा नित्य --- म्सा; किण्टिका सुखदा नित्यं $E_N$ **5:106** तथा चाप्सरचम्पकम् ] $CE_N$; --- A **5:107** डिम्बाक्षी व्याधिनाशार्थमश्वकर्ण्णस्तथैव च ] C; डिम्बाथी व्याधिनाशार्थ अश्वकर्ण्णस्तथैव च A; डिम्बाक्षी व्याधिनाशार्थमश्वकर्ण्णस्तथैव च $E_N$ **5:107** गिरिकर्णिका ] $CE_N$; गिरिकर्णि A (unmetrical) **5:108** विद्वेषोच्चाटनार्थाय निम्बपुष्पेण यो ऽर्च्चयेत् ] $CE_N$; विद्वेषोचाटनाथन्तु निम्बपुष्पानि योचयेत् A **5:108** भण्डी चाकर्षणे योज्या ] *em.*; भण्डी चाकर्षणे योज्य AC; भण्डीचाकर्षणे योज्या $E_N$ **5:108** तु ] A; च $CE_N$ **5:109** हन्ति सर्वानुपद्रवान् ] $E_N$; हन्ति सर्वान्तुपद्रवात् A; हन्ती सर्वानुपद्रवान् C **5:109** सणपुष्पञ्च यत्प्रोक्तं ] $E_N$; शतपुष्पञ्च य --- A; सणपुष्पञ्च यत्प्रोक्तं C **5:109** कोकिलाक्षस्तथैव च ] $CE_N$; --- व च A **5:110** सर्वशुक्लं तु ] AC; सर्वं शुक्लंन्तु $E_N$ **5:110** सर्वपीतन्तु ] AC; सर्वं पीतन्तु $E_N$ **5:110** सर्वरक्तन्तु वश्यार्थे कृष्णं चैवाभिचारुके ] *em.*; सर्वरक्तन्तु वश्यार्थे कृष्ण चैवाभिचारुके A; कृष्णञ्चैवाभिचारे च देवदेवाय कल्पयेत् $CE_N$ **5:111** पत्रं पुष्पं फलं तोयं ] $CE_N$; पत्रं पुष्प फलन्तोय A **5:111** दद्यान्नासौ ] $CE_N$; दद्यातसौ A **5:112** महादेवोपयुक्तानि ] C; महादे --- A; महादेवाय युक्तानि $E_N$ **5:112** सो ऽपि याति पराङ्गतिम् ] $E_N$; --- यान्ति पराङ्गतिम् A; सो ऽपि याति परा गतिम् C **5:113** पापसमः शत्रुर्न च धर्मसमः ] $CE_N$; पापसम शत्रुन च धर्मसम A

नैव रुद्रात्परो देवो न पुष्पं कनकादपि॥ 5:113॥

बुकेनाभ्यर्च्यमानस्तु वरदो भवति प्रभुः।
सप्तरात्रं निवेद्यस्तु बुको रुद्राय धीमता॥ 5:114॥

दिने दिने तु दातव्यं शौचयित्वा पुनः पुनः।
सप्तरात्रमतिक्रम्य निर्माल्यत्वं प्रपद्यते॥ 5:115॥

सकृद्दत्ते बुके देवि गोसहस्रफलं लभेत्।
पक्षेण योगी भवति मासेन तु दिवं व्रजेत्॥ 5:116॥

मासद्वयेन चाप्नोति क्रतूनां फलमुत्तमम्।
त्रिभिर्मासैः प्रपद्येत ब्रह्मलोकमनुत्तमम्॥ 5:117॥

चतुर्भिः सिद्धिमाप्नोति योगसिद्धिञ्च पञ्चभिः।
षण्मासेन नरो याति रुद्रलोकं न संशयः॥ 5:118॥

रुद्राकृतिधरो भूत्वा चन्द्रार्द्धकृतशेखरः।
प्रयाति वृषयानेन द्वितीय इव शूलधृक्॥ 5:119॥

एवमभ्यर्च्य देवेशं नैवेद्यम्परिकल्पयेत्।
अन्ननैवेद्यदानेन लभते सुखमक्षयम्॥ 5:120॥

देवलोकमनुप्राप्तो भक्ष्यदानान्नरोत्तमः।
विद्याधरपतिर्भूत्वा मोदते दिवि देववत्॥ 5:121॥

सघृतं पायसं दद्यान्नैवेद्यं शंभवे सदा।

---

**5:113** रुद्रात्परो देवो न पुष्पं ] CE$_N$; रुद्रपरो देवो न पुष्प A **5:115** शौचयित्वा पुनः पुनः ] C; शौचयित्वा पुनः पु --- A; शोचयित्वा पुनः पुनः E$_N$ **5:115** सप्तरात्रमतिक्रम्य ] CE$_N$; --- मतिक्रम्य A **5:117** क्रतूनां ] AE$_N$; क्रतूना C **5:117** त्रिभिर्मासैः ] CE$_N$; तृभिमासैः A **5:118** चतुर्भिः सिद्धिमाप्नोति ] CE$_N$; चतुभि दिसिमाप्नोति A **5:118** योगसिद्धिञ्च पञ्चभिः ] C; योगसिद्धिञ्च पञ्च --- A; योगसिद्धिश्च पञ्चभिः E$_N$ **5:118** याति रुद्रलोकं न संशयः ] CE$_N$; यान्ति रुद्रलोक न संशय A **5:119** °धरो ] AC; °नरो E$_N$ **5:120** °नैवेद्य° ] AE$_N$; नेवेद्य C **5:121** देवलोकमनुप्राप्तो भक्ष्यदानान्नरोत्तमः ] C; देवलोकमनुप्रा --- त्तमः A; देवलोकमनुप्राप्ता भक्ष्यपानान्नरोत्तमाः E$_N$ **5:121** विद्याधरपतिर्भूत्वा ] E$_N$; विद्याधरपतिभूत्वा AC **5:122** दद्यान्नैवेद्यं ] E$_N$; दद्या नैवेद्य A; दद्यान्नेवेद्यं C **5:122** सदा ] CE$_N$; त्सन्दा A

गाणापत्यं भवेच्छीघ्रं द्वादशाब्दात्कुलैः सह॥ 5:122॥

घृतपूपं तु सगुडं मम दक्षिणमूर्तिषु।
निवेदयति यो मर्त्यो नन्दीश्वरसमो भवेत्॥ 5:123॥

खण्डखाद्यकृतान्दत्वा प्राप्नुयाद्गतिमुत्तमाम्।
भक्ष्यभोज्यादिकं दत्वा सर्वकामानवाप्नुयात्॥ 5:124॥

यवागूं कृसराम्पूपान्दत्वा तु सुखभाग्भवेत्।
मण्डकासिद्धिपिण्डांश्च शष्कुलीमोदकानि च॥ 5:125॥

दत्वान्यफलमूलञ्च लेह्यचोष्याणि यानि च।
दत्वा सर्वसुखावाप्तिरनन्तं गीतवादने॥ 5:126॥

निराहाराः क्षमायुक्ताः सत्यार्जवपरायणाः।
मद्भक्ता ये हि नृत्येयुस्ते स्युः प्राणसमा गणाः॥ 5:127॥

सकृत्कृत्वा फलं ह्येतत्तन्त्रीवाद्यस्य मे शृणु।
कृत्वासौ गणतां याति तन्त्रीवाद्यस्य वादकः॥ 5:128॥

हुडुङ्कारादिकं नित्यं मुखवाद्याट्टहासताम्।

---

**5:122** गाणापत्यं भवेच्छीघ्रं ] C; गाणापत्य भवे शीघ्रं A; गाणपत्यं भवेच्छीघ्रं $E_N$ **5:122** द्वादशाब्दात्कुलैः सह ] $E_N$; द्वादशाब्द् कुलैस्सहः A; द्वादशाब्दा कुलैः सह C **5:123** घृतपूपं ] $CE_N$; घृतदीपं A **5:123** मर्त्यो ] $CE_N$; मन्ये A **5:124** खण्डखाद्यकृतान्दत्वा प्राप्नुयाद्गतिमुत्तमाम् ] $CE_N$; खण्ड --- प या गतिमुत्तमात् A **5:124** भक्ष्यभोज्यादिकं ] AC; भक्ष्य भोज्यादिकं $E_N$ **5:124** सर्वकामानवाप्नुयात् ] $CE_N$; सर्वा कामानवाप्नुयात् A **5:125** यवागूं कृसराम्पूपान् ] C; यवागूकृसरपूपा A; यवागूकृशराः पूपा $E_N$ **5:125** मण्डकासिद्धिपिण्डांश्च ] *conj.*; मण्डका सिद्धपिण्डाश्च A; मण्डका सिद्धपिण्डाश्च C; मण्दकान् सिद्धपिण्डाश्च $E_N$ **5:125** शष्कुलीमोदकानि च ] *em.*; शंकुलीमोदकानि च A; षष्कुलीमोदकानि तु C; शष्कुलीमोदकानि तु $E_N$ **5:126** दत्वान्यफलमूलञ्च ] $AE_N$; दत्वान्यन्फलमूलञ्च C **5:126** दत्वा सर्वसुखावाप्तिरनन्तं गीतवादने ] $CE_N$; सर्व सह --- द ⪯ A **5:127** सत्यार्जव° ] AC; सत्यर्जव° $E_N$ **5:127** मद्भक्ता ये हि नृत्येयुस्ते स्युः प्राणसमा गणाः ] $CE_N$; मद्भक्त यो हि नृत्येयुस्ते स्युः प्राणसमो गणः A **5:128** सकृत्कृत्वा फलं ह्येतत् ] C; सकृ दत्वा फलं ह्येत A; सकृद्दत्वा फलं ह्येतत् $E_N$ **5:128** तन्त्रीवाद्यस्य वादकः ] A; तन्त्रीवादस्य वादकः C; तन्त्रीवाद्यस्य वा देवः $E_N$ **5:129** हुडुङ्कारादिकं ] *em.*; हुन्त्रुकारादिक हिन्नें (?) A; हुंद्रुंकारादिकं नित्यं C; हुंहुंकारादिकं नित्यं $E_N$ **5:129** मुखवाद्याट्टहासताम् ] $CE_N$; मुख --- A

त्रिकालञ्चैव कुर्वाणः स भवेदुत्तमो गणः॥ 5:129॥

एककालं द्विकालं वा त्रिष्कालं वापि नित्यशः।
ये स्मरन्ति विरूपाक्षं विज्ञेयास्ते गणेश्वराः॥ 5:130॥

षष्टितीर्थसहस्राणि षष्टिकोटिस्तथैव च।
लिङ्गप्रणामस्यैकस्य कलां नार्घन्ति षोडशीम्॥ 5:131॥

एको ऽपि लिंगे सुकृतप्रणामी दशाश्वमेधादधिकानि योगात्।
दशाश्वमेधी पुनरभ्युपैति लिङ्गप्रणामी त्वपुनर्भवो हि॥ 5:132॥

एवं यः पूजयेदज्ञः शिवदीक्षाविवर्जितः।
तस्येदं फलमुद्दिष्टं निर्वाणं दीक्षितस्य तु॥ 5:133॥

श्रुतमेतन्मया विप्रा देव्यै कथयतो हरात्।
मयापि वः समाख्यातं सत्यमीशानभाषितम्॥ 5:134॥

ऋषय ऊचुः।
किं लिङ्गस्य हि माहात्म्यं त्वया यदिति वर्णितम्।
कृत्वा चैव फलं ब्रूहि यः करोति दिने दिने॥ 5:135॥

नन्दिकेश्वर उवाच।

---

**5:129** त्रिकालञ्चैव कुर्वाणः ] C; तृकालञ्चैव कुर्वाण A; त्रिष्कालञ्चैव कुर्वाणः $E_N$ **5:130** एककालं वापि ] $CE_N$; एककाल वापिA **5:130** त्रिष्कालं वापि ] C; तृष्कालं वापि A; त्रिकालंवापि $E_N$ **5:131** षष्टितीर्थसहस्राणि ] $E_N$; षष्ठित्तीर्थसहस्राणि A; षष्ठिन्तीर्थे सहस्राणि C **5:131** षष्टिकोटिस्तथैव च ] *conj.*; षष्ठिं कोटिस्तथैव च A; षष्टिकोत्यस्तथैव च C; षष्टिकोत्यस्तथैव च $E_N$ **5:131** लिङ्गप्रणामस्यैकस्य ] $E_N$; लिङ्गप्रमाणसमेकस्य A; लिङ्गप्रसौमस्यैकस्य (?) C **5:131** कलां नार्घन्ति षोडशीम् ] C; कला नार्घन्ति षोडशीम् A; कलान्नार्गन्ति षोडशीं $E_N$ **5:132** सुकृतप्रणामी ] C; सुकृतः प्रण --- A; सुकृतः प्रणामो $E_N$ **5:132** दशाश्वमेधादधिकानि योगात् ] C; --- कानि योगात् A; दशाश्वमेधादधिको नियोगात् $E_N$ **5:132** पुनरभ्युपैति ] $AE_N$; पुनरभ्यपैति C **5:132** त्वपुनर्भवो ] $CE_N$; त्वपुनभवो A **5:133** पूजयेदज्ञः ] $AE_N$; पूजयेत्तज्ञः C **5:133** तु ] $AE_N$; च C **5:134** श्रुतमेतन्मया ] $AE_N$; श्रुतमेतत्मया C **5:134** वः समाख्यातं ] $CE_N$; व समाख्यात A **5:134** सत्यमीशानभाषितम् ] *em.*; सत्यमीशान --- म्सा; सत्यमीश्वरभाषितम् $CE_N$ **5:135** ऋषय ऊचुः ] $E_N$; --- चु A; ऋषय ऊचु C **5:135** माहात्म्यं ] $CE_N$; माहात्म्य A **5:136** नन्दिकेश्वर ] $AE_N$; नन्दीकेश्वर C

ब्रह्माब्रवीदहं कर्त्ता तथैवाह गदाधरः।
इत्येवं वदतोरग्रे प्रादुरासीज्जले विभुः॥ 5:136॥

तेजोमध्ये स्थितं लिङ्गं पर्वाङ्गुष्ठप्रमाणकम्।
उभौ तौ विस्मितौ तत्र किञ्चेदमिति चाहतुः॥ 5:137॥

उभौ तौ द्रष्टुमारब्धौ वर्द्धमानस्ततो विभुः।
आश्चर्यमिति सञ्चिन्त्य अध ऊर्द्ध्वङ्गतावुभौ॥ 5:138॥

अधो गतस्ततो विष्णुरूर्द्ध्वं ब्रह्मा जगाम च।
अन्तश्चास्य न पश्यन्तौ खिन्नावेतौ सुरोत्तमौ॥ 5:139॥

पुनश्चैव समागम्य स्तोत्रैस्तुष्टुवतुर्हरम्।
ततस्तुष्टो महादेवो ब्रह्माणमिदमब्रवीत्॥ 5:140॥

स्वरूपं दिव्यमास्थाय सर्वलोकनमस्कृतम्।
किमिच्छसि वरं विप्र ब्रूहि यत्ते ऽभिकांक्षितम्॥ 5:141॥

एवंवादिनि देवेशे ब्रह्मा पप्रच्छ केशवम्।
वरं किं याचयाम्येनं देवदेवञ्जगत्पतिम्॥ 5:142॥

अवादीन्माधवस्तस्मै पुत्रत्वं याचय द्रुतम्।
यदा ते सम्भवेत्पुत्रो भवानेव तदा प्रभुः॥ 5:143॥

---

**5:136** °ब्रवीदहं ] A; ब्रतीत्यहं C; ब्रवीत्यहं $E_N$ **5:136** तथैवाह ] AC; तथैवाहः $E_N$ **5:136** इत्येवं ] $CE_N$; इत्येव $E_N$ **5:136** विभुः ] A; प्रभुः $CE_N$ **5:137** तेजोमध्ये ] $AE_N$; तेजोमध्य C **5:137** पर्वाङ्गुष्ठ° ] $CE_N$; पर्वागुष्ठ° A **5:137** उभौ तौ विस्मितौ तत्र किञ्चेदमिति चाहतुः ] $CE_N$; --- तत्र किचेदमि वाहतु A **5:138** द्रष्टुमारब्धौ ] A; द्रष्टमारब्दौ C; दुष्टुमारब्धौ $E_N$ **5:138** वर्द्धमानस्ततो विभुः ] AC; वर्द्धमानं ततो विभुं $E_N$ **5:138** आश्चर्यमिति सञ्चिन्त्य अध ] $E_N$; आश्चयमिति सञ्चिन्त्य अधर्म A; आ-चर्यमिति संचिन्त्य अध C **5:139** गतस्ततो विष्णुरूर्द्ध्वं ब्रह्मा ] $CE_N$; गतास्ततो विष्णु उर्द्ध ब्रह्म A **5:139** पश्यन्तौ ] $CE_N$; पश्येतौ A **5:139** खिन्नावेतौ ] AC; क्षिता-वेतौ $E_N$ **5:139** सुरोत्तमौ ] $AE_N$; सुचोत्तमौ C **5:140** स्तोत्रैस्तुष्टुवतुर्हरम् ] $CE_N$; स्तोत्रैस्तुष्टुवतु --- म्सा **5:140** ततस्तुष्टो ] $CE_N$; --- A **5:141** स्वरूपं ] $CE_N$; स्व-रूप A **5:141** किमिच्छसि ] $CE_N$; किमिच्छस्व A **5:142** ब्रह्मा ] $CE_N$; ब्रह्म A **5:143** तस्मै ] $AE_N$; तस्मे C **5:143** पुत्रत्वं ] AC; पुत्रस्त्वं (त्वं) $E_N$ **5:143** यदा ते सम्भवेत्पुत्रो भवानेव ] C; --- ता ⏓ ⏓ व A; यदा ते शम्भवे पुत्रो भवते वा $E_N$

तथैवाह तथा ब्रह्मा पुत्रो मे भव इत्यमुम्।
तथास्त्वित्यब्रवीद्देवः किंत्वपूज्यो भविष्यसि॥ 5:144॥

अनानुरूपं यस्माद्धि वरं ते कांक्षितं द्विज।
तथैवमुक्तो देवेन विषण्णवदनः स्वभूः॥ 5:145॥

शार्ङ्गिणं शापयामास क्रोधसंरक्तलोचनः।
भवन्तं ये ऽर्चयिष्यन्ति ते यान्तु निरयं ध्रुवम्॥ 5:146॥

ब्रह्मणाथैवमुक्तस्तु विष्णुराह महेश्वरम्।
इत्थं शप्तो ऽस्मि देवेश ब्रह्मणा परमेष्ठिना।
उपायो ऽस्ति यदीशान तद्भवान् वक्तुमर्हति॥ 5:147॥

देवदेव उवाच।
पितेत्युक्तो मया ह्येष न तस्य वितथं वचः।
किन्तु क्षीणयुगे घोरे सुगतस्त्वं भविष्यसि॥ 5:148॥

तस्मिन्त्वां ये ऽर्चयिष्यन्ति मूढाः पण्डितमानिनः।
ते यान्ति निरयं घोरं अन्ये यान्तु परां गतिम्॥ 5:149॥

विष्णो ददामि ते वत्स वरमिष्टं वदस्व मे।
मम वाक्यममिथ्या हि ब्रूहि यत्ते ऽभिकांक्षितम्॥ 5:150॥

विष्णुरुवाच।

---

**5:144** ब्रह्मा ] $CE_N$; ब्रह्म A **5:144** तथास्त्वित्यब्रवीद्देवः ] C; तथास्त्वित्यब्रवीद्देव A; तथास्मि (स्त्वित्व) त्यब्रवीद्देवः $E_N$ **5:145** अनानुरूपं यस्माद्धि ] A; अनुरूपन्न यस्माद्धि $CE_N$ **5:145** द्विज ] C; द्विजः $AE_N$ **5:145** तथैवमुक्तो ] A; अथैवमुक्तो C; अथैवमुक्तो $E_N$ **5:145** विषण्णवदनः ] $CE_N$; विषण्णवदन A **5:146** क्रोधसंरक्तलोचनः ] $CE_N$; क्रोधसंरक्तलोचनम् A **5:146** °यिष्यन्ति ते यान्तु निरयं ध्रुवम् ] $CE_N$; यिष्य --- A **5:147** ब्रह्मणाथैवमुक्तस्तु ] C; ब्रह्मणेनैवमुक्तस्तु A; ब्रह्मणाप्येवमुक्तस्तु $E_N$ **5:147** इत्थं ] $CE_N$; इथं A **5:147** तद्भवान् वक्तुमर्हति ] C; तद्भवां वक्तुमर्हसि A; स भवान् वक्तुमर्हति $E_N$ **5:148** तस्य वितथं वचः ] C; तस्य वितथ वच A; तथ्यं वितथं वचः $E_N$ **5:148** क्षीणयुगे ] $AE_N$; क्षीणे युगे C **5:149** तस्मिन्त्वां ये ऽर्चयिष्यन्ति मूढाः पण्डितमानिनः ] C; यस्मिं त्वं ये ऽर्च --- तमानिनः A; तस्मिंस्त्वां ये ऽर्चयिष्यन्ति मूढाः पण्डित मानिनः $E_N$ **5:149** ते यान्ति निरयं घोरं अन्ये ] A; ते यान्तु निरयं घोरमन्ये $CE_N$

यदि तुष्टो ऽसि मे देव वरं दातुमिहेच्छसि।
त्वद्भक्तस्त्वत्प्रियश्चैव भविष्यामि न संशयः॥ 5:151॥

महेश्वर उवाच।
एवं भवतु भद्रन्ते रुद्रनारायणी प्रजा।
आवयोरन्तरं नास्ति मरुदंबरयोरिव॥ 5:152॥

एष एव हि लिङ्गो हि स्थापितं ब्रह्मविष्णुना।
इन्द्रादिभिः सुरैर्दैत्यैः सयक्षोरगराक्षसैः॥ 5:153॥

सिद्धैर्विद्याधरैर्भूतैरप्सरोगणकिन्नरैः।
पिशाचैर्ग्रहनक्षत्रैस्तथैव मुनिसत्तमैः॥ 5:154॥

संपूज्य वरदं देवं वरं लब्ध्वा तु रेमिरे।
सर्वकामप्रदो लिङ्ग एष उक्तो मयानघाः॥ 5:155॥

ब्रह्मोपेन्द्रमहेन्द्रनागमुनयो यक्षाः सविद्याधराः
संसारार्णवदुःखभीतमनसो लिंगार्चने तत्पराः।
भक्तिप्रह्वधिय स्तुवन्त्यहरहः कृत्वाञ्जलिं मस्तके
ये मर्त्या न नमन्ति तं सुरगुरुं ते घ्नन्ति स्वं मुष्टिभिः॥ 5:156॥

---

**5:151** दातुमिहेच्छसि ] $CE_N$ ; दातुमेहेशुसि A **5:151** त्वद्भक्तस्त्वत्प्रियश्चैव ] $CE_N$ ; त्वद्भक्तः त्वत्प्रियश्चैव A **5:152** महेश्वर उवाच ] $CE_N$ ; --- A **5:152** °नारायणी प्रजा ] $CE_N$ ; °नारायणो प्रजाः A **5:152** आवयोरन्तरं ] $CE_N$ ; आवयोरन्तर A **5:152** मरुदंबरयोरिव ] *conj. Acharya*; वरदंबरयोरिव A; मरुवंवरयोरिव C; मेरुदुम्बरयोरिव $E_N$ **5:153** स्थापितं ] A; स्थापितो $CE_N$ **5:153** सुरैर्दैत्यैः ] $E_N$ ; सुरैदैत्यैः AC **5:154** सिद्धै विद्याधरै भूतैरप्सरोगणकिन्नरैः ] $CE_N$ ; सिद्धैर्विद्याधरैर्भूतै साप्सरोगणकिंनरैः A **5:154** पिशाचैर्ग्रहनक्षत्रैस्तथैव मुनिसत्तमैः ] C; पिशाचैन्ग्रहनक्षत्रैस्त --- A; पिशाचैर्नेहनक्षत्रैस्तथैव मुनिसत्तमैः $E_N$ **5:155** वरं लब्ध्वा तु रेमिरे ] $E_N$ ; वर लब्धा तु रेमिरे A; वर लब्धा तु रे ⊔ C **5:155** सर्वकामप्रदो लिङ्ग एष उक्तो मयानघाः ] C; सर्वकामप्रदो लिङ्गो एष उक्तो मयानघः A; सर्वकामप्रदोलिङ्ग एष उक्तो मयानघाः $E_N$ **5:156** ब्रह्मोपेन्द्र° ] $CE_N$ ; ब्रह्मेपेन्द्र° A **5:156** यक्षाः ] $CE_N$ ; यक्षा A **5:156** सविद्याधराः ] CA; सविद्याधरा $E_N$ **5:156** मनसो लिंगार्चने ] AC; मनसोलिङ्गार्चने $E_N$ **5:156** कृत्वाञ्जलिं ] $CE_N$ ; कृत्वाञ्जलि A **5:156** ये मर्त्या न नमन्ति तं सुरगुरुं ] $CE_N$ ; --- रगुरुं A **5:156** स्वं ] *em.*; स्व A; सं C; खं $E_N$

॥ ⊗॥ इति शिवधर्म्मसंग्रहे पञ्चमो ऽध्यायः॥ ⊗॥

ऋषय ऊचुः।
कृतस्यैव तु लिंगस्य स्थापितस्य तु यत्फलम्।
प्रत्यहं कुरुते यस्तु किन्तस्यापि फलं भवेत्॥ 6:1॥

नन्दिकेश्वर उवाच।
क्रीडन्तो ऽपि च ये बाला लिङ्गं कुर्वन्ति पांशुना।
लभन्ते राज्यमेकान्ते निस्सपत्नमकण्टकम्॥ 6:2॥

प्रत्यहम्विधिहीनं तु लिङ्गं यः कुरुते नरः।
केवलम्भक्तिमालम्ब्य शृणु तस्यापि यत्फलम्॥ 6:3॥

धनं भोग्यं तथा राज्यं यः कृत्वा पूजयेत्सदा।
लिङ्गं पूजयिता नित्यं महतीं श्रियमश्नुते॥ 6:4॥

सहस्रमर्च्चयन्विद्वान्निरयं तु न पश्यति।
रुद्रलोकमवाप्नोति भुक्त्वा भोगाननिन्दितान्॥ 6:5॥

लक्षं तु कुरुते यस्तु तस्यैकं ज्वलति ध्रुवम्।
दृष्ट्वा लिङ्गं ज्वलन्तञ्च सिद्धो देवत्वमाप्नुयात्॥ 6:6॥

लक्षैर्द्दशभिरिन्द्रत्वं स्कन्दं विंशतिभिः स्मृतम्।

---

**5:156** इति शिवधर्म्मसंग्रहे पञ्चमो ऽध्यायः ] $CE_N$; इति शिवधर्म्मसंग्रहे पुष्पविधिलिंगोत्पत्तिः पञ्चमो ऽध्यायः पटलः A **6:1** ऊचुः ] $E_N$; ऊचु A; उवाच C **6:1** भवेत् ] $AE_N$; लभेत् C **6:2** नन्दिकेश्वर उवाच ] $E_N$; नन्दिकेश्व --- A; नन्दीकेश्वर उवाच C **6:2** क्रीडन्तो ऽपि ] $CE_N$; --- ⏑̱ A **6:2** राज्यमेकान्ते ] $AE_N$; राजमेकान्ते C **6:2** निस्सपन्नमकण्टकम् ] $CE_N$; निसपतमकण्टकम् A **6:3** लिङ्गं यः कुरुते नरः ] $CE_N$; लिङ्ग य कुरुते नरः A **6:3** °मालम्ब्य ] $AE_N$; °मालम्ब्यं C **6:4** यः कृत्वा पूजयेत् ] $CE_N$; य --- A **6:4** लिङ्गपूजयिता ] A; लिङ्गं पूजयिता $CE_N$• नित्यं महतीं ] $E_N$; नित्यं महती A; नित्य महती C **6:5** सहस्रमर्चयन्विद्यान् ] $CE_N$; सहस्रमर्चयं विद्या A **6:5** निरयं तु न ] A; निरयन्न तु $CE_N$ **6:5** भुक्त्वा भोगाननिन्दितान् ] C; भुक्त्वा भोगाननिन्दितां A; भुक्त्वाभोगाननिन्दितान् $E_N$ **6:6** तस्यैकं ज्वलति ] C; तस्यैकं ज्वलिति A; तस्यैको ज्वलति $E_N$ **6:6** ज्वलन्तञ्च ] $CE_N$; ज्वल --- A **6:6** सिद्धो देवत्वमाप्नुयात् ] C; --- A; सिद्धे देवत्वमाप्नुयात् $E_N$ **6:7** लक्षैर्द्दशभिरिन्द्रत्वं ] $E_N$; लक्षै दशभिरिन्द्रत्वं A; लक्षैर्दशभिरिन्द्रत्व C **6:7** स्कन्दं ] $CE_N$; कन्धं A

त्रिंशल्लक्षैः मुरारित्वं रुद्रत्वं तु चतुर्गुणैः॥ 6:7॥

पञ्चगव्येन संमार्ज्य यदा लिङ्गं तु पूजयेत्।
अन्नलिङ्गञ्च कुर्वाणो लभते कामिकं फलम्॥ 6:8॥

गुडलिङ्गं समभ्यर्च्य परं सौभाग्यमाप्नुयात्।
कन्याशतपतिश्चैव प्रातिराज्येश्वरो भवेत्॥ 6:9॥

नारी च स्त्रीसहस्रेण सापत्नैः परिवारिता।
लभेत्सौभाग्यमतुलं सर्वेषामुपरि स्थिता॥ 6:10॥

रमते पुत्रपौत्रैस्तु सुखमानन्त्यमश्नुते।
अर्चयेन्नरनारी वा खण्डलिङ्गञ्च नित्यशः॥ 6:11॥

सितेन कृत्वा लिङ्गन्तु प्रत्यहं यः समर्चयेत्।
सर्वकामान्नवाप्नोति षड्भिर्मासैर्न संशयः॥ 6:12॥

नवनीतमये लिङ्गे लभते चेप्सितं फलम्।
षण्मासेनैव युक्तात्मा शिवलोकञ्च गच्छति॥ 6:13॥

प्रत्यहं पत्रलिङ्गन्तु यः कृत्वा तु समर्चयेत्।
लभेच्चोत्तममैश्वर्यं स भुंक्ते निरुजः सदा॥ 6:14॥

---

**6:7** त्रिंशल्लक्षैः मुरारित्वं ] *em.*; त्रिंशलक्षैः सुरारित्व A; त्रिंशल्लक्षैः सरारित्वं C; त्रिंशल्लक्षैर्म्मुरारित्वं $E_N$ **6:7** रुद्रत्वं तु चतुर्गुणैः ] *em.*; रुद्रत्वं तु चतुगुणैः A; रुद्रत्व तु चतुर्गुणैः C; रुद्रत्वं तु चतुर्गुनः $E_N$ **6:8** पञ्चगव्येन संमार्ज्य ] AC; पञ्च गव्येन संयोज्य $E_N$ **6:8** अन्नलिङ्गञ्च कुर्वाणो लभते कामिकं फलम् ] C; अन्नलिङ्गञ्च कुवाणो लभत्ते कामिक फलम् A; अन्ते (न्नैः) लिङ्गञ्च कुर्वणो लभते कामिकं फलं $E_N$ **6:9** गुडलिङ्गं ] $CE_N$; गुडलिङ्ग A **6:9** कन्याशतपतिश्चैव ] $CE_N$; --- व A **6:9** प्राति° ] AC; प्रति° $E_N$ **6:10** नारी च स्त्रीसहस्रेण सापत्नैः परिवारिता ] $CE_N$; वरस्त्रीभिः सहस्रेण सापनैः पंरिवारिता A **6:10** लभेत् ] $CE_N$; ⌣ भेत् A **6:10** स्थिता ] $CE_N$; स्थिताः A **6:11** रमते पुत्रपौत्रैस्तु ] $E_N$; लभते पुत्रपौत्रस्तु A; पमते पुत्रपौत्रेषु C **6:11** सुखमानन्त्यमश्नुते ] $CE_N$; सुखश्चामंनमश्नुते A **6:11** अर्चयेन्नरनारी ] $CE_N$; अर्चये नरनारी A **6:11** खण्ड° ] AC; खड्ग° $E_N$ **6:12** सितेन कृत्वा लिङ्गन्तु ] $E_N$; सितेन कृत्वा ⊔ A; शितेन कृत्वा लिङ्गन्तु C **6:12** प्रत्यहं यः समर्चयेत् ] $CE_N$; --- त् A **6:12** षड्भिर्मासैर्न ] $CE_N$; षड्भिर्मासैन A **6:13** नवनीतमये लिङ्गे ] AC; नवनीतमयं लिङ्गं $E_N$ **6:13** शिवलोकञ्च ] A; शिवलोकं स $CE_N$ **6:14** पत्रलिङ्गन्तु ] AC; यत्र लिङ्गन्तु $E_N$ **6:14** तु समर्चयेत् ] A; सम्यगर्चयेत् $CE_N$ **6:14** लभेच्चोत्तममैश्वर्यं ] $CE_N$; लभेच्चोत्तममैश्वयं $E_N$ **6:14** स भुंक्ते ] C; स भुक्ते A; स भुङ्क्ते° $E_N$

पृथिव्यामाधिपत्यञ्च पुष्पलिङ्गस्य पूजनात्।
लभते निःसपत्नन्तु भुङ्क्ते चैव ददाति च॥ 6:15॥

लावणेन तु लिंगेन भवेत्सौभाग्यमुत्तमम्।
नित्यैश्वर्यमखण्डञ्च प्रत्यहं यो ऽभिपूजयेत्॥ 6:16॥

सच्चकेन तु लिङ्गनि पार्थिवानि तु कारयेत्।
सहस्रपूजनात्सो हि लभते चेप्सितं फलम्।
लक्षेणैकेन गणतां कोव्यामभ्यर्च्य गच्छति॥ 6:17॥

दधीचिरुवाच।
किं फलम्बालुकालिङ्गस्यार्च्चनादपि किं भवेत्।
कथं वा पूजयेत्कर्म व्रतञ्चैव कथम्भवेत्॥ 6:18॥

महेश्वर उवाच।
शृणु मे कथयिष्यामि बालुकालिङ्गमर्चनम्।
व्रतञ्च ब्रह्मचर्यञ्च जितक्रोधो जितेन्द्रियः॥ 6:19॥

अर्च्चितानां नदीं गत्वा बालुकां शोध्य यत्नतः।
अभ्युक्ष्य गन्धतोयेन मन्त्रयुक्तेन बुद्धिमान्॥ 6:20॥

प्रतिलिङ्गं शुभं कृत्वा सुसंपूर्ण्णं सुलक्षणम्।
ताम्रं वा दन्तिकाशृङ्गं काष्ठेनापि च शोभनम्॥ 6:21॥

बालुकां पूरयित्वा च बीजमन्त्रसमन्विताम्।
सद्योजातेन देवेन तद्भूम्यां परिशोधयेत्॥ 6:22॥

वामदेवेन शोध्येत बालुका येन यत्नतः।
अघोरेण तु देवेन सिञ्चेच्चत्वारि वारिणा॥ 6:23॥

---

**6:15** पुष्पलिङ्गस्य पूजनात् ] CE$_N$; पु --- A **6:15** लभते निःसपत्नन्तु ] E$_N$; लभते निसपनं तु A; लभते निःपत्नन्तु C (unmetrical) **6:15** चैव ] E$_N$; चै ⏓ A; चे-व C **6:16** लावणेन ] C; लवणेन AE$_N$ **6:16** नित्यैश्वर्य° ] CE$_N$; नित्यैश्वय° A **6:17** सच्चकेन ] C; सचकेन A; सङ्कक्तेन E$_N$ **6:17** पार्थिवानि ] CE$_N$; पार्थियवानि A **6:17** सो हि ] A; सो ऽपि CE$_N$ **6:17** कोव्यामभ्यर्च्य गच्छति ] *em.*; कोव्या माहात्म्यमर्च्छति C; मभ्यर्च्य गच्छ --- A; कोव्या माहात्म्यमृच्छति E$_N$ **6:19** °मर्चनम् ] *conj.*; °मर्च्चयेत् C **6:21** सुसंपूर्ण्णं ] C; सुसंपूर्ण E$_N$

तत्पुरुषेण देवेन प्रतिलिङ्गानि मन्त्रयेत्।
ईशानेन तु देवेन बालुकां परिपूरयेत्॥ 6:24॥

भगवन्पञ्चब्रह्मेण प्रतिष्ठाप्य हृदा तथा।
अनेनैव तु मन्त्रेण पूजयित्वा सदाशिवम्॥ 6:25॥

करन्यासान्तःकरणं षडध्वाङ्गञ्च शोधनम्।
कृत्वा चासनसान्नैध्यं शक्तिशंभुं ततो ऽर्चयेत्॥ 6:26॥

होमकर्म च जाप्यञ्च साधनम्मन्त्रमेव च।
शान्तिकं पौष्टिकारोग्यं वश्याकर्षणकामदम्॥ 6:27॥

अनेनैव तु मन्त्रेण सिद्ध्यते साधनाद्बुधः।
शुचौ प्रतिष्ठितं लिङ्गमेकैकं बालुकान्नरः॥ 6:28॥

अहोरात्रकृतैः पापैर्मुच्यते नात्र संशयः।
पञ्चरात्रकृतात्पापान्मुच्यते द्विकृतार्च्चनात्॥ 6:29॥

दशरात्रकृतात्पापान्मुच्यते त्रिःकृतार्चनात्।
विंशद्रात्रकृतं पापञ्चतुर्लिङ्गेन मुच्यते॥ 6:30॥

पञ्चकृत्वार्च्चनो यस्तु मुक्तः पञ्चोपपातकात्।
सर्वशान्तिकमाप्नोति षट्कृतं लिङ्गमर्च्चनात्॥ 6:31॥

पुष्टिकार्थी लभेत्पुष्टिं सप्तकृत्वार्च्चनाद्द्विजः।
अष्टप्रतिष्ठिताल्लिङ्गाद्बालुकाविकृतान्नरः॥ 6:32॥

---

**6:24** प्रति लिङ्गानि मन्त्रयेत् ] C; प्रतिलिङ्गाभिमन्त्रयेत् $E_N$ **6:24** ईशानेन ] $E_N$; इशानेन C **6:24** बालुकां ] $E_N$; बालुका C **6:26** षडध्वाङ्गञ्च ] C; षडर्ध्वाङ्गञ्च $E_N$ **6:26** चासनसान्नैध्यं ] $E_N$; चासनसानैध्यं C **6:26** शक्तिशंभुं ] C; शक्तिं शंभुं $E_N$ **6:27** होमकर्म च ] $E_N$; होमं कर्म च C **6:27** शान्तिकं पौष्टिकारोग्यं ] C; शान्तिकापौष्टिकारोग्यं $E_N$ **6:28** शुचौ ] C; गुरौ $E_N$ **6:28** बालुकान्नरः ] $E_N$; बालुकं नरः C **6:29** °पान्मुच्यते ] $E_N$; °पात् मुच्यते C **6:30** °पान्मुच्यते त्रिःकृतार्चनात् ] $E_N$; °पात् मुच्यते त्रिकृतार्चनात् C **6:30** विंशद्रात्रकृतं पापञ्चतुर्लिङ्गेन ] C; विंशद्रात्रकृतंपापं चतुर्लिङ्गं न $E_N$ **6:31** पञ्चकृत्वार्च्चनो यस्तु मुक्तः ] C; पञ्चकृत्वार्चनो यस्तु मुक्ता $E_N$ **6:31** षट्कृतं ] C; षट् कृतं $E_N$ **6:32** सप्तकृत्वार्च्चनाद्द्विजः ] C; सप्तकृत्वार्च्चनाद् द्विजः $E_N$ **6:32** अष्टप्रतिष्ठिताल्लिङ्गाद् ] C; अष्टप्रतिष्ठितं लिङ्गं $E_N$

इच्छाकाममवाप्नोति सर्वरोगविवर्जितः।
अष्टाविंशं प्रतिष्ठाप्य बालुकेन तु यो नरः॥ 6:33॥

सर्वपापैः प्रमुच्येत सर्ववित्स भवेत्ततः।
शुद्धस्फटिकसाहस्रजापी विघ्नैः प्रमुच्यते॥ 6:34॥

शते प्रतिष्ठिते लिङ्गे रुद्रकोटीर्जपेत्फलम्।
सहस्रं तत्प्रतिष्ठाप्य जाप्यकोटीसहस्रिकम्॥ 6:35॥

लभेच्च लक्षलिङ्गेन रुद्रस्य चतुरो महत्।
कोटीप्रतिष्ठिते लिङ्गे मनोमयपरं पदम्॥ 6:36॥

निष्कण्टकं पुत्रपौत्रं राज्यप्राप्तिः शताधिका।
ओं रुद्राक्षं मा भव शिव स्वाहा सर्वाङ्गसंयुतम्॥ 6:37॥

पताकाधूपसंयुक्तं बालुकालिङ्गमर्च्चनम्।
एतत्पुरा मया ख्यातं न देयं यस्य कस्यचित्॥ 6:38॥

स्वशरीरेण सायोज्यं पुनश्च न निवर्त्तते।
एतान्येव समभ्यर्च्य सदेवासुरमानुषाः॥ 6:39॥

सर्वकामसमृद्धाश्च सर्वदुःखविवर्जिताः।
ईश्वरस्य प्रसादेन प्रक्रीडंत्यणिमादिभिः॥ 6:40॥

अष्टेष्टकसमायुक्तं ये कुर्वन्ति शिवालयम्।
तावत्ते दिवि तिष्टन्ति यावदिन्द्राश्चतुर्दश॥ 6:41॥

---

**6:33** अष्टाविंशं ] C; अष्टाविंश° $E_N$ **6:34** °जापी ] C; °जापो $E_N$ **6:35** रुद्रकोटीर्ज° ] *em.*; रुद्रकोटीज° C; रुद्रकोटिज° $E_N$ **6:35** जाप्यकोटीसहस्रिकम् ] *em.*; जाप्यकोटीसहश्रिकम् C; जापकोटिसहस्रकम् $E_N$ **6:36** रुद्रस्य ] $C^c E_N$; रुस्य $C^{ac}$ (unmetrical) **6:36** मनोमय° ] C; मनामय° $E_N$ **6:37** शताधिका ] $E_N$; शताब्दिका C **6:37** ओं रुद्राक्षं ] C; अरुद्राय $E_N$ **6:38** कस्यचित् ] C; कस्य चित् $E_N$ **6:39** स्वशरीरेण सायोज्यं ] $CE_N$; --- सायुज्यं A **6:40** °विवर्जिताः ] $CE_N$; °विवर्ज्जिता A **6:40** प्रक्रीडंत्यणिमादिभिः ] AC; प्रक्रीडन्नणिमादिभिः $E_N$ **6:41** अष्टेष्टकसमायुक्तं ] *conj.*; अष्टेष्टकसमायुक्त A; अष्टेष्टकासमायुक्तं C; अष्टाष्टकसमायुक्तं $E_N$ **6:41** कुर्वन्ति ] $AE_N$; कुर्वीत C **6:41** चतुर्दश ] $CE_N$; चतुर्द्दशः A

मणिरत्नप्रवालानि स्फटिकमरकतानि च।
काचहेमजरौप्याणि ताम्रकांस्यानि यानि तु॥ 6:42॥

रैत्यलोहकसैस्यानि त्रापुषाणि तथैव च।
पुनश्चैतान्समभ्यर्च्य भुक्त्वा कामाञ्छिवं व्रजेत्॥ 6:43॥

न तस्य पुनरावृत्तिर्यो लिङ्गं स्थापयेद्भुवि।
कृत्वा प्रासादमध्ये तु स शिवो नात्र संशयः॥ 6:44॥

दशाम्रवापी नरकानतिघोरान्न पश्यति।
आरामस्य च यः कर्ता स्वर्ग्गे मोदति इन्द्रवत्॥ 6:45॥

प्लक्षादींश्च तथा वृक्षान्पथि कुर्वन्ति ये नराः।
छायाभिश्शीतलाभिश्च न ते यान्ति यमालयम्॥ 6:46॥

याम्यदुःखानि घोराणि न च तेषां भवन्ति हि।
वृक्षवापनधर्म्मो ऽयमेष ते परिकीर्त्तितः॥ 6:47॥

प्रासादं कारयित्वा तु विष्णुं ये स्थापयन्ति हि।
विष्णुलोकं व्रजन्त्येते मोदन्ते विष्णुना सह॥ 6:48॥

ब्रह्माणीस्कन्दरुद्राणीं मातॄन्गणपतिं रविम्।

---

**6:42** मणिरत्नप्रवालानि ] $E_N$; मणिर --- A; मनिरत्नप्रवालानि C **6:42** स्फटिकमरकतानि च ] *conj.* (unmetrical); --- मरकतानि च A; स्फटिकमरकतानि च C; स्फटिकं मरकतानि च $E_N$ (unmetrical) **6:42** °रौप्याणि ] $CE_N$; °रप्याणां A **6:43** °सैस्यानि ] $AE_N$; °शैस्यानि C **6:43** त्रापुषाणि ] C; त्रपुषाणि $AE_N$ **6:43** पुनश्चैतान् ] $CE_N$; पुनश्चैता A **6:43** कामाञ्छिवं व्रजेत् ] $E_N$; कामा सिवं व्रजेत् A; कामाच्छिवं व्रजेत् C **6:44** पुनरावृत्तिर्यो ] $CE_N$; पुनरावृत्ति यो A **6:45** दशाम्रवापी ] C; दशास्रवापी A; दशास्त्रवाणी $E_N$ **6:45** यः ] $CE_N$; य A **6:45** इन्द्रवत् ] A; रुद्रवत् $CE_N$ **6:46** प्लक्षादींश्च तथा वृक्षान् ] $E_N$; प्लक्षादींश्च तथा वृक्षात् C; पक्षादीश्च तथा वृक्षं A **6:46** न ते यान्ति ] $CE_N$; ये न यान्ति A **6:47** च तेषां भवन्ति हि ] $CE_N$; तेषां यु भवन्ति हि A **6:47** वृक्षवापनधर्म्मो ] Cf. NiMukh; वक्षवापनधर्म्मो A; वृक्षारोपणधर्मो $CE_N$ **6:47** परिकीर्त्तितः ] $CE_N$; परिकीर्त्तिताः A **6:48** प्रासादं कारयित्वा तु ] $E_N$; प्रासादं कारयित्वा --- A; प्रासाद कारयित्वा तु C **6:48** विष्णुं ये स्थापयन्ति हि ] $CE_N$; --- A **6:48** विष्णुलोकं व्रजन्त्येते मोदन्ते विष्णुना सह ] C; --- ष्णुलोक व्रजंत्येते मोदते विष्णुना सह A; विष्णुलोकं व्रजन्तेते मोदन्ते विष्णुना सह $E_N$ **6:49** ब्रह्माणीस्कन्दरुदाणीं ] $E_N$; ब्रह्मणस्कन्दरुदाणी A; ब्रह्मानीस्कन्दरुदाणी C **6:49** मातॄन् गणपतिं ] *conj.*; मातृं गणपतिं A; मातृगणपतिं C; मातृ गणपतिं $E_N$

वह्निं शतक्रतुं यक्षं वायुं धर्म्मं जलेश्वरम्॥ 6:49॥

यो यं स्थापयते धीमान्प्रासादे च सुशोभने।
पूजयेत्परया भक्त्या स मृतस्तत्पदं व्रजेत्॥ 6:50॥

अचंक्रमपथे यस्तु संक्रमं कारयिष्यति।
धर्मराजपथं सो हि सुपथेनैव गच्छति॥ 6:51॥

नदीं वैतरणीं घोरामुष्णतोयां महार्ण्णवाम्।
गम्भीरावर्त्तदुस्तारां सन्तरेत्संक्रमेण तु॥ 6:52॥

सेतुबन्धञ्च यः कुर्यात्कर्दमे पथि दारुणे।
धर्मराजपुरे मार्गे दुर्गमे स सुखं व्रजेत्॥ 6:53॥

पङ्कलेपश्च नरकस्तप्तत्रपुजतूनि च।
सन्तरेत्तानि घोराणि नदीमार्ग्गप्रदायकः॥ 6:54॥

मठस्यावसथस्यैव मण्डपस्य च कारकः।
त्यक्त्वा यमपुरं स्वर्ग्गे तस्य हेमगृहं भवेत्॥ 6:55॥

तप्ताङ्गारशिलावर्षे न भयन्तस्य जायते।
अन्नदाता नरो यो हि नासौ नरकमाप्नुयात्॥ 6:56॥

अक्षयं सुखमाप्नोति ब्रह्मलोकगतो नरः।

---

**6:49** यक्षं वायुं धर्म्मं ] AE$_N$; यक्ष वायु धर्मं C **6:50** धीमान् ] CE$_N$; धीमां A **6:50** पूजयेत् ] CE$_N$; पूजेत् A (unmetrical) **6:50** स मृतस्तत्पदं ] CE$_N$; संमृतस्त-त्पदं A **6:51** अचंक्रमपथे ] AC; असंक्रमपथे E$_N$ **6:51** कारयिष्यति ] CE$_N$; यः प्रकुर्वति A **6:51** धर्मराजपथं ] CE$_N$; --- A **6:51** सो हि ] A; सो ऽपि CE$_N$ **6:52** नदीं वैतरणीं घोरामुष्णतोयां ] E$_N$; नदी वैतरणी घोरामुष्णतोया A; नदीं वैतरणी घोरां उष्णतोयां C **6:52** सन्तरेत्संक्रमेण तु ] *em.*; स तरेत्संक्रमेण तु A; सत्तरेत्संक्रमेण तु C; सन्तरेत्स क्रमेण तु E$_N$ **6:53** कुर्यात् ] CE$_N$; कुर्या A **6:53** स सुखं ] CE$_N$; सुखसं A **6:54** पङ्कलेपश्च नरकस्तप्तत्रपुजतूनि च ] C; पङ्कलेपश्च नरकस्तप्तत्रपुजंतूनि च A; पङ्कलेपश्च नरकस्तप्तत्र पुजनूनि च E$_N$ **6:54** सन्तरेत्तानि घोराणि ] C; सन्तरेत्तानि घो --- A; सन्तरेहानि घोराणि E$_N$ **6:54** नदीमार्ग्गप्रदायकः ] CE$_N$; --- यकः A **6:55** हेमगृहं ] N; हेमपुरं CE$_N$ **6:56** तप्ताङ्गारशिलावर्षे न ] *conj.*; तप्ताङ्गारशिलाव-र्षान्न C; तप्ताङ्गारशिलावर्ष न A; तप्ताङ्गारशित्लावर्षान्न E$_N$ **6:56** अन्नदाता ] CE$_N$; अंनदात A

न तस्य संभवो मर्त्ये यावद्ब्रह्मा न नश्यति॥ 6:57॥

न चास्ति रैत्यकं दानमन्नदानात्परं प्रिये।
देहिनामन्नदानेन जीवन्दत्तं न संशयः॥ 6:58॥

यस्तु ग्रीष्मे प्रपां दद्यात्तृषार्ते पथिके जने।
ते तृप्ताः प्रेतभवने तृषाद्वंद्वविवर्जिताः॥ 6:59॥

देव्युवाच।
दरिद्रान्वीक्ष्य चेतो मे दीर्यते कृपया विभो।
किमकृत्वा दरिद्रः स्यादेतदाख्यातुमर्हसि॥ 6:60॥

भगवानुवाच।
तीर्थान्यगत्वा क्षितिहेमधेनुं कृष्णाजिनं कृष्णतिलान्न दत्वा।
त्रिवासरं चाप्यनुपोष्य जन्तुर्जायेत दारिद्र्यजराभिभूतः॥ 6:61॥

देव्युवाच।
किं तिलस्य च माहात्म्यं किन्तु कृष्णाजिनस्य वा।
सुवर्णस्य गवाञ्चैव भूदानस्य च मे वद॥ 6:62॥

भगवानुवाच।
नमुचिर्नाम दैत्येन्द्रं युद्धे वीक्ष्य पुराच्युतः।

---

**6:57** न तस्य संभवो मर्त्ये ] CE$_N$; न तस्य सम्भवं मर्त्ये A **6:57** यावद्ब्रह्मा न नश्यति ] CE$_N$; --- A **6:58** रैत्यकं दानमन्नदानात्परं प्रिये ] *em.*; रैत्यकन्दनमन्नदानात्पर प्रियम् A; न चास्ति रेत्यकं दानं मन्नदानात्परं प्रिये C; नैत्यकन्दानमन्नदानात्परं प्रिये E$_N$ **6:58** जीवन्दत्तं न ] E$_N$; जीवन्दत्त न A; जीवंदत्तन्न C **6:59** प्रपां दद्यात्तृषार्ते ] C; प्रपान्दद्या तृषात्ते A; प्रपान्दद्यातृषार्त्ते E$_N$ **6:59** ते तृप्ताः प्रेतभवने ] A; तृसप्तः प्रेतभवने C; स तृप्तः प्रेत भवने E$_N$ **6:59** तृषाद्वंद्वविवर्जिताः ] A; तृषद्वंद्वविवर्जितः CE$_N$ **6:60** दरिद्रान्वीक्ष्य चेतो मे ] C; दरिद्रवीक्ष्य चेतो मे A; दरिद्रान्वीक्ष्य चेतोमे E$_N$ **6:60** दीर्यते कृपया विभो ] CE$_N$; दीयत्ते कृपया विभो A **6:60** किमकृत्वा दरिद्रः स्यादेतदाख्यातुमर्हसि ] CE$_N$; कि --- ख्यातुमर्हसि A **6:61** तीर्थान्यगत्वा क्षितिहेमधेनुं ] C; तीर्थान्यगत्वा क्षितिहेमधेनु A; तीर्थात्यगत्वा क्षितिहेमधेनुं E$_N$ **6:61** कृष्णतिलान्न दत्वा ] E$_N$; कृष्णतिलं न दत्वा A; कृष्णतिलानदत्वा C **6:61** जन्तुर्जायेत ] CE$_N$; जंतुजायेत A **6:61** दारिद्र्यजराभिभूतः ] *em.*; दारिद्रजराभिभूतः A; दारिद्र्यरुजाभिभूतः CE$_N$ **6:62** तिलस्य च माहात्म्यं ] A; तिलस्य च माहात्म्य C; तिलस्यमाहात्म्यं E$_N$ **6:62** गवाञ्चैव भूदानस्य च मे वद ] CE$_N$; ग ⏑̆ --- A **6:63** नमुचिर्नाम दैतेन्द्रं ] CE$_N$; नमुचिनाम दैतेन्द्र A **6:63** पुराच्युतः ] AC; पुरा ऽच्युतः E$_N$

उद्वेजयन्तं गीर्वाणं क्रोधतामगमत्तदा॥ 6:63॥

क्रोधात्स्वेदलवास्तस्य निष्पेतुर्धरणीतले।
ते बभूवुस्तिलाः कृष्णास्तस्मात्ते पावनाः स्मृताः॥ 6:64॥

देवान्पितॄंसमुद्दिश्य यो ददाति तिलोदकम्।
तृप्यन्ति पितरस्तस्य वर्जिता नरकैस्त्रिभिः॥ 6:65॥

मेदोऽसृक्पूयगर्तेषु न निमज्जन्ति ते नराः।
पितरश्च विमुक्ताः स्युस्तिलोदकफलेन वै॥ 6:66॥

श्राद्धं कुर्वन्ति ये नित्यं पितृभक्ताश्च मानवाः।
तेषां तृप्ता हि पितरः स च तृप्तो यमालये॥ 6:67॥

कुम्भीपाकस्तु निरयो न तेषां प्रभविष्यति।
पितृलोकञ्च यास्यन्ति श्राद्धकारयिता नराः॥ 6:68॥

पितॄन्देवान्समुद्दिश्य नित्यं दीपप्रदायिनः।
तामिस्रश्चान्धतामिस्रौ नरकौ न भविष्यतः॥ 6:69॥

लोचने च शुभे तेषां दृक्शक्तिश्च न नश्यति।

---

**6:63** क्रोधतामगमत्तदा ] CE$_N$; क्रोधत्रा (?) म्रगमत्तदा A$^c$; क्रोधत्रा (?) म्रगमत्तमदा A$^{ac}$ (unmetrical) **6:64** क्रोधात्स्वेदलवास्तस्य ] CE$_N$; क्रोधा स्वेदलवाप्तस्य A **6:64** निष्पेतुर्धरणीतले ] *em.*; निष्पेतुद्धरणीतले AC; निष्पेतूर्द्धरणीतले E$_N$ **6:64** कृष्णास्तस्मात्ते ] E$_N$; कृष्णा तस्मात्ते A; कृष्णास्तस्मान्ते C **6:65** देवान्पितॄंसमुद्दिश्य ] *em.*; देवां पितॄं समुद्दिश्य A; देवान्पितॄन्समुदिश्य C; देवान् पितॄन् समभ्यर्च्य E$_N$ **6:65** तृप्यन्ति पितरस्तस्य ] CE$_N$; तृ --- A **6:65** त्रिभिः ] CE$_N$; तृभिः A **6:66** मेदोऽसृक्पूयगर्तेषु ] E$_N$; मेदोऽसृकूयगर्त्तेषु C **6:66** पितरश्च विमुक्ताः स्युस्ति° ] CE$_N$; पितरस्य विमक्तस्यस्ति° A **6:67** श्राद्धं ] CE$_N$; श्राद्ध A **6:67** नित्यं ] AE$_N$; गित्यं C **6:67** मानवाः ] C; मानवा A; ये नराः E$_N$ **6:67** तेषां तृप्ता हि पितरः ] E$_N$; तेषां तृप्ता हि पितर A; तेषा तृप्ति हि पितरः C **6:67** च तृप्तो ] AE$_N$; च तृप्ता C **6:68** कुम्भीपाकस्तु निरयो ] CE$_N$; कुम्भीपाकं तु निरये A **6:68** प्रभविष्यति ] CE$_N$; प्रभविष्य --- A **6:68** पितृलोकञ्च यास्यन्ति ] CE$_N$; --- यास्यन्ति A **6:68** श्राद्धकारयिता ] AC; श्राद्धं कारयिता E$_N$ **6:69** पितॄन्देवान्समुद्दिश्य ] *conj.*; पितॄं देवा समुदिश्य A; पितृदेवान्समुद्दिस्य C; पितृन् देवान् समुद्धिश्य E$_N$ **6:69** नित्यं दीपप्रदायिनः ] C; नित्यदीपप्रदायिनः A; नित्यं दीप प्रदायिनः E$_N$ **6:69** तामिस्रश्चान्धतामिस्रौ नरकौ न भविष्यतः ] *conj.*; तामिस्रौ चान्धतामिस्रौ नरकौ न भविष्यति A; तामिस्रश्चान्धतामिस्रो नरको न भविष्यतिः C; तामिस्रश्चान्धतामिस्रौ नरकौ न भविष्यतः E$_N$ **6:70** दृक्शक्तिश्च न ] AC; दृक्शक्तिश्चन E$_N$

उपानच्छत्रसंयुक्तं तिलपात्रं ददाति यः॥ 6:70॥

स्वच्छशीताम्बुपूर्णेन करकेण च संयुतम्।
द्विजेभ्यः शिवभक्तेभ्यस्स न याति यमालयम्॥ 6:71॥

विद्याधरपदं प्राप्य मोदते सुचिरं दिवि।
कालान्तरे यदा मर्त्यमागच्छति नरोत्तमः॥ 6:72॥

उदितोदितवंशे ऽस्मिन्जन्म तस्य भवेद्ध्रुवम्।
एतत्तिलस्य माहात्म्यं कथितं वरवर्णिनि॥ 6:73॥

कृष्णाजिनस्य माहात्म्यं कथयाम्यधुना शृणु।
यत्कृष्णं तदृचां रूपं यद्बभ्रु यजुषां स्मृतम्॥ 6:74॥

यच्छुक्लं तद्भवेत्साम्नां कृष्णसारस्य सुन्दरि।
अतस्तदजिनं पुण्यन्त्रैविद्येनाभ्यलंकृतम्॥ 6:75॥

तस्माद्देयं प्रयत्नेन कुम्भीनरकभीरुभिः।
अजिनन्तिलपूर्णं तु दद्याद्रौप्यमयं खुरम्॥ 6:76॥

हेमशृङ्गं सुचैलाङ्गं कांस्यदोहं द्विजन्मने।

---

**6:70** °संयुक्तं तिलपात्रं ददाति यः ] $E_N$; °संयुक्ततिलपात्रं ददाति यः C; °संयुक्तं तिलपात्र ददाति यः A **6:71** स्वच्छशीताम्बुपूर्णेन करकेण च संयुतम् ] *em.*; स्वच्छशीताम्बुपूर्णेन क --- A; स्वच्छशीताम्बुपूर्णेन करकेन च संयुतम् C; स्वच्छशीताम्बुपूर्णे नरकं न च संयुतं $E_N$ **6:71** द्विजेभ्यः शिवभक्तेभ्यस्स न ] *em.*; द्विजेभ्य शिवभक्तेभ्यस्स न A; द्विजेभ्यः शिवभक्तेभ्यो न स $CE_N$ **6:72** मर्त्यमागच्छति नरोत्तमः ] C; मर्त्यामागच्छन्ति नरोत्तमः A; मर्त्यमागच्छन्ति नरोत्तमाः $E_N$ **6:73** उदितोदितवंशे ऽस्मिन् जन्म ] $E_N$; उदितोदितवशे ऽस्मिं जन्म A; उदितोदितवंशो ऽस्मंज्ञन्म C **6:73** एतत्तिलस्य ] A; एतत् तिलानां $CE_N$ **6:73** वरवर्ण्णिनि ] AC; वर वर्ण्णिनि $E_N$ **6:74** कृष्णाजिनस्य माहात्म्यं कथयाम्यधुना शृणु ] C; कृष्ण --- म्यधुना शृणु A; कृष्णाजिनस्य माहात्म्यं कथयाम्य धुना शृणु $E_N$ **6:74** यत्कृष्णं तदृचां रूपं ] *em.*; यत्कृष्ण तदृचा रूपं A; यत्कृष्णं तदृचां रापं C; यत्कृष्णंतदृचां रूपं $E_N$ **6:74** यद्बभ्रु यजुषां स्मृतम् ] C; यद्बभ्रु यजुषा स्मृतम् A; यद् बभ्रं यजुषां स्मृतं $E_N$ **6:75** यच्छुक्लं तद्भवेत्साम्नां ] $E_N$; य शुक्लन्तद्भवेत्साम्ना A; यत्च्छुक्लत्तद्भवेत्साम्नां C **6:75** °भ्यलंकृतम् ] A; °भ्यलकृतम् C; °प्यलङ्कृतं $E_N$ **6:76** प्रयत्नेन कुम्भीनरकभीरुभिः ] $CE_N$; प्रयंनेंन पुंभि नरकभीरुभिः A **6:76** अजिनन्तिलपूर्णं तु दद्याद्रौप्यमयं खुरम् ] C; अजिनन्तिलपूर्णत्तु दद्याद्रौप्य --- A; अजिनं तिलपूर्णं तु दद्याद्रौप्यमयं क्षुरम् $E_N$ **6:77** हेमशृङ्गं सुचैलाङ्गं कांस्यदोहं द्विजन्मने ] *em.*; --- सुचैलाङ्गं कान्सदोहां द्विजन्मने A; हेमशृङ्ग सुचैलाङ्गं कांस्यदोहं द्विजातये C; हेमशृङ्गं सुचैलाङ्गं कांस्यदोहं द्विजातये $E_N$

चतुःसागरपर्यन्ता सशैलवनकानना॥ 6 : 77॥

दत्तानेन भवेत्पृथ्वी दत्वा त्रिभुवनेश्वरि।
अक्षयं लभते लोकन्तिलधेनुप्रदायकः।
युगान्ते च परिभ्रष्टो जायते पृथिवीपतिः॥ 6 : 78॥

भगवानुवाच।
भीतैस्तारकतः सुतस्सुरगणैर्मत्तः पुरा याचितः।
तद्धेतोः कृपया मया तु मदनादुत्पाद्यमाने सुते।
सत्तेजो ऽग्निरपादुपेत्य तदभूद्वह्नेः कुमारः प्रभुः।
तच्छेषं कनकं बभूव गिरिजे तेनातिपुण्यं स्मृतम्॥ 6 : 79॥

विप्रेभ्यः शिवभक्तेभ्यो मासि मासि तिलान्ददत्।
नानादुःखप्रदं घोरं नरकं न स पश्यति॥ 6 : 80॥

माधव्यां पञ्चदश्यां तु तिलान्मधुसमन्वितान्।
सप्तभ्यो वाथ पञ्चभ्यो ब्राह्मणेभ्यः सदक्षिणान्॥ 6 : 81॥

धर्मराजस्तु सुप्रीत इति दद्याद्वरं ध्रुवम्।
पापं विहाय स श्रीमान्निर्मलत्वं प्रजायते॥ 6 : 82॥

यमाय धर्म्मराजाय मृत्यवे चान्तकाय च।
वैवस्वताय कालाय सर्वलोकक्षयाय च॥ 6 : 83॥

---

**6:77** चतुःसागरपर्यन्ता सशैलवनकानना ] CE$_N$; चतुसागरपर्यन्तं सशैलवनकानना A **6:78** दत्तानेन भवेत्पृथ्वी दत्वा त्रिभुवनेश्वरि ] *em.*; दत्तानेन भवेत्पृथ्वी दत्वा त्रिभुवनेश्वरी C; दद्यात्तेन भवेत्पृथ्वी दत्त्वा तृभुवनेश्वरीं A; दत्ता तेन भवेत्पृथ्वी दत्ता त्रिभुवनेश्वरि E$_N$ **6:78** लोकन्तिलधेनुप्रदायकः ] CE$_N$; लोका तिलधेनोः प्रदायकः A **6:79** सुतस्सुरगणैर्मत्तः पुरा याचितः ] C; सु --- त्तः पुरा याचितः A; सुतः सुरगणैर्मत्तः पुरा याचित E$_N$ **6:79** मदनादुत्पाद्यमाने सुते ] C; मदनादुत्पाद्यमानो सुते A; मदना दुत्पाद्यमाने सुते E$_N$ **6:79** तच्छेषं कनकं बभूव गिरिजे ] C; तच्छेषं कनक षुभूव गिरिजे A; यच्छेषं कनकं बभूव गिरिजे E$_N$ **6:80** तिलान्ददत् ] CE$_N$; तिला ददत् A **6:80** नानादुःखप्रदं घोरं नरकं ] E$_N$; नाना --- रकं A; नानादुःखपदं घोरन्नरकं C **6:81** माधव्यां पञ्चदश्यां तु ] A; वैशाख्यां पञ्चदश्यान्तु C; वैशाख्यां पञचश्यान्तु E$_N$ **6:81** तिलान्मधुसमन्वितान् ] C; तिलां मधुसमन्वितम् A; तिलान्मधु समन्वितान् E$_N$ **6:81** सदक्षिणान् ] C; सदक्षिणाम् AE$_N$ **6:82** दद्याद्वरं ] CE$_N$; दद्यां नरो A **6:82** निर्मलत्वं ] AC; निर्म्मलश्च E$_N$ **6:83** मृत्यवे चान्तकाय च ] CE$_N$; --- च A

उग्रदण्डोग्रहस्ताय महिषासनगामिने।
शासित्रे च नमस्तुभ्यं नरकाधिपतये नमः॥ 6:84॥

एकैकस्य पदस्यापि तिलमिश्रञ्जलाञ्जलिम्।
त्रींस्त्रीन्कृष्णचतुर्दश्यां नदीङ्गत्वा तु निर्वपेत्॥ 6:85॥

हविष्यैकाशनः शान्तस्त्रयोदश्यां समाहितः।
आजन्मचरितं पापं दहत्याशु न संशयः।
युगान्ते च परिभ्रष्टो जायते पृथिवीपतिः॥ 6:86॥

भगवानुवाच।
गावः प्रजज्ञिरे पुण्या मथ्यमाने ऽमृते पुरा।
माननीया महाभागा देवानामपि नित्यशः॥ 6:87॥

तासां गात्रेषु सर्वेषु विबुधाः पर्यवस्थिताः।
तस्मात्पुण्यतमा ज्ञेयास्तासां दानाद्दिवं व्रजेत्॥ 6:88॥

हेमशृंगां रौप्यक्षुरां रत्नाङ्गीं कांस्यदोहिनीम्।
सचैलघण्टाङ्गान्दद्याच्छिवभक्तद्विजन्मने॥ 6:89॥

गोलोके स्वर्ग्गलोके वा वासस्तेषां भविष्यति।
सर्वद्वन्द्वविनिर्मुक्ता वसेयुर्गोप्रदायिनः॥ 6:90॥

---

**6:84** उग्रदण्डोग्रहस्ताय ] C; उग्रदण्डाय हस्ताय $E_N$ **6:84** नमस्तुभ्यं ] C; नमस्तु भ्यं $E_N$ **6:85** एकैकस्य पदस्यापि ] *em.*; एकैकस्य पदस्यपि A; एकैकस्य पदस्यास्य C; एकैकस्य प्रमादस्य $E_N$ **6:85** तिलमिश्रञ्जलाञ्जलिम् ] *conj.*; तिलमिश्रजलाञ्जलिम् A; तिलमिश्रं लाञ्जलिम् C (unmetrical); तिलमिश्रंजलाञ्जलिं $E_N$ **6:85** त्रींस्त्रीन्कृष्णचतुर्दश्यां ] C; त्रींस्त्रीन्कृष्णचतु ⏑̆ दश्यान् A; त्रिस्त्रिः कृष्णचतुर्द्दश्यां $E_N$ **6:85** नदिङ्गत्वा ] $CE_N$; नदि गत्वा A **6:86** हविष्यैकाशनः शान्तस्त्र° ] $E_N$; हविष्यैकाशन शान्त त्र° A; हविष्यकाशनः शान्तस्त्र° C **6:86** पापं ] $CE_N$; पापः A **6:86** जायते पृथिवीपतिः ] $CE_N$; --- A **6:87** मथ्यमाने ] $CE_N$; चक्ष्यमाने (?) A **6:88** पर्यवस्थिताः ] $CE_N$; पयवस्थिताः A **6:88** तस्मात्पुण्यतमा ज्ञेयास्तासां दानाद्दिवं ] C; तस्मा पुण्यतमा ज्ञेया तासां दाना दिवं A; तस्मात्पुण्यतमा ज्ञेयास्तासां दाने दिवं $E_N$ **6:89** रौप्यक्षुरां ] *em.*; रौप्यखुरां $E_N$; रौप्यक्षुरा (?) A; रोप्यखुरां C **6:89** कांस्यदोहिनीम् ] $CE_N$; --- A **6:89** सचैलघण्टाङ्गान्दद्याच्छिवभक्तद्विजन्मने ] $E_N$; --- ⏑̆ ⏑̆ घ ⏑̆ ⏑̆ गान्दत्य गिवभक्तिद्विजन्मने A; सचैलघण्तां गान्दद्याच्छिवभक्तद्विजन्मने C **6:90** गोलोके ] $CE_N$; गोलोकः A **6:90** °मुक्ता ] $CE_N$; °मुक्त A **6:90** वसेयुर्गो° ] $CE_N$; वसेयुगो° A

स्वपापप्रग्रहैर्बद्धाः पतन्ति निरयांबुधौ।
नौरिवानिलविक्षिप्ता दातृंस्तारयते हि गौः॥ 6:91॥

देव्युवाच।
दरिद्रेण कथं कृत्यं गोप्रदानं सुरोत्तम।
कथं वा स्वर्गमाप्नोति तद्भवान्वक्तुमर्हति॥ 6:92॥

भगवानुवाच।
दद्यादाज्यमयीं धेनुं दरिद्रो द्रविणैः सह।
स मृतो ऽमृतवाहिन्यां सुरै रमत इच्छया॥ 6:93॥

आज्यालाभे जलमयीं दद्याद्धेनुं सदक्षिणाम्।
पिपासादि महादुःखं हित्वा यात्यमरालयम्॥ 6:94॥

गवां ग्रासं दरिद्रेण कर्तव्यं प्रातरेव हि।
मन्त्रेणैव समायुक्तो मुच्यते सर्वकिल्बिषैः॥ 6:95॥

स्वर्गगामी च भवति परिभ्रष्टो महाधनी।
गवाढ्ये च भवेज्जन्म गवाढ्यश्च भवत्यसौ॥ 6:96॥

अग्निहोत्रं हुतन्तेन पितृदेवाश्च तर्प्पिताः।
स स्नातः सर्वतीर्थेषु यो ददाति गवाह्निकम्॥ 6:97॥

---

**6:91** °ग्रहैर्बद्धाः ] C; ग्रहैबद्धा A; ग्रहैर्वध्दाः $E_N$ **6:91** निरयांबुधौ ] $AE_N$; निरयाबुधौ C **6:91** नौरिवा° ] $CE_N$; न्वौरिवा° A **6:91** दातृंस्तारयते ] $E_N$; दातृ तारयते A; दातॄस्तारयते C **6:92** कथं कृत्यं गोप्रदानं सुरोत्तम ] C; --- सुरोत्तमः A; कथं कार्यं गोप्रदानं सुरोत्तम $E_N$ **6:92** स्वर्गमाप्नोति ] AC; स्वर्गमानोति $E_N$ **6:92** तद्भवान्व° ] $CE_N$; तद्भवा व° A **6:93** दद्यादाज्यमयीं धेनुं ] $E_N$; दद्यादाज्यमयी धेनु A; दद्यादाज्यमयीम्धनुं C **6:93** सुरै ] A; नद्यां $CE_N$ **6:94** आज्यालाभे जलमयीं ] *em.*; आज्यलाभे जलमयी A; आज्यलाभे जलमयीं C; आज्यालाभेजलमयीं $E_N$ **6:94** धेनुं सदक्षिणाम् ] $CE_N$; धेनु सदक्षिणम् A **6:94** महादुःखं ] $AE_N$; महद्दुःखं C **6:94** यात्यमरालयम् ] $CE_N$; यात्यमरा --- A **6:95** गवां ग्रासं ] C; --- ग्रास A; गवां घासं $E_N$ **6:95** मन्त्रेणैव ] *em.*; मत्रेणैव C; सत्रेणैव $E_N$A **6:95** °किल्बिषैः ] A; °पातकैः $CE_N$ **6:96** महाधनी ] *conj.*; महाधने ] ; AC; महामुने $E_N$ **6:96** गवाढ्ये च ] AC; गवाद्येच $E_N$ **6:96** भवेज्जन्म ] C; भवेजन्म A; भवेन्म $E_N$ **6:97** अग्निहोत्रं ] C; अग्निहोत्र A; अग्नि होत्रं $E_N$ **6:97** ददाति ] $AE_N$; दद्याति C **6:97** स स्नातः ] AC; सुस्नातः $E_N$ **6:97** गवाह्निकम् ] $CE_N$; --- A

उत्पन्नामृतमथने सुरभी लोकधारिणी।
इदं ग्रासं गृहाण त्वमिदं मे व्रतमुत्तमम्॥ 6:98॥

गवां ग्रासं यथा देयं सौरभेये तथैव च।
तुल्यमेव फलं दृष्टं किन्तु मन्त्रः पृथक्पृथक्॥ 6:99॥

सर्वलोकधरा ह्येते जीवितान्नप्रदायकाः।
ग्रासं गृह्णन्तु तुष्टास्तु एतन्मे व्रतमुत्तमम्॥ 6:100॥

नित्यं परगवे दद्याद्गृहीत्वा दुर्लभं व्रतम्।
रक्षन्ति च भयाद्घोराद्दर्शने पापनाशनाः॥ 6:101॥

गवां कण्डूयनं कुर्याद्ग्रासं दत्वा नगात्मजे।
प्रदक्षिणत्रयं कृत्वा गोप्रदानफलं लभेत्॥ 6:102॥

पुण्यकाले तु संप्राप्ते वृषोत्सर्गं करोति यः।
स याति रुद्रलोकं तु यदि नीलो भविष्यति॥ 6:103॥

अलाभे नीलषण्डस्य पितृभिः सह संयुतः।
स्वर्ग्गलोकमवाप्नोति भ्रष्टो भवति भोगवान्॥ 6:104॥

लांगूलाग्रं सितं यस्य क्षुरं शृंगञ्च सुव्रते।
लोहितानि च गात्राणि नीलषण्ढः स उच्यते॥ 6:105॥

---

**6:98** उत्पन्ना° ] $CE_N$; --- त्पना° A **6:98** इदं ] A; इमं $CE_N$ **6:98** गृहाण त्वमिदं ] *em.*; गृहाण त्वंमिदं $AC^{ac}$; गृहाण त्वं इदं $C^c$; गृहाणाम्ब $E_N$ **6:99** गवां ] C; गंवा A **6:99** दृष्टं किन्तु मन्त्रः ] $CE_N$; दृष्ट किंतु मन्त्र A **6:99** पृथक्पृथक् ] AC; पृथक्पथृक् $E_N$ **6:100** सर्वलोकधरा ] AC; सर्वलोक धरा $E_N$ **6:100** जीवितान्नप्रदायकाः ] C; जीवितान्नप्रदायकः A; जीवितानां प्रदायकाः $E_N$ **6:100** ग्रासं गृह्णन्तु तुष्टास्तु एतन्मे व्रतमुत्तमम् ] C; ग्रास गृह्णंन्तु दृष्टा तु एतन्मे --- A; ग्रासं गृह्णन्तु तुष्टास्तु एतन्मेव्रतमुत्तमम् $E_N$ **6:101** नित्यं परगवे दद्याद् ] C; --- त्यं परगवे दद्यां A; नित्यं परगवे दद्या $E_N$ **6:102** नगात्मजे ] $CE_N$; नगात्मजा A **6:102** गोप्रदानफलं ] C; गोप्रदानं फलं A; गो प्रदानफलं $E_N$ **6:103** वृषोत्सर्गं ] $E_N$; वृषोत्सर्ग्गं A; वृषोत्सग्गं C **6:103** भविष्यति ] $CE_N$; भ --- A **6:104** अलाभे नील° ] $CE_N$; --- ल A **6:104** °स्षण्डस्य ] A; °सण्ढस्य $CE_N$ **6:104** पितृभिः सह संयुतः ] $CE_N$; पितृभि षह संयुतः A **6:104** स्वग्गर्लोकमवाप्नोति ] AC; स्वर्गलोक मवाप्नोति $E_N$ **6:105** लांगूलाग्रं सितं ] $CE_N$; लांगूलाश्रितं A **6:105** क्षुरं शृंगञ्च सुव्रते ] *em.*; क्षुर शृंगञ्च सुव्रते A; खुरं शृंगञ्च सुव्रते C; खुराः शृङ्गे च सुव्रते $E_N$ **6:105** नीलषण्ढः स ] $CE_N$; नीलषण्ढस्य A

अनड्वाहो ऽपि बहुशो यः प्रयच्छेद्द्विजोत्तमे।
तेन पुण्यफलेनैव स्वर्ग्गलोके महीयते॥ 6:106॥

भगवानुवाच।
द्रव्याणां यावतां योनिः क्षितिरेव विधीयते।
किञ्च तेन न दत्तं स्याद्यः प्रयच्छति गां प्रिये॥ 6:107॥

ममैषा प्रथमा मूर्तिरिति तस्या महत्फलम्।
करोटीगतमप्यम्भः क्षितौ गत्वा शुचीभवेत्॥ 6:108॥

निवर्तनसहस्राढ्यामवनीं सस्यशालिनीम्।
शिवभक्ताय विप्राय दद्याच्छतमखो भवेत्॥ 6:109॥

ये हरन्ति महीं दत्तामात्मनाथ परेण वा।
दिव्यवर्षसहस्राणि रौरवे निवसन्त्यघाः॥ 6:110॥

परमाक्षरजापेन प्राणायामशतेन च।
ध्यानधारणयोगाच्च क्षितिहर्त्ता न शुद्ध्यति॥ 6:111॥

देव्युवाच।
निवर्तनसहस्राढ्यामवनीं सस्यमालिनीम्।

---

**6:106** बहुशो ] CE$_N$; बहुषो A **6:106** द्विजोत्तमे ] CE$_N$; द्विजोत्तमः A **6:106** महीयते ] CE$_N$; महीय --- A **6:107** योनिः ] CE$_N$; योनि A **6:107** यः प्रयच्छति गां प्रिये ] AC; यःप्रय च्छति गां प्रियेः E$_N$ **6:108** तस्या महत्फलम् ] A; तस्याः फलं महत् C; तस्याःफलं महत् E$_N$ **6:108** करोटीगतमप्यम्भः ] AC; करोटीगतमप्यम्मः E$_N$ **6:108** शुचीभवेत् ] C; शुचीम्भवेत् A; शुची भवेत् E$_N$ **6:109** निवर्तनसहस्राढ्यामवनीं ] *conj.*; निवर्त्तनसहस्राढ्यामवनी A; निवर्तनसहस्राद्यामवतीं C; निवर्तनसहस्राढचामवनी E$_N$ (unmetrical) **6:109** सस्यमालिनीम् ] AC; सस्यशालिनी E$_N$ **6:109** शिवभक्ताय विप्राय दद्याच्छतमखो ] CE$_N$; --- दद्या शतमखो A **6:110** महीं दत्तामात्मनाथ ] *conj.*; मही दत्वामात्मनाथ A; महीं दत्तां स्वयम्वाथ CE$_N$ **6:110** दिव्यवर्षसहस्राणि रौरवे निवसन्त्यघाः ] C; दिव्यं वर्षसहस्राणि रौरवे निवसंत्यघा A; दिव्यवर्षसहस्राणि रौरबे निवसन्त्यघः E$_N$ **6:111** °जापेन ] CE$_N$; °जाप्योवो (?) A **6:111** ध्यानधारणयोगाच्च क्षितिहर्त्ता ] C; ध्यानधारणयोगा च क्षितिहत्ता A; ध्यान धारण योगाच्च क्षितिहर्त्ता E$_N$ **6:112** निवर्तनसहस्राढ्यामवनीं सस्यमालिनीम् ] C; निवर्तनसहस्राढ्यमवनी सस्यमालिनी A; निवर्तन सहस्राढयामवनीं सस्यशालिनीं E$_N$ (unmetrical)

कथं दरिद्रा दास्यन्ति तदुपायं ब्रवीहि मे॥ 6:112॥

भगवानुवाच।
गोचर्ममात्रमपि गां यो ददाति शुचिस्मिते।
स भविष्यति सुव्यक्तमिन्द्रस्यार्धासनातिथिः॥ 6:113॥

देव्युवाच।
गोचर्ममात्रमपि गां यदा दातुं न शक्यते।
तदा किं तु दरिद्रेण कर्तव्यञ्जगतांपते॥ 6:114॥

भगवानुवाच।
शुचावुद्धृत्य मृङ्गारं सुगन्धीकृत्य यत्नतः।
दद्याद्गुणवते नित्यं भूदानफलमाप्नुयात्॥ 6:115॥

एकच्छत्रां महीं कृत्वा महादेवाय शम्भवे।
शिवभक्तद्विजेभ्यो वा दत्वा रुद्रसमो भवेत्॥ 6:116॥

देव्युवाच।
एकच्छत्रां वसुमतीं कथन्दद्यात्पृथग्जनः।
तस्याः प्रतिनिधिम्ब्रूहि यथा याति परां गतिम्॥ 6:117॥

भगवानुवाच।
प्रसवन्तीञ्च गान्दद्याद्वक्रोभयसुसंस्थिताम्।

---

**6:112** कथं दरिद्रा दास्यन्ति तदुपायं ब्रवीहि मे ] C;--- तदुपाय ब्रवीमि हे A; कथं दरिद्रा दास्यन्ति तदुपायं व्रवीहिमे $E_N$ **6:113** गोचर्ममात्रमपि ] A; गोचर्ममात्रां यपि $CE_N$ **6:113** सुव्यक्तमिन्द्रस्यार्धासनातिथिः ] C; सुव्यक्तमिन्द्रस्यार्धसनातिथि A; सुव्यक्त मिन्द्रस्यार्ध्दासनातिथिः $E_N$ **6:114** देव्युवाच ] $CE_N$; देव्यूवाच A **6:114** यदा ] $CE_N$; कदा A **6:114** पते ] $AE_N$; परे C **6:115** शुचावुद्धृत्य मृङ्गारं सुगन्धीकृत्य यत्नतः ] C; शुचावु ⏑̱ --- ⏑̱ तः A; शुचावुद्धृत्यमृङ्गारं सुगन्धी कृत्य यत्नतः $E_N$ **6:115** दद्याद्गुणवते नित्यं ] C; दद्याद्गु ⏑̱ वते नित्य A; दद्या द्गुणवते नित्यं $E_N$ **6:115** भूदानफलमाप्नुयात् ] AC; भूदान फलमाप्नुयात् $E_N$ **6:116** महीं ] $E_N$; मही AC **6:116** शम्भवे ] $AE_N$; संभवे C **6:116** शिवभक्तद्विजेभ्यो ] AC; शिवभक्त द्विजेभ्यो $E_N$ **6:117** वसुमतीं ] $CE_N$; वसुमती A **6:117** दद्यात्पृथग्जनः ] $CE_N$; दद्यात्पृथग्जनैः A **6:117** प्रतिनिधिम्ब्रूहि ] AC; प्रतिनिधिंब्रूहि $E_N$ **6:117** यथा याति परां गतिम् ] C; यथा याति प --- A; यथायान्ति परां गतिम् $E_N$ **6:118** भगवानुवाच ] $CE_N$; भ --- A **6:118** प्रसवन्तीञ्च गान्दद्याद्वक्रोभयसुसंस्थिताम् ] C; --- गा दद्यद्वक्रोभयसुसंस्थिताम् A; प्रसवन्तीश्च गान्दद्याद् बक्रोभयसुसंस्थितां $E_N$

पृथ्वीदानफलं ह्येतत्स्वर्ग्गलोकाभिकांक्षिणाम्॥ 6:118॥

एकजन्मानुगाः सर्वे दानधर्म्मफलोदयाः।
गोमहीकनकानान्तु सप्तजन्मानुगाः प्रिये॥ 6:119॥

देव्युवाच।
बालवृद्धातुराल्पाङ्गैर्भगवन्शक्यते कथम्।
उपवासत्रयं कर्तुन्तदुपायञ्च मे वद॥ 6:120॥

भगवानुवाच।
यः पृथ्वीभाजनं कृत्वा भुंक्ते पर्वसु यत्नतः।
अहोरात्रेण चैकेन त्रिरात्रफलमश्नुते॥ 6:121॥

एतदुक्तं मया देवि शक्तिहीनहिताय वै।
शक्तानां तु भवेन्नैवं विधिः सर्वत्र सुन्दरि॥ 6:122॥

हेमवर्ण्णमजं दत्वा शिवभक्तद्विजन्मने।
अग्निलोकमवाप्नोति बहुपापात्मिको ऽपि सन्॥ 6:123॥

भूमिदानाद्भवेत्स्वर्गो रत्नदानाद्रवेः पुरम्।
वस्त्रदः शशिलोकं तु तारदो वैष्णवं पुरम्॥ 6:124॥

---

**6:118** ह्येतत्स्वर्ग्ग° ] $CE_N$; ह्येत स्वर्ग्ग° A **6:118** °लोकाभिकांक्षिणाम् ] A; °लोके-भिकांक्षिणाम् C; °लोकाभिकांक्षिणा $E_N$ **6:119** एकजन्मानुगाः ] $CE_N$; एकजन्मानुगा A **6:119** °दयाः ] $CE_N$; °दया A **6:119** सप्तजन्मानुगाः ] $CE_N$; सप्तजन्मानुगां A **6:120** बालवृद्धातुराल्पाङ्गैर्भगवन् शक्यते ] $E_N$; बालवृद्धातुराल्पांगै भगवं शक्यते A; बा-लवृद्धातुराल्पाङ्गैर्भगन् ⏑̱ क्यते C (unmetrical) **6:120** उपवासत्रयं कर्तुन्तदुपायञ्च ] $E_N$; उपवासं त्रयं कर्तुं तदुपायञ्च A; उपवासत्रयं कर्तुत्तदुपायञ्च C **6:121** भगवानुवाच ] *em.*; भ --- A; देवदेव उवाच $CE_N$ **6:121** यः पृथ्वीभाजनं कृत्वा ] C; --- थ्वी भाजन कुया A; यः पृथ्वी भाजनं कृत्वा $E_N$ **6:121** त्रिरात्र° ] $CE_N$; तृरात्र° A **6:122** एतदुक्तं मया देवि शक्तिहीनहिताय ] AC; एतदुक्तंमया देवि शक्ति ही नहिताय $E_N$ **6:122** भ-वेन्नैवं विधिः ] C; भवे नैव विधि A; भवेन्नैव विधिः $E_N$ **6:123** शिवभक्तद्विजन्मने ] AC; शिवभक्त द्विजन्मने $E_N$ **6:123** अग्निलोकमवाप्नोति बहुपापात्मिको ऽपि सन् ] C; अग्निलोकमवाप्नोति बहुपापात्मतामपि A; अग्निलोकमवाप्नोतिबहुपापात्मिको ऽपि सन् $E_N$ **6:124** भूमिदानाद्भवेत्स्वर्गो ] $E_N$; भूमिदानाद्भवे --- म्सा; भूमिदानाल्लभेत्स्वर्ग्गं C **6:124** रत्नदानाद्रवेः पुरम् ] C; --- पुरं A; रत्नदानाद्रवेःपुरं $E_N$ **6:124** तारदो वैष्णवं पुरम् ] C; तारदो वैष्णवे पुरे A; तारदोवैष्णवं पुरं $E_N$

तिलहेमप्रदातारो यान्ति रुद्रस्य चालयम् ।
कांस्यताम्रप्रवालानि दत्त्वैति वसुमन्दिरम् ॥ 6 : 125 ॥

मुक्तामणिविचित्राणि हीनजातीनि यान्यपि ।
दत्वा शक्रपुरं यांति तिलहोमाच्च मानवाः ॥ 6 : 126 ॥

दधि क्षीरं गुडं सर्पिर्यः प्रयच्छति नित्यशः ।
यक्षलोकपुरं याति मधुदानेन चैव हि ॥ 6 : 127 ॥

चन्दनागरुकर्प्पूरकक्कोलकलवङ्गकान् ।
दत्वान्यानि सुगन्धीनि व्रजेद्गन्धर्वतान्नरः ॥ 6 : 128 ॥

अलङ्कृत्य च ये कन्यां प्रयच्छन्ति त्वयाचिताम् ।
ते नराः स्वर्गमेष्यन्ति ये च धान्यप्रदायिनः ॥ 6 : 129 ॥

माषमुद्गादिकान्व्रीहीन्ये ददत्यसकृन्नराः ।
ते ऽपि स्वर्गङ्गमिष्यन्ति ये चान्ये ह्यभयप्रदाः ॥ 6 : 130 ॥

रूपयौवनसम्पन्नां वस्त्राभरणभूषिताम् ।
युवतीं ये प्रयच्छन्ति यान्ति वैद्याधरं पदम् ॥ 6 : 131 ॥

---

**6:125** कांस्यताम्रप्रवालानि दत्वैति वसुमन्दिरम् ] C; कांसताम्रप्रवालानि दत्वैति वचुमुन्दत्रि A; कांस्यताम्रप्रवालानि दतेति वसुमन्दिरम् $E_N$ **6:126** मुक्तामणिविचित्राणि ] *em.*; मुक्तमणिविचित्राणि A; मुक्तामनिविचित्राणि C; मुक्तामणि विचित्राणि $E_N$ **6:126** शक्रपुरं ] C; स्वर्ग्गपुरं A; शुक्रपुरं $E_N$ **6:126** तिलहोमाच्च ] C; तिलहोमा च A; तिलहोमाश्च $E_N$ **6:127** दधि क्षीरं गुडं सर्पिर्यः ] *em.*; दधि क्षीर गुडं सर्प्पि यः A; दधि क्षीरं गुडं सार्प्पः यः C; दधिक्षीरगुडं सर्पि र्य $E_N$ **6:127** नित्यशः ] $CE_N$; नित्य ⏓ --- A **6:127** यक्षलोकपुरं याति ] C; --- न्ति A; यक्षलोकपुरं यान्ति $E_N$ **6:127** मधुदानेन चैव हि ] *conj.*; दधिदानेन चैव हि C; दधिदानेव चेव हि A; दधिदानेन चैव हि $E_N$ **6:128** चन्दनागरुकर्प्पूरकक्कोलकलवङ्गकान् ] *conj.*; चन्दनागरुकपूरः ककोलकलवङ्गकाम् A; चन्दनागरुकर्प्पूरकक्कोलकलवङ्गकम् $CE_N$ **6:128** दत्वान्यानि सुगन्धीनि ] $CE_N$; दद्याद्यानि सुगन्दानि A **6:128** व्रजेद्गन्धर्वतान्नरः ] $CE_N$; व्रजे गन्धर्वतां नरः A **6:129** अलङ्कृत्य च ये कन्यां प्रयच्छन्ति त्वयाचिताम् ] C; अलंकृत्य च यः कन्या संप्रयच्छत्ययाचितां A; अलङ्कृत्यच ये कन्यां प्रयच्छन्ति त्वयाचितां $E_N$ **6:129** स्वर्गमेष्यन्ति ] $CE_N$; स्वर्ग्गयेष्यन्ति A **6:130** माषमुद्गादिकान् ब्रीहीन् ] *conj.*; मासमुद्गादिकां ब्रीहीं A; मुद्गमाषादिकां ब्रीहीन् C; मुद्गमाषादिकान्नानि $E_N$ **6:130** ददत्यसकृन्नराःलेम् $CE_N$; ददत्यसकृनरः A **6:130** ते ऽपि स्वर्गङ्गमिष्यन्ति ये चान्ये ह्यभयप्रदाः ] $CE_N$; तिपि --- न्ये ह्यभयप्रदा A **6:131** रूपयौवनसम्पन्नां ] $E_N$; रूपयौवनसम्पन्न A; रूपयौवन्नसम्पन्नां C

रतिसत्रञ्च यो दद्याद्वराभिः प्रमदाजनैः।
कामदेवपुरं याति जातो ऽनङ्गसमो भवेत्॥ 6:132॥

वेत्रासनञ्च शय्याञ्च प्रत्यब्दं यः प्रयच्छति।
मोदते यक्षलोकेषु यक्षिणीभिः समन्वितः॥ 6:133॥

इन्धनानि च यो दद्याद्विप्रेभ्यः शिशिरागमे।
धनवान्रूपसंपंनो दीप्ताग्निः सुभगो भवेत्॥ 6:134॥

प्रतिश्रयं तृणं शय्याम्पुण्याग्निं शुद्धमानसाः।
प्रत्यहं ये प्रयच्छन्ति ते नराः स्वर्गगामिनः॥ 6:135॥

गीतवादित्रयानानि देवानां नित्यदायिनः।
जायन्ते ते च भोगाढ्या गीतवादित्रबोधकाः॥ 6:136॥

जवे यौवनसम्पन्नं सप्तिं हेमविभूषितम्।
प्रयच्छेद्द्विजमुख्येभ्यो ब्रध्नस्याप्नोति पिष्टपम्॥ 6:137॥

पुण्येन धनमाप्नोति सन्ततिं श्राद्धकर्मणा।
†तृणासिनां †भवेद्राज्यं नित्यस्नानेन यक्षताम्॥ 6:138॥

---

**134** Cf. *Garuḍapurāṇa* 1.51.27ab: इन्धनानां प्रदानेन दीप्ताग्निर्जायते नरः।

---

**6:132** वराभिः ] *conj.*; वाराणि A; आरिभिः CE$_N$ **6:132** कामदेवपुरं याति ] C$^c$E$_N$; कामदेवपुरा यान्ति A; कामदेवपुरं यान्ति C$^{ac}$ **6:133** मोदते यक्षलोकेषु यक्षिणीभिः समन्वितः ] E$_N$; मोदते य --- ⏓ ⏓ ⏓ न्वन्तं A; मोदते यक्षलोकेषु यक्षिणीभिःर्समन्वितः C **6:134** दीप्ताग्निः ] CE$_N$; दीप्ताग्नि A **6:135** प्रतिश्रयं तृणं शय्याम्पुण्याग्निं शुद्धमानसाः ] C; प्रतिश्रय तृणं शय्य पुण्याग्निं शुद्धमानसा A; प्रतिश्रयं तृणं शय्याम्पुण्याग्निं शुध्दमानसाः E$_N$ **6:136** जायन्ते ते च भोगाढ्या गीतवादित्रबोधकाः ] C; जयन्ति ते म --- धैका +ः+A; जायन्ते ते च भोगाद्या गातवादित्रबोधकाः E$_N$ **6:137** जवे यौवनसम्पन्नं सप्तिं हेमविभूषितम् ] A; जवे यौवनसम्पन्नं सप्तिं हेमावभूषितम् C; नवयौवनसम्पन्नं सप्तिहेमविभूषि E$_N$ (unmetrical) **6:137** प्रयच्छेद्द्विजमुख्येभ्यो ] A; यो दद्याद्द्विजमुख्येभ्यो CE$_N$ **6:137** ब्रध्नस्याप्नोति पिष्टपम् ] C; बद्धस्याप्नोतृ पिष्टपं A; ब्रध्नस्याप्नोति विष्टपम् E$_N$ **6:138** सन्ततिं श्राद्धकर्मणा ] *em.*; सन्तत्रिं शाद्धकर्मणा A; सन्ततिं शाद्धकर्मणा C; सन्ततिं श्राध्दकर्मणा E$_N$ **6:138** तृणासिनां ] A; तृणसिनां C; तृणासिना E$_N$ **6:138** भवेद्राज्यं ] CE$_N$; भवेद्राज्य A **6:138** नित्यस्नानेन यक्षताम् ] A; नित्यं स्नानेन यक्षताम् C; नित्यस्नानेन यक्षता E$_N$

प्रदानादुपभोग्यं स्यात्सौभाग्यं रसवर्ज्जनात्।
व्याधिशोकौ न जायेते सान्त्वदस्य महात्मनः॥ 6:139॥

ब्रह्मचारी चिरायुर्वै स्वर्ग्गः पर्णाशनेन तु।
गुरुशुश्रूषया विद्वान्सुचक्षुर्दीपदानतः॥ 6:140॥

भृगुप्रपतनाद्राज्यं पयोभक्षश्चरेद्दिवि।
अग्निप्रवेशेन नरः प्रयाति ब्रह्मणः पदम्॥ 6:141॥

उपवासाद्गदाधीशो मौनेनाज्ञाप्रदो भवेत्।
सर्वकामसमृद्धिस्तु जायते ऽन्नप्रदानतः॥ 6:142॥

दानेन प्रेक्षणीयस्य मेधावी स्मृतिमान्भवेत्।
लभते छत्रदानेन रम्याणि भवनानि च॥ 6:143॥

गृहदानेन सुव्यक्तं नगरं लभते नरः।
उपानहप्रदानेन प्राप्नुयाद्यानमुत्तमम्॥ 6:144॥

हरशुश्रूषया राज्यं फलमूलाशिनामपि।
विप्रायाश्वयुजे सर्पिर्दत्वा भवति रूपवान्॥ 6:145॥

त्रिसन्ध्यासु जपन्देवि द्विजो भवति रूपवान्।
द्रव्याणि भृत्यवर्गांश्च क्षेत्राणि च गृहाणि च॥ 6:146॥

---

**6:139** °पभोग्यं ] C; °पभोगं A; °पभोग्य $E_N$ **6:139** व्याधिशोकौ न जायेते सान्त्वदस्य महात्मनः ] $CE_N$; व्याधिशोको न --- हात्मनः A **6:140** चिरायुर्वै ] $E_N$; चिरायु वै AC **6:140** स्वर्ग्गः ] A; स्वर्ग्ग C; स्वर्गं $E_N$ **6:140** गुरुशुश्रूषया विद्वान् ] C; गुरुशुश्रूषया विद्यो A; गुरुशुश्रूषयाविद्वान् $E_N$ **6:140** सुचक्षुर्दीपदानतः ] $CE_N$; सुचक्षु दीपदानतः A **6:141** भृगुप्रपतनाद्राज्यं ] $CE_N$; भृगुप्रपतने द्रज्य A **6:141** अग्निप्रवेशेन नरः प्रयाति ब्रह्मणः पदम् ] AC; अग्निप्रवेशन नरः प्रयाति ब्रह्मः पदम् $E_N$ **6:142** गदाधीशो ] A; गजाधीशो $CE_N$ **6:142** मौनेनाज्ञाप्रदो ] AC; मौनेन ज्ञानदो $E_N$ **6:142** सर्वकामसमृद्धिस्तु जायते ऽन्नप्रदानतः ] C; सर्वकामस --- दानतः A; सर्वकामसमृध्दिस्तु जायते ऽन्नप्रदानतः $E_N$ **6:143** स्मृतिमान् ] $CE_N$; स्मृतिमां A **6:143** रम्याणि ] $E_N$; रम्यानि AC **6:144** उपानहप्रदानेन ] A; उपानहः प्रदानेन $CE_N$ **6:145** फलमूलाशिनामपि ] $CE_N$; फलमूलाशनामपि A **6:145** सर्पिर्दत्वा भवति रूपवान् ] *em.*; सर्प्पि --- A; सर्पिदत्वा भवति रूपवान् $CE_N$ **6:146** त्रिसन्ध्यासु जपन्देवि द्विजो भवति रूपवान् ] A; त्रिसन्ध्यासु जपन्देवि द्विजो भवति नान्यथा C; त्रिसन्ध्यन्तु जपेद्देवि द्विजो भवति नान्यथा $E_N$ **6:146** द्रव्याणि भृत्यवर्गांश्च ] *em.*; द्रव्याणि भृत्यवर्ग्गांश्च $AE_N$; द्रव्यानि भृत्यवर्ग्गांश्च C

ब्रह्मदेयां सुतान्दत्वा प्राप्नोत्याभरणानि च।
इन्द्रत्वं वायुभक्षेण नीरोगत्वमहिंसया॥ 6 : 147॥

महीमधिशयानस्य दिव्यशय्यागृहं भवेत्।
पुष्पाढ्यं वा फलाढ्यं वा दत्वा विप्राय पादपम्॥ 6 : 148॥

दिव्यस्त्रीधनपूर्णानि गृहाण्याप्नोति मानवः।
शिवदीक्षांबुपूताय विप्रायाचमनाय च॥ 6 : 149॥

कमण्डलुमपां पूर्णं दत्वा प्रेत्य सुखी भवेत्।
पूजयन्ति दिवि प्रीता विबुधाः सत्यवादिनः॥ 6 : 150॥

सलिलस्य प्रदानेन तृप्तिर्भवति सर्वदा।
बलीवर्दसहस्राणां दृढानाम्फलवाहिनाम्॥ 6 : 151॥

गुणवत्पात्रदत्तानां फलं कन्याप्रदानतः।
तिलान्ददतः पानीयं दीपमन्नं प्रतिश्रयम्॥ 6 : 152॥

बान्धवैस्सह मोदन्ति एतत्प्रेत्य सुदुर्लभम्।
शारीसंयोगसंयुक्तमिभङ्काञ्चनमालया॥ 6 : 153॥

दत्वा शक्रपुरं याति भ्रष्टो भवति भोगवान्।

---

**6:147** ब्रह्मदेयां सुतान्दत्वा ] AC; ब्रह्मदेयात्सुतान्दत्वा $E_N$ **6:147** इन्द्रत्वं वायुभक्षेण ] AC; इन्दुत्वं वायुभक्ष्येण $E_N$ **6:147** नीरोगत्वमहिंसया ] $CE_N$; निरोगत्वमहिंसया A **6:148** महीमधिशयानस्य ] $CE_N$; महीमधशयानस्य A **6:148** फलाढ्यं ] AC; फलाढयं $E_N$ **6:148** विप्राय पादपम् ] $CE_N$; --- A **6:149** दिव्यस्त्रीधनपूर्णानि ] $CE_N$; ⏓ व्यस्त्रीधनपूर्णानि A **6:149** गृहाण्याप्नोति ] *em.*; गृहानाप्नोति A; गृहान्याप्नोति C; गृहाव्याप्नोति $E_N$ **6:149** च ] *em.*; चः A; यः C; य $E_N$ **6:150** कमण्डलुमपां पूर्णं दत्वा प्रेत्य ] C; कमण्डलुमयां पूर्णन्दत्वा वेत्य A; कामनास्तु मया पूर्णं दत्त्वा प्रेत्य $E_N$ **6:150** विबुधाः सत्यवादिनः ] C; विबुधा सत्यवादिनः A; विबुधाः सत्यवादिनं $E_N$ **6:151** तृप्तिर्भवति ] C; तृप्तिं भवति A; तृप्तिर्भबति $E_N$ **6:151** बलीवर्दसहस्राणां ] $E_N$; बलीवद्दसहस्राणां A; बलीवर्दसहस्राणां C **6:151** फलवाहिनाम् ] C; चलवाहिनाम् A; फलवाहिनं $E_N$ **6:152** तिलान्ददतः ] *em.*; तिलान्ददथ $E_N$; तिलां ददत A; तिलान्दद्रथ C **6:152** दीपमन्नं प्रतिश्रयम् ] C; दीपमंन प्रतिश्रयम् A; दीपमन्त्र प्रतिज्ञया $E_N$ **6:153** मोदन्ति एतत्प्रेत्य सुदुर्लभम् ] $E_N$; मोदध्वमेतत्प्रेत्य सुदुर्लूभं A; मोदध्वमेतत्प्रेत्य सुदुलभम् C **6:153** शारीरयोगसंयुक्तम् ] C; शरीरसंयोगसंयुक्तं A; शारीरयोगसंयुक्त $E_N$ **6:153** इभङ्काञ्चनमालया ] AC; नितंकाञ्चन मालया $E_N$ **6:154** भवति भोगवान् ] $CE_N$; --- A

आतपत्रप्रदानेन श्रीमाञ्जायेत मानवः॥ 6 : 154॥

धर्मराजपुरं गच्छन्नातपेनानुपीड्यते।
उपानहौ तु यो दद्यात्स तु मुच्येत किल्बिषात्॥ 6 : 155॥

धर्मराजपथे तस्य जायते शोभनो हयः।
तप्तसैकतदुःखाग्रैः कण्टकैश्च सुदारुणैः॥ 6 : 156॥

न च तस्य भवेत्पीडा यो हि दद्यादुपानहौ।
दद्याद्राजरथं यस्तु ब्राह्मणाय गुणान्विते॥ 6 : 157॥

तेन पुण्यफलेनैव स्वर्गलोके महीयते।
तावन्न च्यवते स्वर्गाद्यावद्देवास्सवासवाः॥ 6 : 158॥

ततश्चैव परिभ्रष्टो राजा भव+ति+ धार्मिकः।
दत्वा चाश्वरथं दिव्यं बहुद्रव्यसमन्वितम्॥ 6 : 159॥

सूर्यलोकमवाप्नोति तेनैव सह मोदते।
यावत्सूर्यकृता लोकास्तावत्तिष्ठेत्स सूर्यवत्॥ 6 : 160॥

तत्र चैव परिभ्रष्टो धनवाञ्जायते पुनः।
बलीवर्दरथं दत्वा सर्वद्रव्यसमन्वितम्॥ 6 : 161॥

---

**6:154** जायेत ] AE$_N$; जायेत् C **6:155** गच्छन्नातपेनानुपीड्यते ] C; गच्छं आतपेनानुपीड्यते A; गच्छन्नातपैनानु पीड्यते E$_N$ **6:155** तु यो ] CE$_N$; च यो A **6:155** किल्बिषात् ] CE$_N$; किल्बिषां A **6:156** धर्मराजपथे तस्य ] A; धर्मराजस्य मार्ग्गे ऽस्य CE$_N$ **6:156** हयः ] AC; हयाः E$_N$ **6:156** तप्तसैकतदुःखाग्रैः ] AC; तप्तसैकत दुःखाद्रैः E$_N$ **6:156** कण्टकैश्च ] CE$_N$; कष्टोकैश्च A **6:157** न च तस्य भवेत्पीडा यो हि दद्यादुपानहौ ] CE$_N$; न च त --- द्यादुपानहौ A **6:157** ब्राह्मणाय ] AC; ब्राह्मणा E$_N$ (unmetrical) **6:158** तावन्न च्यवते ] CE$_N$; तावं न च्यते A (unmetrical) **6:158** देवास्सवासवाः ] A$^c$CE$_N$; देवात्सस्सवासवाः A$^{ac}$ (unmetrical) **6:159** परिभ्रष्टो राजा भवति धार्मिकः ] AE$_N$; परिभ्रष्टा रास भवन्ति धार्मिकाः C **6:159** दत्वा वाश्वरथं ] CE$_N$; दत्वा क्वाश्वरथं (?) A **6:159** दिव्यं ] CE$_N$; दिव्यां A **6:159** बहुद्रव्यसमन्वितम् ] CE$_N$; बहुद्रव्यसम --- A **6:160** सूर्यलोकमवाप्नोति तेनैव ] CE$_N$; --- प्नोति तेननैव A (unmetrical) **6:160** यावत्सूर्यकृता लोकास्तावत्तिष्ठेत्स सूर्यवत् ] C; यावत्सूयकृता लोकात्ताव तिष्ठन्ति सूयवत् A; यावत्सूर्यकृतालोकास्तावत्तिष्ठेत्स सूर्यवत् E$_N$ **6:161** तत्र चैव ] A; ततश्चैव CE$_N$ **6:161** बलीवर्दरथं दत्वा ] *em.*; बलीवर्द्धरथन्दत्वा A; बलीवर्द्धरथं दद्यात् C; वलीवर्दरथं दद्यात् E$_N$ **6:161** सर्वद्रव्यसमन्वितम् ] AE$_N$; सर्वधर्मसमन्वितम् C

दासीदाससमोपेतः स्वर्गमाप्नोति मानवः।
परिभ्रष्टस्तु तद्भूयो धनवाञ्जायते सदा॥ 6:162॥

कपित्थं दाडिमञ्चैव पनसं बीजपूरकम्।
नालिकेरकनारङ्गं प्राचीनामलमोचकम्॥ 6:163॥

श्रीफलं चूतजम्बीरन्द्राक्षा खर्जूरमेव च।
अन्यानि च फलान्येवं दत्वा तु सुखभाग्भवेत्॥ 6:164॥

बहुप्रजश्च रूपाढ्यः सुभगश्चैव जायते।
संपूर्णाङ्गश्च निरुजो भवेच्च फलदायकः॥ 6:165॥

दन्तधावनदानाच्च भार्या भवति शोभना।
तांबूलं शोभितं पुष्पं दत्वा जायेत पण्डितः॥ 6:166॥

सुगन्धास्यश्च भवति वाग्मी गन्धप्रदायकः।
उपवीतं वृतं दत्वा जायते ब्रह्मयोनिषु॥ 6:167॥

खड्गचक्रायुधन्दत्वा शक्तिकुन्तपरश्वधान्।
असिपत्रवनाद्घोरान्न भयं तस्य जायते॥ 6:168॥

असंस्कृतस्य लोहस्य दानाद्बन्धभयं न च।

---

**6:162** °समोपेतः ] $CE_N$; °समोपेत A **6:162** स्वर्गमाप्नोति ] A; स्वर्गप्राप्नोति C; स्वर्गं प्राप्नोति $E_N$ **6:162** परिभ्रष्टस्तु तद्भूयो धनवाञ्जायते सदा ] $CE_N$; परिभ्रष्टस्तु तं भूयो --- A **6:163** कपित्थं दाडिमञ्चैव पनसं ] $CE_N$; कपिथं दातिमञ्चैड पवोसं (?) A **6:163** बीजपूरकम् ] AC; वीजपूरकम् $E_N$ **6:163** नालिकेरकनारङ्गं ] $CE_N$; नालिकेरकनारंगा A **6:164** चूतजम्बीरन्द्राक्षा खर्जूरमेव ] C; चूतजंबीर द्राक्ष खर्जूरमेव A; चूतजम्बीरं द्राक्षाखर्ज्जूर मेव $E_N$ **6:164** दत्वा तु ] C; दद्या तु A; दत्त्वातु $E_N$ **6:165** बहुप्रजश्च रूपाढ्यः ] C; बहुप्रजाश्च रूपाढ्य A; वहुप्रजश्च रूपाढ्य $E_N$ **6:165** सुभगश्चैव ] $AE_N$; शुभगश्चैव C **6:165** संपूर्णाङ्गश्च ] $CE_N$; संपूर्णाङ्गांश्च A **6:165** भवेच्च फलदायकः ] $CE_N$; भवे ⌣̲ --- A **6:166** दन्तधावनदानाच्च ] $E_N$; --- वनदाजा च A; दन्तधावनदाना च C **6:166** शोभितं पुष्पं ] A; सुरभिं पुष्पं C; सुरभिपुष्पं $E_N$ **6:167** °दायकः ] AC; °दायक $E_N$ **6:167** वृतं दत्वा ] C; वृतन्दवा Aवृषन्दत्वा $E_N$ **6:168** परश्वधान् ] C; परश्वधम् A; परश्वधाम् $E_N$ **6:168** असिपत्रवनाद्घोरान्न ] $E_N$; असिपत्रवनं द्घोर न A; अशिपत्रवनाद्घोरान्न C **6:168** भयं तस्य जायते ] $CE_N$; भय --- A **6:169** असंस्कृतस्य ] $CE_N$; --- तस्य A **6:169** बन्धभयं न ] *conj.*; द्वन्द्वभयं न A; बंन्धभयन्न C; द्वन्द्व भयन्न $E_N$

घटितोपस्करं लोहं दत्वा शस्त्रभयन्न च॥ 6:169॥

लोहीपाकश्च नरको न कदाचिद्भविष्यति।
मृन्मयानि कपालानि दत्वा चैव कमण्डलुम्॥ 6:170॥

यतिदानमिदं श्रेष्ठं दत्वा तु सुखभाग्भवेत्।
काञ्चनं रजतं ताम्रं भाण्डमायससीसकम्॥ 6:171॥

अक्षयन्तद्भवेद्दानं दीर्घमायुश्च जायते।
देवताभ्यो द्विजातिभ्यो दासीदासां ददाति यः॥ 6:172॥

ते लभन्ते महाभोगान्बहुभृत्यजनावृताः।
सिन्धूत्थं लवणं दत्वा रूपवान्सुभगो भवेत्॥ 6:173॥

पिप्पलीं शृङ्गवेरञ्च मरिचम्भैषजानि च।
दत्वा निरुजतां याति आतुरायौषधानि च॥ 6:174॥

आतुरं निरुजं कुर्यादायुष्मान्निरुजो भवेत्।
मधुराम्लानि तिक्तानि कषायलवणानि च॥ 6:175॥

सर्वक्रीडारसाभिज्ञो विद्वाञ्जायेत मानवः।
तैलात्प्राणा घृतात्तेज आयुः शर्करखण्डयोः॥ 6:176॥

---

**6:169** घटितोपस्करं लोहं ] $E_N$; घटितोपस्कर लोह A; घटितोंपस्करं लोड्गं C **6:170** लोहीपाकश्च नरको ] AC; लोहीपाके ऽथ नरके $E_N$ **6:170** मृन्मयानि ] AC; मृण्मयानि $E_N$ **6:170** चैव ] $CE_N$; नैव A **6:171** श्रेष्ठं ] C; श्रेष्ठ A; प्रोक्तं $E_N$ **6:171** तु सुखभाग्भवेत् ] A; सुखमवाप्नुयात् $CE_N$ **6:171** रजतं ताम्रं भाण्डमायससीसकम् ] $CE_N$; रजत --- सीसकं A **6:172** दानं ] $CE_N$; दान A **6:173** लभन्ते महाभोगान् ] *em.*; लभन्ते महाभोगा A; लभन्ति महाभोगान् $CE_N$ **6:173** °वृताः ] C; °वृता A; °कुलाः $E_N$ **6:173** सिन्धूत्थं लवणं ] *em.*; सिंधूथ लवणन् A; सिन्धूच्छं लवनं C; सिंधूथ लवणान् **6:173** दत्वा रूपवान् ] C; दत्वा रूपवा A; दद्याद् रूपवान् $E_N$ **6:174** पिप्पलीं ] C; पिप्पली $AE_N$ **6:174** शृङ्गवेरञ्च मरिचम्भैषजानि ] C; शृङ्गवेरञ्च मरिच ⏑̲ --- A; शृङ्गवेरश्च मरिचं भेषजानि $E_N$ **6:174** निरुजतां ] AC; नीरुजतां $E_N$ **6:175** निरुजं ] AC; नीरुजं $E_N$ **6:175** कुर्यादायुष्मान् ] *conj.*; कुर्या आयुंष्मां A; कृत्वा आष्मान् $CE_N$ **6:175** निरुजो ] $CE_N$; निरुजा A **6:175** तिक्तानि ] AC; तिक्तानी $E_N$ **6:176** जायेत ] AC; जाये त $E_N$ **6:176** तैलात्प्राणा घृतात्तेज ] C; तैलात्प्राणमिक्ष्योस्तेज A; तैलात् प्राणान् धनात्तेज $E_N$ **6:176** आयुः ] $CE_N$; आयु A

मर्जिता तक्रदानेन गवाढ्यो गोप्रपूजनात्।
मौक्तिकं शङ्खशुक्तीनि दत्वा बहुसुतो भवेत्॥ 6:177॥

कपर्दकानि यो दद्याद्दर्प्पणं निर्मलं तथा।
रूपवान्धनसम्पन्नो जायते स्त्रीषु वल्लभः॥ 6:178॥

पोषणं हन्तकारञ्च भिक्षां वा प्रत्यहं क्षिपेत्।
धनिनस्ते प्रजायन्ति अन्यथा दुर्ग्गतिं व्रजेत्॥ 6:179॥

एष दानविधिः ख्यातो ह्यन्नदानञ्च मे शृणु।
अन्नपानं सदा दद्याद्वस्त्रं शय्यां प्रतिश्रयम्॥ 6:180॥

गां सुवर्ण्णन्तथा भूमिं धर्मेण किमतः परम्।
विद्यादानं परं श्रेष्ठमतिश्रेष्ठञ्च रक्षणम्॥ 6:181॥

जीवं रक्षति यो नित्यं स दाता परमः स्मृतः।
सर्वेषामेव दानानां भूतेष्वभयदक्षिणाम्॥ 6:182॥

यो ददाति स दाता हि ये चान्ये काममोहिताः।
तस्माद्रक्षन्ति सत्वानि प्राणिनाञ्जीवितात्यये॥ 6:183॥

स च दाता तपस्वी च स याति परमं पदम्।

---

**6:177** मर्जिता ] C; अजिता $E_N$ **6:177** गोप्रपूजनात् ] C; गो प्रपूजनात् $E_N$ **6:177** मौक्तिकं ] AC; मौक्रिकं $E_N$ **6:178** निर्मलं तथा ] A; निर्मलन्तथा $CE_N$ **6:178** रूपवान् ] $CE_N$; रूपवांन् A **6:178** स्त्रीषु वल्लभः ] C; स्त्रीषु वलभः A; स्त्रीषुबल्लभः $E_N$ **6:179** हन्तकारञ्च भिक्षां ] $CE_N$; हतकिं चैव भिक्ष A **6:179** धनिनस्ते प्रजायन्ति अन्यथा दुर्ग्गतिं व्रजेत् ] A; प्रजायते स धनवानन्यथा दुर्ग्गतिं लभेत् C; प्रजायते स धनवानन्यथा दुर्गति लभेत् $E_N$ **6:180** ह्यन्नदानञ्च ] $CE_N$; अन्नदा --- A **6:180** मे शृणु ] $CE_N$; --- A **6:180** अन्नपानं ] C; अंनपाने A; अन्नदानं $E_N$ **6:180** वस्त्रं शय्यां प्रतिश्रयम् ] *em.*; वस्त्र शय्या प्रतिश्रयं A; वस्त्रं शय्या प्रतिश्रयम् C; वस्त्रं शय्यां प्रतिश्रयं $E_N$ **6:181** सुवर्ण्णन्तथा ] $AE_N$; सुवर्ण्णत्तथा C **6:181** भूमिं धर्मेण ] $E_N$; भूमिं धर्म्मेण A; भूमिं धर्मेणं A **6:181** परं ] $CE_N$; पर A **6:181** श्रेष्ठमति ] AC; श्रेष्ठं अति° $E_N$ **6:181** रक्षणम् ] AC; लक्षणं $E_N$ **6:182** यो नित्यं ] C; यो नित्य A; योनित्यं $E_N$ **6:182** परमः स्मृतः ] AC; परमःस्मृतः $E_N$ **6:182** भूतेष्वभयदक्षिणाम् ] AC; भूतेष्व भयदक्षिणम् $E_N$ **6:183** चान्ये काममोहिताः ] $CE_N$; --- ताः A **6:183** तस्माद्रक्षन्ति सत्वानि प्राणिनाञ्जीवितात्यये ] $E_N$; तस्माद्रक्षन्ति सत्वानि प्राणिनां जीवतात्यये C; तस्माद्रक्षन्ति सत्वा हि प्राणिनो जीवितान्यये A **6:184** परमं पदम् ] A; परमां गतिम् $CE_N$

इति दानविधिश्चोक्तो लोकानां हितकाम्यया॥ 6:184॥

दिने दिने च यद्दानं तच्चापि हि निबोध मे।
दन्तधावनताम्बूलं स्रग्धूपञ्च विलेपनम्॥ 6:185॥

रोचनाञ्जनवस्त्राणि दिव्यालङ्कारमण्डनम्।
गजाश्वारोहणं यानमभ्यङ्गोद्वर्तनन्तथा॥ 6:186॥

स्नानं दिव्यसुगन्धैश्च चन्दनागरुकुंकुमैः।
कर्पूरव्यतिमिश्रैश्च लेपं धूपं सपुष्पकम्॥ 6:187॥

मृष्टान्नपानदानानि सुखशय्यानिषीदनम्।
वरनारीरतिसुखं यो ददाति स चाश्नुते।
अदत्त्वा यो ऽभिकांक्षेत स च दुःखी परो भवेत्॥ 6:188॥

देव्युवाच।
किन्तत्पात्रं भवेच्छ्रेयं यस्य दत्तम्महत्फलम्।
अक्षयञ्च भवेद्दानं तन्मे ब्रूहि महेश्वर॥ 6:189॥

ईश्वर उवाच।
मातापितृषु यद्दानं दीनान्धकृपणेषु च।

---

**6:184** °चोक्तो ] $CE_N$; °चोक्त A **6:185** दानं तच्चापि ] $CE_N$; दान तचापि A **6:185** निबोध ] AC; निवोध $E_N$ **6:185** दन्तधावनताम्बूलं ] *conj.*; दन्तधावनतांबूल° $AE_N$; द्रण्तधावनताम्बूलं C **6:185** स्रग्धूपञ्च विलेपनम् ] A; श्रग्धूपञ्च विलेपनम् C; स्रग्धूपश्च विलेपनम् $E_N$ **6:186** रोचनाञ्जनवस्त्राणि ] AC; लोचनाञ्जनवस्त्राणि $E_N$ **6:186** दिव्यालङ्कारमण्डनम् ] $CE_N$; --- नं A **6:186** गजाश्वारोहणं ] A; गजाश्वारोहनं C; गजाश्वारोहनं° $E_N$ **6:186** यानमभ्यङ्गोद्वर्तनन्तथा ] $CE_N$; यानमम्वङ्गोद्वर्त्तनन्तथा A **6:187** °गरुकुंकुमैः ] AC; °गुरुकुंकुमैः $E_N$ **6:187** कर्पूरव्यतिमिश्रैश्च ] A; कर्पूरव्यतिमिश्रेण $CE_N$ **6:187** लेपं धूपं सपुष्पकम् ] C; लेप धूप सपुष्पकम् A; लेपधूपं सपुष्पकं $E_N$ **6:188** मृष्टान्नपानदानानि ] $CE_N$; मृष्टानपानदानानि A **6:188** सुखशय्यानिषीदनम् ] $CE_N$; सुखशय्यानिसीदत A **6:188** °सुखं ] AC; °सौख्यं $E_N$ **6:188** स चाश्नुते ] AC; सचाश्नुते $E_N$ **6:188** यो ऽभिकांक्षेत स च दुःखी ] C; यो --- A; यो ऽभिकांक्षेत सच दुःखी $E_N$ **6:188** परो भवेत् ] A; परोदये $CE_N$ **6:189** भवेच्छ्रेयं ] *em.*; भवे श्रेयं A; भवेच्छ्रेष्टं C; भवेच्छेष्ठं $E_N$ **6:189** अक्षयञ्च भवेद्दानं ] $CE_N$; अक्षञ्च भवे दाने A **6:189** तन्मे ब्रूहि महेश्वर ] $E_N$; तत् मे ब्रूहि महेश्वर C; तत् मे ब्रूहि महेश्वरः A **6:190** दीनान्धकृपणेषु च ] $CE_N$; दीना ⏑̱ --- A

गुरुबन्धुषु कन्यासु तदनन्त्याय कल्प्यते॥ 6 : 190॥

मूर्खविप्रसहस्राणां वेदाध्यायी वरः स्मृतः।
वेदाध्यायिसहस्राणामाहिताग्निस्ततो ऽधिकः॥ 6 : 191॥

आहिताग्निसहस्राणां ब्रह्मवेत्ता ततो ऽधिकः।
तस्मै दत्तं भवेद्दत्तं स वै त्राता वरः स्मृतः॥ 6 : 192॥

अन्येषां कोटिगुणितं दद्यादेकं तु ज्ञानिने।
न तेषां तुल्यमेवं हि स वै त्राता परो वरः॥ 6 : 193॥

यद्दानशक्त्या दुःखानि नरकप्रेतजान्यपि।
अन्यानि च सुघोराणि न भवन्तीह दातरि॥ 6 : 194॥

पापकर्मा यदा कश्चिद्दातुं नोत्सहते मनः।
अपात्रं मन्यते पात्रं तस्य पापस्य तत्फलम्।
धर्माक्षेपेण दुष्टानां सञ्चयं पापलक्षणम्॥ 6 : 195॥

॥ ⊗॥ इति शिवधर्म्मसंग्रहे षष्ठो ऽध्यायः॥ ⊗॥

देव्युवाच।

---

**6:190** गुरुबन्धुषु कन्यासु तदनन्त्याय ] C; --- धुषु कन्यासु तदनंन्याय A; गुरुबन्धुषु कन्यासु तदानन्त्याय $E_N$ **6:190** कल्प्यते ] AC; कल्पते $E_N$ **6:191** वरः ] AC; परः $E_N$ **6:191** °स्राणामाहिता° ] $CE_N$; °स्राणांमाहिता° A **6:192** ब्रह्मवेत्ता ] C; ब्रह्म-वेता A; व्रह्मवेत्ता $E_N$ **6:192** वरः ] A; परः $CE_N$ **6:193** अन्येषां ] $CE_N$; अन्येषा A **6:193** कोटिगुणितं ] *em.*; कोटि --- A; लक्षगुणितं $CE_N$ **6:193** दद्यादेकं तु ] $CE_N$; --- A **6:193** न तेषां तुल्यमेवं हि स वै ] A; न तेषा तुल्यमेव हि स वै C; न तेषान्तुल्यमेवं हि सबै $E_N$ **6:194** यद्दान° ] $CE_N$; यदान° A **6:194** नरकप्रेत-जान्यपि ] $CE_N$; नरकः प्रेत्यजान्यपि A **6:194** च ] $CE_N$; चा A **6:194** दातरि ] $CE_N$; दातरिम् A **6:195** तस्य पापस्य तत्फलम् ] C; तस्य पापस्य त --- A; न भवेत्तस्य तत्फलम् $E_N$ **6:195** धर्माक्षेपेण दुष्टानां सञ्चयं ] C; धर्मक्षेयेण दुष्टानां सञ्चयः $E_N$ **6:195** इति शिवधर्म्मसंग्रहे षष्ठो ऽध्यायः ] $CE_N$; इति शिवधर्म्मसंग्रहे दानधर्मो नामाध्यायः षष्टपटलः A **7:1** देव्युवाच ] A; पार्वत्युवाच $CE_N$

दानधर्मस्त्वया ख्यातस्तीर्थधर्मञ्च मे वद।
स्नाने पुण्यफलं किं स्यात्तीर्थे तीर्थे सुरेश्वर॥ 7:1॥

ईश्वर उवाच।
गंगा सरस्वती पुण्या यमुना गोमती तथा।
चर्मिला चन्द्रभागा च सरयूर्गण्डकी तथा॥ 7:2॥

जम्बूका च शतद्रू च कालिका सुप्रभा तथा।
वितस्ती च विपाशा च नर्मदा च पुनःपुना॥ 7:3॥

गोदावरी महावर्त्ता शर्करावर्त्तमर्जुनी।
कावेरी कौशिकी चैव तृतीया च महानदी॥ 7:4॥

वटङ्का प्रतिकूला च सोमनन्दा च विश्रुता।
करतोया वेत्रवती रेणुका वेणुका च या॥ 7:5॥

आत्रेयगंगा वैतरणी कौशिकी ह्लादनी च या।
स्नावनी च सवर्णा सा कल्माषस्रंसनी शुभा॥ 7:6॥

वशिष्ठा च अपापा च सिन्धुवत्यारुणी तथा।

---

**7:1** धर्मस्त्वया ] C; धर्म्म त्वया A; हर्म्मस्त्वयं $E_N$ **7:1** वद ] $AE_N$; वदः C **7:1** स्नाने ] $CE_N$; स्वीन° A **7:1** सुरेश्वर ] C; सुरेश्वरः $AE_N$ **7:2** सरस्वती ] $AE_N$; श्वरस्वती C **7:2** गोमती तथा ] C; गोम --- A; गोमती हिमा $E_N$ **7:2** चर्मिला ] C; --- A; चर्मिरा $E_N$ **7:2** चन्द्रभागा च ] $E_N$; --- सू ⏑̲ पुण्या A; चन्दभागा च C **7:2** सरयूर्गण्डकी ] *em.*; सरयू गण्डकी $ACE_N$ **7:2** तथा ] AC; तिला $E_N$ **7:3** च शतद्रू च ] AC; च शतद्रु च $E_N$ **7:3** कालिका सुप्रभा तथा ] AC; कास्तिका शारदा जवा $E_N$ **7:3** पुनःपुना ] *conj.*; कूलं पुनः A; कुलम्पुनः C; मालिका सिता $E_N$ **7:4** गोदावरी महावर्त्ता शर्करावर्त्तसर्जनी ] $AE_N$; गो ⏑̲ ⏑̲ ⏑̲ ⏑̲ ⏑̲ ⏑̲ ⏑̲ शर्करावर्तसर्जुनी C **7:4** कावेरी ] *em.*; कावीरी A; कोवेरी C; कौबेरी $E_N$ **7:4** चैव तृतीया च महानदी ] A; चैव तृतीया च महोनदी C; वृद्धा मार्कण्डेयी महानदी $E_N$ **7:5** सोमनन्दा च विश्रुता ] C; सोम --- A; सोमनन्दा त्रिशूलिका $E_N$ **7:5** रेणुका ] A; धेनुका $CE_N$ **7:5** च या ] A; च ⊔ C; प्रभा $E_N$ **7:6** कौशिकी ह्लादनी च या ] AC; ह्लादिनी स्नावनी शिवा $E_N$ **7:6** स्नावनी च ] AC; मात्स्येन्द्री च $E_N$ **7:6** सवर्णा सा ] Cf. Niśvāsamukha 3:6c; सवास्नावां A; सचानासाC; सवानासा $E_N$ **7:6** कल्माषस्रंसनी शुभा ] A; ⊔ श्रंसनी शुभा C; कल्माषा कमला ऽमला $E_N$ **7:7** वसिष्ठा च अपापा च ] A; ⊔ स्ठा च अपापा च C; अपापा च वशिष्ठा च $E_N$ **7:7** सिन्धुवत्यारुणी ] $CE_N$; सिन्धवत्यारुणी A

ताम्रा चैव त्रिसन्ध्या च मन्दाकिन्यः पराः स्मृताः॥ 7:7॥

वाग्वती तैलकोशी च दुन्दुभी नलिनी तथा।
नीलगंगा च बोधा च पूर्णचन्द्रा शशिप्रभा॥ 7:8॥

उपवासरतस्तासु यः स्नायाद्धि सरित्स्विह।
समभ्यर्च्य पितॄन्देवान्स तु मुच्येत किल्बिषात्॥ 7:9॥

नद्येषा पूतसलिला हरमूर्तिरियं स्मृता।
स्नातो यैस्तु विशुद्ध्येत जलमूर्ति नमो ऽस्तु ते॥ 7:10॥

इमं मन्त्रमनुस्मृत्य कुर्यान्नद्यवगाहनम्।
सर्वपापविशुद्धात्मा देहत्यागे दिवं ययौ॥ 7:11॥

शोणपुष्करलोहित्ये मानसे सिन्धुसागरे।
ब्रह्मावर्ते कर्द्दमाले स्नात्वा च लवणोदधौ॥ 7:12॥

सर्वपापविशुद्धात्मा पितृदेवांश्च पूजयेत्।
अग्निर्योनिर्विष्णु रेता ब्रह्मणः पिता रुद्रमूर्तिरापः॥ 7:13॥

एताननुस्मृत्य यः स्नायात्स याति परमां गतिम्।

---

**7:7** ताम्रा चैव त्रिसन्ध्या च ] C; ताम्रा चैव तृसांध्या च A; सीता तापी त्रिसन्ध्या च $E_N$ **7:7** मन्दाकिन्यः पराः स्मृताः स्मृताः ] A; मन्दाकिन्य परा स्मृता C; मन्दाकिन्यमरावती $E_N$ **7:8** वाग्वती तैलकौशी च दुन्दुभी ] Cतै वाग्वती --- भी A; वाग्वती तैल कौशीक्षुरिन्द्राणी $E_N$ **7:8** नलिनी तथा ] $E_N$; नलिन तथा A; नलना तथा C **7:8** बोधा ] AC; वोधा $E_N$ **7:9** उपवासरतस्तासु ] C; उपवासरतस्त्वेष A; उपवासरतस्त्वासु $E_N$ **7:9** यः स्नायाद्धि सरित्स्विह ] C; य स्नायाद्धि सरित्विहः A; यः स्नायद्धिसरित्स्विह $E_N$ **7:9** समभ्यर्च्य पितॄन्देवान् ] *conj.*; समभ्यर्च्य पितृं देवा A; पितॄन् देवान् समभ्यर्च्य C; पितृदेवान् समभ्यर्च्य $E_N$ **7:10** स्मृता ] C$E_N$; स्मृताः A **7:10** यैस्तु ] AC; यस्तु $E_N$ **7:10** नमो ऽस्तु ते ] C; नमो --- A; नमो ऽस्तुते $E_N$ **7:11** इमं मन्त्रमनुस्मृत्य ] C; --- मनुस्मृत्य A; इदं मन्त्रमनुस्मृत्य $E_N$ **7:11** देहत्यागे दिवं ययौ ] AC; देहत्यागे दिवं व्रजेत् $E_N$ **7:12** शोणपुष्करलोहित्ये ] *em.*; षोणपुष्करलोहित्ये A; शोनपुष्करलोहित्ये C; शोणपुष्कर लौहित्ये $E_N$ **7:12** लवणोदधौ ] C$E_N$; लणोदधौ A **7:13** °विशुद्धात्मा ] AC; विशुद्धातृमा $E_N$ **7:13** पितृदेवांश्च ] *em.*; पितृदेवाश्च A; ⊔ श्च C; पितृदेवांश्च $E_N$ **7:13** अग्निर्योनिर्विष्णु रेता ] C; अग्नियोनि --- A; अग्निर्योनिर्विष्णुरेतो $E_N$ **7:13** ब्रह्मणः ] C; --- A; ब्रह्म $E_N$ **7:14** एताननुस्मृत्य ] C (unmetrical); एतामनुस्मृत्य A; एताः संत्स्मृत्य $E_N$ **7:14** यः स्नायात्स ] *em.*; यः स्नात्वा A; यो स्नाया स $E_N$ **7:14** परमां गतिं ] $E_N$; परमं पदम् AC

नदीनदेषु यो देहं कामतो वाप्यकामतः॥ 7 : 14॥

समुत्सृज्य विशुद्धात्मा सोमलोकमियान्नरः।
चन्द्रकान्तिविमानेन सोमकन्याभिरावृतः॥ 7 : 15॥

सुरूपः सोमवत्सौम्यो विचरेत्स यथासुखम्।
सोमलोकात्परिभ्रष्टो जायते विपुले कुले॥ 7 : 16॥

तत्तीर्थं संस्मरेन्नित्यं मरणं चात्र कांक्षते।
अमरेशं प्रभासञ्च नैमिषं पुष्करन्तथा॥ 7 : 17॥

आषाढिं दिण्डिमुण्डिञ्च भारभूतिञ्च लाकुलिम्।
हरिश्चन्द्रं परं गुह्यं गुह्यं मध्यमकेश्वरम्॥ 7 : 18॥

श्रीपर्वतं समाख्यातं जल्पेश्वरमतः परम्।
आम्रातिकेश्वरञ्चैव महाकालन्तथैव च॥ 7 : 19॥

केदारमुत्तमं गुह्यं महारौरवमेव च।
गयां चैव कुरुक्षेत्रं नखलं कनखलं तथा॥ 7 : 20॥

विमलञ्चाट्टहासञ्च माहेन्द्रं भीममष्टमम्।
छगलण्डन्द्विरण्डञ्च माकोटं मण्डलेश्वरम्॥ 7 : 21॥

---

**7:15** सोमलोकमियान्नरः ] A; सोमलोकं स गच्छति $CE_N$ **7:15** चन्द्रकान्तिविमानेन ] A; ⏑̱ ⏑̱ कान्तिविमानेन C; चन्द्रकान्ति विमानेन $E_N$ **7:16** सोमवत्सौम्यो ] *em.*; --- A; सामेसाम्यमा ⏑̱ (?) C; सोमबत्सौम्यो $E_N$ **7:16** विचरेत्स ] $CE_N$; --- ⏑̱ ⏑̱ A **7:16** सोमलोकात्परिभ्रष्टो ] A; सोमलोकपरिभ्रष्टो $CE_N$ **7:17** संस्मरेन्नित्यं ] $CE_N$; संस्मरे नित्यं A **7:17** मरणं चात्र ] AC; मरणंचात्र $E_N$ **7:17** कांक्षते ] $E_N$; काक्षते AC **7:17** अमरेशं ] $CE_N$; अमरेश्वरं A (unmetrical) **7:18** आषाढिं ] $CE_N$; अषढि A **7:18** लाकुलिम् ] $CE_N$; लांगुलिम् A **7:18** हरिश्चन्द्रं परं ] $CE_N$; हरिश्चन्द्रपरं A **7:18** गुह्यं मध्यमकेश्वरम् ] A; गुह्यं मध्यमकेश्वर C; गुह्यमध्यमकेश्वरं $E_N$ **7:19** श्रीपर्वतं समाख्यातं ] $E_N$; श्रीप --- A; ⊔ तं समाख्यातं C **7:19** जल्पेश्वरमतः परम् ] $CE_N$; --- परम् A **7:19** आम्रातिकेश्वरञ्चैव ] AC; आम्रातकेश्वरश्चैव $E_N$ **7:19** तथैव च ] A; तथापि वा C; अथापि वा $E_N$ **7:20** केदारमुत्तमं ] AC; केदारं पशुपं $E_N$ **7:20** महारौरवमेव ] AC; महाभैरवमेव $E_N$ **7:20** गयां चैव ] AC; गयां भीमं $E_N$ **7:21** माहेन्द्रं ] $CE_N$; माहेन्द्र A **7:21** छगलण्डन्द्विरण्डञ्च ] A; छगलण्ड ⊔ ⏑̱ C; छगलाण्डधिरण्डञ्च $E_N$ **7:21** माकोटं ] $E_N$; मकोतम् A; ⏑̱ कोटं C

भस्त्रापदं रुद्रकोटिमविमुक्तं महालयम्।
गोकर्ण्णं भद्रकर्ण्णञ्च स्वर्णाक्षं स्थाणुमष्टमम्॥ 7:22॥

स्नानदर्शनपूजाभिर्मुच्यते सर्वकिल्बिषैः।
गच्छन्ति भित्वा ब्रह्माण्डमेषु स्थानेषु ये मृताः॥ 7:23॥

पञ्चाष्टकपदं दिव्यं यं गत्वा न निवर्तते।
प्रलयस्थायिनो दिव्याः स्थित्यनुग्रहकारिणः॥ 7:24॥

दर्शनादेव गच्छन्ति पदं दिव्यं महालये।
केदारोदकपानाच्च गतिः पञ्चाष्टकी ध्रुवा॥ 7:25॥

विद्यया संयुता ये तु पिबन्ति च शुभं जलम्।
शिवसायोज्यतां यान्ति सर्वावस्थाश्च मानवाः॥ 7:26॥

गुह्यायतनमीशस्य मुच्यते वीक्ष्य किल्बिषैः।
प्राप्नुवन्ति गणत्वं हि ये तत्र निधनङ्गताः॥ 7:27॥

स्थानेष्वेतेषु मनुजः कुर्यादनशनं व्रतम्।
अलाभे ऽन्यत्र वा कुर्यात्स्वयंभूर्यत्र शङ्करः॥ 7:28॥

देव्युवाच।
प्रब्रूह्यनशनस्यापि विधिं सम्यग्महेश्वर।

**7:22** भस्त्रापदं ] AC; भद्रपदं $E_N$ **7:22** रुद्रकोटिमविमुक्तं महालयम् ] $CE_N$; रुद्रको --- A **7:22** गोकर्ण्णं भद्रकर्ण्णञ्च ] $CE_N$; --- ञ्च A **7:22** स्वर्णाक्षं स्थाणुमष्टमम् ] AC; स्वणाख्यं वैद्यनाथकं $E_N$ **7:23** पूजाभिर्मुच्यते ] $AE_N$; पूजाभिम्मुच्यते C **7:23** °किल्बिषैः ] AC; °किल्विषैः $E_N$ **7:23** भित्वा ] $CE_N$; हित्वा A **7:24** पञ्चाष्टकपदं ] AC; पञ्चाष्टक (शैलबान्) पदं $E_N$ **7:24** दिव्यं ] $CE_N$; दिव्य A **7:24** प्रलयस्थायिनो दिव्या ] AC; प्रलये स्थापिता दिव्याः $E_N$ **7:24** स्थित्यनुग्रहकारिणः ] AC; क्षित्यनुग्रहकारिणा $E_N$ **7:25** दिव्यं महालये ] $CE_N$; दि --- A **7:25** केदारोदकपानाच्च ] C; ---रोदकपानाच A; के परोदक्षपालाच्च $E_N$ **7:25** ध्रुवा ] C; ध्रुवाः A; ध्रुवं $E_N$ **7:26** शुभं ] $CE_N$; शुभ A **7:26** शिवसायोज्यतां ] C; शिवसायुज्यतां $AE_N$ **7:26** यान्ति ] $CE_N$; याति A **7:26** सर्वावस्थाश्च मानवाः ] C; सर्वावस्था च मानवाः A; सर्वावस्थाश्च मानवांः $E_N$ **7:27** किल्बिषैः ] AC; किल्विषैः $E_N$ **7:27** तत्र ] $CE_N$; तत्त्‌ A **7:28** मनुजः ] $CE_N$; मनुज A **7:28** अनशनं ] $AE_N$; अनशन° म्स्छ्र **7:28** व्रतम् ] C; --- A; व्रतंः $E_N$ **7:28** अलाभे ऽन्यत्र ] $CE_N$; --- A **7:28** स्वयंभूर्यत्र ] C; स्वयम्भू यत्र A; स्वयंम्भूर्यत्र $E_N$ **7:29** विधिं ] $CE_N$; विधि A **7:29** सम्यग्महेश्वर ] C; सम्यग्महेश्वरः A; सम्यङ्महेश्वर $E_N$

किं वास्य फलमुद्दिष्टं तच्च कीदृक्तपः स्मृतम्॥ 7:29॥

ईश्वर उवाच।
स्वपद्भ्यामेव गन्तव्यं यथोक्तविधिमिच्छता।
अनिवर्तकयोगेन संपूज्य द्विजदेवताम्॥ 7:30॥

द्वात्रिंशत्पिण्डमश्नीयाद्धविष्यं प्रथमे ऽहनि।
एकैकं ह्रासयेत्पिण्डं यावन्निरशनान्तिकम्॥ 7:31॥

पूजयेत्परमेशानं त्रिस्नायी जपतत्परः।
तमेव संस्मरन् विद्वांस्त्यजेत्प्राणान्यतात्मवान्॥ 7:32॥

न केदारसमं तोयन्नाश्वमेधसमः क्रतुः।
न च शैवसमं शास्त्रं न तपो ऽनशनात्परम्॥ 7:33॥

नश्यन्त्यनशनेनाशु पापानि सुतराण्यपि।
रविरश्मिनिपातेन हिमानीव वरानने॥ 7:34॥

सन्यस्तो ऽस्मीति यो ब्रूयात्प्राणैः कण्ठगतैरपि।
न तत्र यान्ति यज्वानो यत्रैत्यनशनी जनः॥ 7:35॥

यदह्ना सुसमारभ्य करोत्यनशनं नरः।
स्वर्गे मणिपुरन्तस्य तदह्नादेव जायते॥ 7:36॥

---

**7:29** किं वास्य ] AC; किञ्चास्य $E_N$ **7:29** फलमुद्दिष्टं ] $AE_N$; फलद्दिष्टं C (unmetrical) **7:29** तच्च ] $CE_N$; तच A **7:29** तपः स्मृतम् ] C; तपः स्मृतः A; त्वया स्मृतं $E_N$ **7:30** ईश्वर ] A; महेश्वर $CE_N$ **7:30** स्वपद्भ्यामेव गन्तव्यं ] $E_N$; सपद्भ्यामेव गन्तव्य A; स्वपद्भ्यामेव गन्तंव्यं C **7:30** °योगेन ] $CE_N$; °योगे च A **7:30** द्विजदेवताम् ] A; द्विजदेवताः C; स्वेष्टदेवतां $E_N$ **7:31** द्वात्रिंशत्पिण्डमश्नीयाद्धविष्यं ] $CE_N$; द्वात्रिंश --- विस्य (?) A **7:31** यावन्निरशनान्तिकम् ] $CE_N$; यावनिरशनान्तिकम् A **7:32** त्रिस्नायी ] C; तृस्नायी A; त्रिःस्नायी $E_N$ **7:32** तमेव ] AC; तमेवं $E_N$ **7:32** संस्मरन् ] C; सस्मरेद् A; संस्मरेद् $E_N$ **7:32** विद्वांस्त्यजेत् ] $E_N$; विद्वांत्यजेत् A; विद्वां त्यजेत् C **7:32** प्राणान् ] $CE_N$; प्राणन् A **7:33** केदारसमं ] $CE_N$; केदारसंम A **7:33** °समः क्रतुः ] $CE_N$; °सम क्रतुः A **7:34** नश्यन्त्यनशनेनाशु ] $CE_N$; --- शनेनाशुः A **7:35** सन्यस्तो ऽस्मीति ] AC; सत्यस्थो ऽस्मीति **7:35** प्राणैः ] $E_N$; प्राणः A; प्राणेः C **7:35** जनः ] $CE_N$; जनाः A **7:36** यदह्ना ] AC; यदन्हात् $E_N$ **7:36** तदह्नादेव ] AC; तदन्हादेव $E_N$

हैमं विमानं संगृह्य गन्धर्वाप्सरसां गणाः।
एकचित्ताः प्रतीक्षन्ते स्वामिनं सेवका इव॥ 7:37॥

दिवि सप्तसहस्राणि वर्षाण्यप्सु मृतो भवेत्।
दश वह्निप्रवेशेषु पतनेषु च षोडश॥ 7:38॥

महाप्रस्थानयानेषु सहस्राण्यैकविंशतिः।
चतुःषष्टिसहस्राणि युधि संत्यक्तविग्रहः॥ 7:39॥

अवध्यत्वं पतत्येष जायते विपुले कुले।
मृतो ऽनाशकयोगेन नासौ च्यवति मानवः॥ 7:40॥

उक्तं हरस्य माहात्म्यं हरेश्चापि निबोध मे।
शालग्रामे मल्लकूपे नित्यं सौकरवे हरिः॥ 7:41॥

मथुरायां स्थितः साक्षाच्छ्वेतद्वीपे तथैव च।
तं दृष्ट्वा पुरुषवटे विष्णुम्मुच्येत किल्बिषैः॥ 7:42॥

स्थानेष्वेषु मृतो यायात्तद्विष्णोः परमं पदम्।
ब्रह्मस्कन्दगणेशानां लोकपालग्रहेषु च॥ 7:43॥

उमाया मातृयक्षाणां पिशाचोरगराक्षसाम्।

---

**7:37** हैमं विमानं संगृह्य ] C; --- ⏑̲ A; हंसविमानं सङ्गृह्य $E_N$ **7:37** गन्धर्वाप्सरसां गणाः ] $CE_N$; गन्धवाप्सरसां गणाः A **7:37** एकचित्ताः ] $CE_N$; एकचिताः A **7:38** मृतो भवेत् ] CA; मृतोभवेत् $E_N$ **7:38** वह्निप्रवेशेषु ] A; वह्निप्रवेशे तु C; वन्हिपवेशे तु $E_N$ **7:39** महाप्रस्थानयानेषु ] AC; महाप्रस्थानयानेन $E_N$ **7:39** सहस्राण्यैकविंशतिः ] C; सहस्राण्यैकविंशति A; सहस्राण्येकविंशतिः $E_N$ **7:39** चतुःषष्टिसहस्राणि ] AC; चतुः षष्टिसहस्राणि $E_N$ **7:39** °विग्रहः ] $CE_N$; °विग्रह --- A **7:40** अवध्यत्वं पतत्येष ] C; --- ष A; अवध्यत्वं पतत्येव $E_N$ **7:40** मृतो ] $AE_N$; मृता C **7:40** नाशकयोगेन नासौ ] C; नाशनयोगेन नासौ A; नासकयोगेन नासो $E_N$ **7:41** हरेश्चापि ] AC; हरश्चापि $E_N$ **7:41** मल्लकूपे ] $CE_N$; मलकूपे A **7:41** सौकरवे हरिः ] $E_N$; सौकरवे हरि A; शौकरवे हरिः C **7:42** मथुरायां स्थितः साक्षाच्छ्वेतद्वीपे तथैव च ] C; मृथुराया स्थित सात्क्ष स्वेतद्वीप तथैव च A; मथुरायां स्थितः साक्षाच्छ्एतद्वीपतथैव च $E_N$ **7:42** मुच्येत किल्बिषैः ] AC; मुच्येतकिल्विषैः $E_N$ **7:43** स्थानेष्वेषु ] C; --- A; स्थानेष्वेतेषु $E_N$ (unmetrical) **7:43** मृतो यायात् तद्विष्णोः ] $E_N$; --- वि ⏑̲ A; मृता यान्ति तद्विष्णोः C **7:43** ब्रह्मस्कन्दगणेशानां ] $E_N$; ब्रह्मस्कन्दगणेशस्य A; ब्रह्मस्कन्दगनेशानां C **7:43** लोकपालग्रहेषु च ] C; लोकपालग्रहस्य च A; लोकपालगृहेषु च $E_N$

ये भक्तास्तद्गतिं यान्ति जपहोमार्चनादिभिः॥ 7:44॥

एतत्ते सर्वमाख्यातमुपवासविधिं शृणु।
मासि मासि च यः कुर्यादेकरात्रमुपोषितः॥ 7:45॥

पञ्चगव्यं शुचिर्भूत्वा पीत्वा मुच्येत पातकैः।
त्र्यहं त्र्यहञ्च भुञ्जीत प्रातः सायमयाचितम्॥ 7:46॥

उपवासं त्र्यहं कुर्यात्प्राजापत्यविधिं चरन्।
एकैकञ्च तथैवाद्यात्पिण्डं पिण्डं स संयमी॥ 7:47॥

अतिकृच्छ्रम्भवेदेतदशेषपापनोदनम्।
त्र्यहन्तप्तोदकं पीत्वा तप्तक्षीरं त्र्यहं पिबेत्॥ 7:48॥

त्र्यहं चाज्यं प्रतप्तन्तु वातादो वासरत्रयम्।
तप्तकृच्छ्रं तदुच्येत रेतोमूत्रादिभक्षणे॥ 7:49॥

कथितं देवदेवेन गाढपापविशोधनम्।
त्रिःस्नायी हरयाजी च जपमौनी सुयन्त्रितः॥ 7:50॥

ब्रह्मचारी हविर्भोजी नियमानि समाचरेत्।
अनेनैव विधानेन जितक्रोधो जितेन्द्रियः।
पराकं तु चरेद्विद्वान्द्वादशाहमभोजनम्॥ 7:51॥

गोमूत्रगोमयपयोदधिसर्पिषा च।

---

**7:44** तद्गतिं ] AC; तां गतिं $E_N$ **7:44** जप° ] $CE_N$; जाप° A **7:45** एतत्ते सर्वमाख्यातमुपवासविधिं शृणु ] A; एतत्ते सर्वमाख्याताामुपवासविधिं शृणु C; एवन्ते सर्वमाख्यातमुपवासविधिं शृणुः $E_N$ **7:45** यः कुर्यादेकरात्रमुपोषितम् ] *em.*; वै (?) कुर्यादेकरात्रमु ⏑ ष ⏑ A; दाः कुर्यादेकरात्रमुपोषितम् C; यः कुर्यादेकरात्रमुपोषितः $E_N$ **7:46** पञ्चगव्यं शुचिर्भूत्वा ] $CE_N$; --- ⏑ A **7:46** प्रातः सायमयाचितम् ] C; प्रात सायमयाचितम् A; प्रातः समय याचितम् $E_N$ **7:47** उपवासं त्र्यहं कुर्यात् ] A; उपवास त्र्यंह कुर्यात् C; उपवासं त्रयहं कुर्य्यात् $E_N$ **7:47** प्राजापत्यविधिं चरन् ] C; प्रजापत्यविधिञ्चरेत् A; प्राजापत्यविधिञ्चरेत् $E_N$ **7:47** पिण्डं पिण्डं ] *em.*; पिण्डं प्रस्त A; पिण्डं C (unmetrical); पिण्डं पिण्ड° $E_N$ **7:47** स संयमी ] AC; °समं यमी $E_N$ **7:48** अशेषपापनोदनम् ] AC; अशेषं पापनोदनं $E_N$ **7:48** त्र्यहं पिबेत् ] $E_N$; --- A; त्यहं पिबेत् C **7:49** त्र्यहं चाज्यं प्रतप्तन्तु वातादो वासरत्रयम् ] $CE_N$; --- वातादो व --- ह A **7:51** द्वादशाहमभोजनम् ] $CE_N$; --- A **7:52** गोमूत्र° ] $CE_N$; --- A **7:52** °सर्पिषा च ] AC; °सर्पिषाच $E_N$

दर्भाम्बुना निरशनेन दिनानि सप्त।
पीत्वा पितृभ्य उपपादितदक्षिणान्तम्।
एतद्भवेत्पवनसान्तपनं शिवोक्तम्॥ 7:52॥

एकैकं वर्द्धयेत्पिण्डं शुक्ले कृष्णे च ह्रासयेत्।
त्रिस्नायी मासमेकन्तु चन्द्रवृद्ध्या व्रतञ्चरेत्॥ 7:53॥

चान्द्रायणमिदं श्रेष्ठं सर्वपापापनोदनम्।
पापी मुच्येत पापेन अपापी स्वर्ग्गगो भवेत्॥ 7:54॥

अष्टावष्टौ समश्नीयात्पिण्डान्मध्यन्दिने स्थिते।
हविष्येण समायुक्तं मुच्यते सर्वपातकैः॥ 7:55॥

अपापी स्वर्ग्गमाप्नोति यतिचान्द्रायणान्नरः।
चतुरो भक्षयेत्पिण्डान्पूर्वाह्णे तु विचक्षणः॥ 7:56॥

सूर्यस्यास्तमने वापि चतुरो भक्षयेत्पुनः।
शिशुचान्द्रायणं ह्येतदुपपातकनाशनम्॥ 7:57॥

मासेनैकेन शुद्धात्मा अपापी स्वर्गतिं व्रजेत्।
त्रिरात्राणि च यः कुर्यात्सर्वकालं शुचिव्रतः॥ 7:58॥

शतेनैकेन पूर्ण्णेन मुच्यते सर्वकिल्बिषैः।
सहस्रेण महापापैर्मुच्यते नात्र संशयः॥ 7:59॥

---

**7:52** सप्त ] CE$_N$; सप्तः A **7:52** पितृभ्य उपपादितदक्षिणान्तम् ] CE$_N$; पवित्र-उ-पदाद्य सदक्षिणा ते A **7:52** भवेत् ] CE$_N$; भवे A **7:53** वर्द्धयेत् ] A; वर्द्धयात् C; बह्क्षयेत् (वर्धयेत्) E$_N$ **7:53** चन्द्रवृद्ध्या व्रतञ्चरेत् ] AC; चन्द्रवृद्ध्याव्रतञ्चरेत् E$_N$ **7:54** श्रेष्ठं सर्वपापापनोदनम् ] CE$_N$; --- A **7:54** पापी मुच्येत पापेन ] CE$_N$; पा ा पेन A **7:55** समश्नीयात् ] CE$_N$; समश्नीया A **7:55** मध्यन्दिने स्थिते ] A; माध्यंदिने स्थिते C; मध्यन्दिनेस्थिते E$_N$ **7:55** हविष्येण समायुक्तं ] AE$_N$; हवि ⏑ ⊔ मायुक्तं C **7:56** यतिचान्द्रायणान्नरः ] C; यतिचान्द्रायणं नरः A; यति चान्द्रायणन्नरः E$_N$ **7:56** भक्षयेत्पिण्डान् ] CE$_N$; भक्षयेत्पिण्डं A **7:56** पूर्वाह्णे तु ] A; पूर्वाह्णे च C; पूर्वा-ह्णेच E$_N$ **7:57** सूर्यस्यास्तमने वापि चतुरो भक्षयेत्पुनः ] CE$_N$; सूर्य --- भ ⏑ येत्पुनः A **7:58** अपापी स्वर्गतिं व्रजेत् ] AC; अपापीस्वर्गतिंव्रजेत् E$_N$ **7:58** कुर्यात् ] CE$_N$; कुर्या A **7:58** शुचिव्रतः ] AC; शुचिब्रतः E$_N$ **7:59** सर्वकिल्बिषैः ] AC; सर्वकिल्विषैः E$_N$ **7:59** महापा° ] AC; महत्पा° E$_N$ **7:59** संशयः ] CE$_N$; --- A

अपापी स्वर्गमाप्नोति च्युतश्च धनवान्भवेत्।
एकान्तरोपवासन्तु द्वादशाब्दं करोति यः॥ 7 : 60॥

महतो मुच्यते पापाच्छुद्धात्मा स्वर्गमाप्नुयात्।
पक्षोपवासं यः कुर्याद्द्वादशाब्दं विकल्मषः॥ 7 : 61॥

स स्वर्गगतिमाप्नोति पापात्मा तु विकल्मषः।
प्रतिवर्षं तु यः कुर्यान्मासैकं संयतेन्द्रियः॥ 7 : 62॥

उपवासं नरो लोके स गतिञ्चोत्तमां व्रजेत्।
महत्पापं विशुद्ध्येत धनवानपि पूजयेत्॥ 7 : 63॥

एकाह्नञ्चैव भुञ्जानो धनवान्जायते नरः।
यावज्जीवं तु यो भुङ्क्ते नक्तमन्नं नरोत्तमः॥ 7 : 64॥

धनधान्यसमृद्धः स्यादुत्तमो जायते नरः।
अयाचितं तु भुंजानो यावज्जीवं व्रते नरः॥ 7 : 65॥

मृते देवत्वमाप्नोति पापान्मुच्येत पातकी।
मधु मांसन्न भक्षेत व्रतमेतदनुत्तमम्॥ 7 : 66॥

एवं यो वर्त्तते नित्यं स याति परमां गतिम्।
न वीरुधो न वृक्षाग्रान्नाकाशात्पर्वतादपि॥ 7 : 67॥

---

**7:60** अपापी स्वर्गमाप्नोति ] $E_N$ ; --- ति A; अपापा स्वर्ग्गमाप्नोति C **7:61** पापाच्छुद्धात्मा ] $CE_N$ ; पापा शुद्धात्मा A **7:61** स्वर्गमाप्नुयात् ] AC; योगमाप्नुयात् $E_N$ **7:61** पक्षोपवासं ] $AE_N$ ; पक्षोपवास C **7:61** वादशाब्दं ] $AE_N$ ; वादशाब्दंम् C **7:62** स स्वर्गगतिमाप्नोति पापात्मा तु विकल्मषः ] AC; *om.* $E_N$ **7:62** कुर्यान्मासैकं संयतेन्द्रियः ] $E_N$ ; कुर्या --- A; कुर्यात् मासैकं संयतेन्द्रियः C **7:63** उपवासं नरो लोके ] C; उपवा ⏑̱ ⏑̱ रो लोके A; उपवासं नरोलोके $E_N$ **7:64** एकाह्नञ्चैव भुञ्जानो ] AC; एकान्हे चैव भुञ्जाने $E_N$ **7:64** यावज्जीवं तु ] A; यावज्जीवञ्च $CE_N$ **7:64** भुङ्क्ते ] AC; भुङ्क्ते $E_N$ **7:65** धनधान्यसमृद्धः स्यादुत्तमो जायते ] AC; धनधान्यसमध्दःस्यादुत्तमोजायते $E_N$ **7:65** यावज्जीवं व्रते नरः ] C; --- A; यावज्जीवंब्रजेन्नरः $E_N$ **7:66** मृते देवत्वमाप्नोति ] $CE_N$ ; --- देवत्वमा --- A **7:66** पापान् मुच्येत पातकी ] C; ⏑̱ पान्मुच्येत पातकी A; पापान्मुच्येत पातकैः $E_N$ **7:66** मधु मांसन्न ] AC; मधुमांसं न $E_N$ **7:66** एतदनुत्तमम् ] AC; एततन्महत्तमं $E_N$ **7:67** नित्यं ] $AE_N$ ; नित्य C **7:67** स याति ] AC; स याति $E_N$ **7:67** वीरुधो ] AC; विरुधो $E_N$ **7:67** वृक्षा° ] AC; बृक्षा° $E_N$

मांसं भवति सुश्रोणि शरीरादेव जायते।
परमांसैः स्वमांसानि यो वर्द्धयितुमिच्छति॥ 7:68॥

व्यक्तो ऽसौ राक्षसो ज्ञेयो मांसन्तस्मान्न भक्षयेत्।
ब्रह्मचर्यं व्रतं कष्टं यश्चरेत्स्त्रीसमन्वितः॥ 7:69॥

इहैव मन्त्राः सिध्यन्ते गतिं व्रजति चोत्तमाम्।
द्रव्यस्य विद्यमानस्य निवृत्तिङ्कुरुते तु यः॥ 7:70॥

स महत्फलमाप्नोति तच्चानन्त्यं भविष्यति।
मत्स्या मांसं सुरा सीधु राक्षसान्नमिदं स्मृतम्॥ 7:71॥

तच्छाम्भवेन मोक्तव्यं गतिमिच्छन्महात्मनाम्।
किन्तस्य दुर्लभं लोके यो ऽनुतिष्ठेत सुव्रतम्॥ 7:72॥

कुरुध्वं सुव्रतं सम्यग्यदि वाञ्छत सद्गतिम्।
पौर्णमास्याममावास्यां चतुर्द्दश्यष्टमीषु च॥ 7:73॥

संक्रान्तौ च युगादौ च विषुवे ऽप्ययने तथा।
यथेप्सया च कर्त्तव्यं ज्येष्ठमध्यमकन्यसम्॥ 7:74॥

रुद्रत्वञ्च गणत्वञ्च चक्रवर्त्तित्वमेव च।
आद्यन्तवासरे ज्येष्ठे ब्रह्मचारी निरामिषः॥ 7:75॥

---

**7:68** वर्द्धयितुमिच्छति ] $CE_N$; व --- A **7:69** व्यक्तो ऽसौ ] $CE_N$; --- सौ A **7:69** ब्रह्मचर्यं व्रतं ] *em.*; ब्रह्मचर्यं व्रत AC; ब्रह्मचर्यव्रतं $E_N$ **7:70** सिध्यन्ते ] A; सिध्यन्ति C; सिध्द्यन्ति $E_N$ **7:70** चोत्तमाम् ] $CE_N$; चोत्तमात् A **7:71** तच्चानन्त्यं ] *em.*; तच्चानन्त्ये A; तच्च नान्त्यं C; तच्चनान्त्यं $E_N$ **7:71** मत्स्या मांसं सुरा सीधु ] A; मांसं मत्स्याः सुरा सीधु C; मांसमत्स्यसुरासिन्धु $E_N$ **7:71** राक्षसान्नमिदं स्मृतम् ] $CE_N$; रा --- A **7:72** तच्छाम्भवेन मोक्तव्यं ] AC; तच्छाम्भवे न भोक्तव्यं $E_N$ **7:72** गतिमिच्छन्महात्मनाम् ] AC; गतिमिच्छेन्न्महात्मनां $E_N$ **7:72** दुर्लभं लोके ] AC; दुर्लभंलोके $E_N$ **7:72** यो ऽनुतिष्ठेत सुव्रतम् ] A; यो ऽनुतिष्ठति सुव्रतम् C; रातु (अनु) तिष्ठति सुव्रतं $E_N$ **7:73** सुव्रतं ] $CE_N$; सुव्रत A **7:73** वाञ्छत सद्गतिम् ] C; वांछति सद्गतिम् A; वाञ्छेत सदग्तिं $E_N$ **7:73** पौर्णमास्याममा° ] $CE_N$; पौर्णमास्यांममा° A **7:73** चतुर्द्दश्यष्टमीषु च ] A; चतुर्दश्यष्टमीदिने $CE_N$ **7:74** विषुवे ऽप्ययने ] AC; विषुवेष्वययने $E_N$ **7:74** ज्येष्ठमध्यमकन्यसम् ] $CE_N$; ⏑ --- A **7:75** रुद्रत्वञ्च गणत्वञ्च ] $CE_N$; ⏑ द्रत्वञ्च ग ⏑ त्वञ्च A

एकाहारो जितक्रोधो मध्ये नक्तं प्रकल्पयेत्।
तथैव नक्तहीनं तु मध्यमं समुदाहृतम्॥ 7:76॥

आद्यन्तव्रतहीनं तु नक्तन्तदपि मध्यमम्।
नक्तं विना तथैवान्नं कन्यसन्तं विदुर्बुधाः॥ 7:77॥

सातत्यमेव कर्त्तव्यं चक्रवर्तित्वकांक्षिणा।
आचार्यस्याग्रतो गन्धैः कृत्वा मण्डलकं शुभम्॥ 7:78॥

पुष्पधूपैः समभ्यर्च्य पञ्चाङ्गेन महीं स्पृशेत्।
यद्यदाचार्यवक्त्रेण निष्क्रमत्यक्षरं स्फुटम्।
तत्तदुच्चारयेत्स्पष्टं गृह्णीयाद्व्रतमुत्तमम्॥ 7:79॥

देव्युवाच।
नक्षत्रदानं प्रब्रूहि हिताय जगतो विभो।
कस्मिन्कस्मिंश्च नक्षत्रे किं किन्दानं प्रशस्यते॥ 7:80॥

भगवानुवाच।
पायसं सर्प्पिषाप्लुत्य कृत्तिकासु सदक्षिणम्।
शिवभक्ताय विप्राय दत्वा यान्त्यमरावतीम्॥ 7:81॥

माषाक्षतेन रोहिण्यां शालिभक्तं घृतान्वितम्।
क्षीरपानन्ततः पश्चाद्देयं स्वर्गमभीच्छता॥ 7:82॥

सवत्सां देवि गां दद्यान्नक्षत्रे मृगशीर्षके।

---

**7:76** मध्ये नक्तं ] AC; मध्यनक्तं $E_N$ **7:77** आद्यन्तव्रतहीनं तु ] AC; आद्यन्तं व्रतहीनन् $E_N$ (unmetrical) **7:77** कन्यसं तं विदुर्बुधाः ] $CE_N$; कन्यस --- A **7:78** सातत्यमेव कर्तव्यं ] $CE_N$; ⏓ ⏓ ⏓ A **7:78** °कांक्षिणा ] $AE_N$; °कांक्षिणाम् C **7:78** गन्धैः ] C; गन्धै A; बन्धैः $E_N$ **7:78** मण्डलकं ] $CE_N$; मण्डलक A **7:79** पुष्पधूपैः ] $CE_N$; पुष्पै धूपै A **7:79** पञ्चाङ्गेन महीं स्पृशेत् ] C; पञ्चगेन मही स्पृशं A; पञ्चाङ्गेन महींस्पृशेत् $E_N$ **7:79** °दुच्चारयेत् ] $CE_N$; °दुचारये A **7:79** गृह्णीयाद् ] $CE_N$; गृह्णीया A **7:80** हिताय जगतो विभो ] $E_N$; जग --- A; हिताय गतो विभो C (unmetrical) **7:80** कस्मिन् कस्मिंश्च नक्षत्रे किं किन्दानं प्रशस्यते ] $CE_N$; --- नक्षत्रे --- दान प्रशस्यते A **7:81** सर्प्पिषाप्लुत्य ] AC; सर्प्पिषा प्लुत्य $E_N$ **7:81** सदक्षिणम् ] C; सदक्षिणः A; सदक्षिणां $E_N$ **7:82** माषाक्षतेन ] $E_N$; मांसाक्षतेन AC **7:82** क्षीरपानन्ततः ] $CE_N$; क्षीरपाणं ततः A **7:82** °मभीच्छता ] C; °मभीच्छताम् A; °मभीप्सता $E_N$ **7:83** सवत्सां देवि गां दद्यान्नक्षत्रे मृगशीर्षके ] $CE_N$; स --- क्षेत्रे मृगशीर्षके A

विहाय मानुषं लोकं याति पौरन्दरं पुरम्॥ 7:83॥

सतैलं कृसरं दद्यान्नक्षत्रे रुद्रदैवते।
उपोष्य नरकान्नेति क्षुरधारान्सुदुस्तरान्॥ 7:84॥

दद्यात्पुनर्वसौ पूपां ब्राह्मणाय तपस्विने।
स्वर्ग्गं भुक्त्वा परिभ्रष्टो जायते विपुले कुले॥ 7:85॥

दद्याच्चामीकरं पुष्ये मङ्क्तायाग्रजन्मने।
अत्यन्धकारे लोके ऽपि भ्राजते सों अशुमानिव॥ 7:86॥

वृषमश्लेषया दद्यात्ताराघटितमेव वा।
अरातीन्दुर्जयान्जित्वा देहपाते सुखी भवेत्॥ 7:87॥

वर्द्धनीतिलपात्राणि यो मघासु प्रयच्छति।
स्वर्ग्गलोकपरिभ्रष्टो गोमान्भवति मानवः॥ 7:88॥

उपोष्य शैवविप्राय शर्करां यः प्रयच्छति।
फाल्गुणीषु गुडैः सार्द्धं धनसौभाग्यकांक्षया॥ 7:89॥

नानाव्यंजनसंयुक्तमुत्तरासु घृतान्वितम्।
दद्यात्षष्टिकभक्तन्तु शक्रलोकमवाप्नुयात्॥ 7:90॥

---

**7:83** पौरन्दरं पुरम् ] A; पौरं प्रन्दरम् CE$_N$ **7:84** दद्यान्नक्षत्रे ] C; दद्या नक्षत्रे A; दद्यान्नक्षत्रे° E$_N$ **7:84** रुद्रदैवते ] *em.*; रुद्रदेवते A; शर्वदेवते C; °शर्वदेवते E$_N$ **7:84** क्षुरधारान् ] *em.*; क्षुरधारा A; खुरधारान् C; क्षुरधारां E$_N$ **7:84** सुदुस्तरान् ] AC; सुदुस्तरां E$_N$ **7:85** पूपां ब्राह्मणाय ] A; पूपां ब्रह्मणाय C; धुपंब्राह्मणाय E$_N$ **7:85** विपुले कुले ] C; विपु --- A; विपुलेकुले E$_N$ **7:86** दद्याच्चामीकरं पुष्ये मङ्क्ताया° ] CE$_N$; --- करं पुष्ये भक्ताया° A **7:86** अत्यन्धकारे ] CE$_N$; अन्धकारे A (unmetrical) **7:86** सों अशुमानिव ] CE$_N$; साशुमानिव A **7:87** वृषमश्लेषया ] E$_N$; वृषश्लेषया A (unmetrical); वृषमशेषया C **7:87** ताराघटितमेव ] C; ताराघट्टिकमेव A; तारघटितमेव E$_N$ **7:87** अरातीन् दुर्जयान् ] CE$_N$; अरातीं दुर्ज्जया A **7:87** देहपाते ] CE$_N$; देहपातो A **7:88** वर्द्धनीतिलपात्राणि ] AC; वर्द्धनीस्तिलपात्राणि E$_N$ **7:88** मघासु ] AC; मद्यासु E$_N$ **7:88** गोमान् भवति मानवः ] CE$_N$; --- A **7:89** शैवविप्राय ] CE$_N$; शैव्यविप्राय A **7:89** शर्करां ] E$_N$; शर्क्करा AC **7:89** फाल्गुणीषु ] A; फल्गुणीषु C; फाल्गुनीषु E$_N$ **7:89** गुडैः सार्द्धं ] CE$_N$; गुडै सार्द्ध A **7:90** °संयुक्तमुत्तरासु ] *em.*; °संयुक्तंमुत्तरासु A; °सयुक्तमुत्तरासु C; °संयुक्त मुत्तरासु E$_N$ **7:90** दद्यात्षष्ठिक° ] CE$_N$; दद्याच्छष्टीक° A

स्रङ्गा (?) प्रदीयते पुम्भिरुत्तरासु सुलोचने।
अत्यद्भुतफलावाप्तिर्भवतीति किमद्भुतम्॥ 7 : 91॥

उपोष्य करिणां दद्याद्रथं हस्तेन भामिनि।
पिष्टकेन कृतं वापि दत्वा यात्यमरालयम्॥ 7 : 92॥

रूपिणीं वृषलीन्दद्याच्चित्रायां त्रिदशेश्वरि।
रमते नन्दनवने गन्धर्वाप्सरसावृतः॥ 7 : 93॥

यद्यदिष्टतमं द्रव्यं स्वातौ दद्यान्नरोत्तमः।
अक्षयान्प्राप्नुयाल्लोकान्दानस्यास्य प्रभावतः॥ 7 : 94॥

पयस्विनीञ्च गां दद्यादनड्वाहमथापि वा।
शकटं ये प्रयच्छन्ति सधान्यं वाससावृतम्॥ 7 : 95॥

विशाखायां पितॄन्देवान्प्रीणयंत्यविकल्पितः।
नरकेषु महादुःखं न प्राप्नोति सुलोचने॥ 7 : 96॥

दद्यात्प्रावरणं वस्त्रं समुपोष्यानुराधया।
तिष्ठेद्युगशतन्देवि शक्रलोके यथेच्छया॥ 7 : 97॥

ज्येष्ठायां मूलकन्दद्याद्ब्राह्मणेभ्यः सपानकम्।
प्रीयन्ते तेन पितरो गच्छेत्स्वर्गमपि ध्रुवम्॥ 7 : 98॥

---

**7:91** स्रङ्गा (?) प्रदीयते ] A; दद्यात्प्रदीयते C; दद्यात्प्रदीपते $E_N$ **7:91** पुम्भिरुत्तरासु ] AC; प्रमिरुचरास $E_N$ **7:91** अत्यद्भुतफला +वा+प्तिर्भवतीति किमद्भुतम् ] C; अत्य --- तीति कि --- तं A; अत्यदभु तफलावाप्तिर्मवतीति किमदभुम $E_N$ **7:92** करिणां ] AC; करिणं $E_N$ **7:92** यात्यमरालयम् ] $CE_N$; यांत्यमरालयम् A **7:93** दद्याच्चित्रायां ] $CE_N$; दद्या चित्रायां A **7:93** त्रिदशेश्वरि ] AC; त्रिदशेश्वरी $E_N$ **7:93** °सरसावृतः ] $CE_N$; °सरसां वृतः A **7:94** दद्यान्नरोत्तमः ] $CE_N$; दद्या नरोत्तमः A **7:94** प्राप्नुयाल्लोकान् ] $CE_N$; प्राप्नुया लोका A **7:95** अनड्वाहमथापि ] AC; अनड्वाह मथापि $E_N$ **7:95** शकटं ] $CE_N$; शाकटां A **7:96** पितॄन् देवान् ] *em.*; पितॄन् देवा A; पितॄं देवान् C; पितृदेवान् $E_N$ **7:96** प्रीणयंत्यविकल्पितः ] A; प्रीणयत्यविकल्पतः $CE_N$ **7:97** दद्यात्प्रावरणं वस्त्रं समुपोष्यानुराधया ] C; दद्या --- पोष्यं ⏑ नुराधया A; दद्यात्प्रावरणंवस्त्रं समुपोष्यानुराधया $E_N$ **7:97** यथेच्छया ] A; यथेप्सया $CE_N$ **7:98** ब्राह्मणेभ्यः ] $E_N$; ब्राह्मणेभ्य A; ब्रह्मणेभ्यः C **7:98** गच्छेत् ] $CE_N$; गच्छे A

दद्यान्मूलफलं मूले ब्राह्मणेभ्यः सदक्षिणम्।
तेनापि पितरस्तृप्ताः स्वर्ग्गं तु प्रविशन्ति ते॥ 7:99॥

पूर्वाषाढासु च दधि प्रदद्यादन्नमेव च।
स्वर्गलोकपरिभ्रष्टो गवाढ्यं कुलमाप्नुयात्॥ 7:100॥

घृतं चैवोदमंथञ्च भूरिशो मधुफाणितम्।
उत्तराषाढविषये सर्वकामविवृद्धये॥ 7:101॥

पायसं चाभिजात्यां तु दद्याद्घृतगुडान्वितम्।
स धर्मपुष्कलं प्राप्य नाकपृष्ठे विराजते॥ 7:102॥

आविकं श्रावणे दद्यात्प्रावारं वस्त्रसंयुतम्।
उपोष्य स्वर्ग्गतिङ्गच्छेच्छ्वेतयानेन मानवः॥ 7:103॥

गोभिर्युक्तन्धनिष्ठासु यानं विप्राय कल्पयेत्।
वस्त्रप्रग्रहसंयुक्तं जायते स नरेश्वरः॥ 7:104॥

छत्रञ्च पादुके गन्धन्दद्यात्सागरुचन्दनम्।
दत्वा शतभिषायोगे स्थानमप्सरसां व्रजेत्॥ 7:105॥

समांसमोदनं दत्वा पूर्वप्रोष्ठपदे प्रिये।

---

**7:99** मूलफलं मूले ] C$^{c}$E$_{N}$; मूलफल मूल A; मूलफलं C$^{ac}$ (unmetrical) **7:99** सदक्षिणम् ] AC; सदक्षिणाम् E$_{N}$ **7:99** तेनापि पितरस्तृप्ताः ] AE$_{N}$; तेनापि तरस्तृप्ताः C (unmetrical) **7:99** स्वर्ग्गं तु प्रविशन्ति ते ] CE$_{N}$; --- ते A **7:100** पूर्वाषाढासु ] AE$_{N}$; पूर्वाशाढासु C **7:100** गवाढ्यं ] C; गवाढ्य° A; गवाद्य° E$_{N}$ **7:101** घृतं ] C; घृत A; घृतं° E$_{N}$ **7:101** चैवोदमंथञ्च ] A; चैवोदमन्थनञ्च C; चैवोदमत्थञ्च E$_{N}$ **7:101** भूरिशो मधुफाणितम् ] C; भूरिषो मधुफाणितम् A; भूरिसोमधुफाणितम् E$_{N}$ **7:101** °विषये ] AC; विसये E$_{N}$ **7:101** सर्वकाम° ] AC; सेवाकाम° E$_{N}$ **7:102** पायसं चाभिजात्यां तु दद्याद्घृतगुडान्वितम् ] CE$_{N}$; पयांस्याभिजितौ दद्या गुडाजेन सन्त ि A **7:102** स धर्मपुष्कलं प्राप्य ] *conj.*; --- प्य A; स धर्मपुष्कल प्राप्य C; स धर्म पुष्कलं प्राप्य E$_{N}$ **7:103** प्रावारं ] AC; प्राकरं E$_{N}$ **7:103** स्वर्ग्गतिङ्ग° ] AC; सग्दतिङ्ग° E$_{N}$ **7:104** गोभिर्युक्तन् ] AE$_{N}$; गोभ्रुक्त° C **7:104** यानं ] CE$_{N}$; यान A **7:104** वस्त्रप्रग्रहसंयुक्तं ] AC; वस्त्र प्रग्रहसंयुक्तं E$_{N}$ **7:105** छत्रञ्च पादुके गन्धन्दद्यात्सागरुचन्दनम् ] C; छत्र पादुके गन्ध दद्या सागरुचन्दनं A; छत्रञ्च पादुके गन्धन्दद्यात्सागुरुचन्दनम् E$_{N}$ **7:105** दत्वा शतभिषायोगे स्थानमप्सरसां ] C; द --- सा A; दत्वा शतभिषायोगे स्थानमप्स ⏑ सो E$_{N}$ **7:106** समांसम् ] AC; समाषम् E$_{N}$

सर्वभक्षफलोपेतं स मृतः सुखभाग्भवेत्॥ 7:106॥

दत्त्वा उत्तरयोगेसु मांसं सौरभमोदनम्।
प्रीणन्ति पितरस्तस्य मृतेन तत्फलं भवेत्॥ 7:107॥

धेनुं प्रदद्याद्रेवत्यां कामदोहां सवाससीम्।
सा प्रीणयति दातारं कामैर्बहुभिरुत्तमैः॥ 7:108॥

अश्विन्यामश्वसंयुक्तं रथं दद्याद्द्विजन्मने।
गजवाजिसमाकीर्णन्तेजस्विकुलमाप्नुयात्॥ 7:109॥

शिवभक्ताय विप्राय भरण्यां तिलधेनुकाम्।
कामधेनुमवाप्नोति यमलोके यशस्विनि॥ 7:110॥

देव्युवाच।
कियन्तं किं फलारूढं कस्मिन्पर्वणि पर्वणि।
दानधर्मस्य देवेश ज्ञातुमिच्छामि कृत्स्नशः॥ 7:111॥

भगवानुवाच।
शतमिन्दुक्षये दानं सहस्रं वासरक्षये।
अक्षयं विषुवे ऽप्याहुर्व्यतीपाते तथैव च॥ 7:112॥

---

**7:106** स मृतः ] AC; समृतः $E_N$ **7:107** दत्त्वा उत्तरयोगेसु ] A; दद्यादुत्तरयोगेस C; दद्यादुत्तरयोगेन $E_N$ **7:107** मांसं ] $E_N$; मान्स A; मांस C **7:107** सौरभमोदनम् ] AC; दध्ना सहौदनं $E_N$ **7:107** प्रीणन्ति पितरस्तस्य ] C$E_N$; प्रीयन्ति पिकरस्तस्य A **7:107** मृतेन तत्फलं ] A; मृतेनन्तत्फलं C; अनेतैतत्फलं भवेत् $E_N$ **7:108** रेवत्यां ] A$E_N$; रैवत्यां C **7:108** सा ] C$E_N$; स A **7:108** प्रीणयति ] A$E_N$; प्रीणयदि C **7:108** कामैर्बहुभिरुत्तमैः ] C$E_N$; --- त्तमैः A **7:109** गजवाजिसमाकीर्णन्तेजस्विकुल-माप्नुयात् ] A; गजवाजिसमायुक्तं तेजस्विकुलमाप्नुयात् C; गवां वाजिसमायुक्त तेजस्वी कुलमाप्नुयात् $E_N$ **7:110** कामधेनुमवाप्नोति ] AC; कामधेनु मवाप्नोति $E_N$ **7:111** कि-यन्तं किं फलारूढं कस्मिन् पर्वणि पर्वणि ] C; कियत्कि यतफलारूढि कस्मिन् धर्वणि पर्वणि A; कियन्त किं फलारुढं कस्मिन् पर्वणि पर्वणि $E_N$ **7:111** दानधर्मस्य देवेश ज्ञातुमिच्छामि कृत्स्नशः ] C; दा --- तुमिच्छामि कृत्स्नशः A; दानधर्मस्य देवेश ज्ञातुमि-च्छामि कृत्सनशः $E_N$ (unmetrical) **7:112** शतमिन्दुक्षये दानं ] C; शतन्मिन्द्रिक्षये A; शतमिन्दुक्षये दान° $E_N$ **7:112** सहस्रं वासरक्षये ] A; सहस्रं तु दिनक्षये C; सहस्न्तु दिनक्षये $E_N$ **7:112** अक्षयं विषुवे ऽप्याहुर्व्य ] *conj.*; अक्षय विषुव न्याहु व्य° A; अक्षये विषुवे प्राहुर्व्य° $E_N$ **7:112** च ] A$E_N$; हि C

युगादौ कोटिदानं स्याद्दशकोत्य्ययनद्वये।
चन्द्रग्रहे ऽर्बुदं विद्धि सूर्यग्रासे तदक्षयम्॥ 7:113॥

दशकोटिर्भवेद्दानं षडशीतिमुखेषु च।
निखर्वं विष्णुपदयोः स्याद्द्विगायनयोरपि॥ 7:114॥

देव्युवाच।
केन धर्मविपाकेन नरो जातिस्मरो भवेत्।
एतदिच्छामि विज्ञातुं भगवन्वक्तुमर्हसि॥ 7:115॥

भगवानुवाच।
क्षीरस्य पूर्णममलांबुजरुद्धवक्त्रम्-
औदुम्बरं सकनकं कलशं यतात्मा।
प्रीतो ऽस्तु सोमतनुरीश इति ब्रुवाण
उद्यत्यनुष्णरुचि कार्तिकपौर्णमास्याम्॥ 7:116॥

सन्तर्पिताय विप्राय दत्वा जातिस्मरो भवेत्।
अथ स्नानविधिं पुण्यं प्रवक्ष्याम्यनुपूर्वशः॥ 7:117॥

यत्कृत्वा देवि पापेभ्यो मुच्यते कर्मणादपि।
नदीं प्राक्स्रवनीङ्गत्वा यः करोति हि सेचनम्॥ 7:118॥

---

**7:113** युगादौ कोटिदानं स्याद् ] *em.*; युगादैः कोटिदान स्या A; युगादैः कोटिदान स्याद् $E_N$ **7:113** दशकोत्य्ययनद्वये ] AC; दशकोत्ययनर्द्वये $E_N$ **7:113** चन्द्रग्रहे ऽर्बुदं विद्धि ] C; चन्द्रग्रहे ऽबुंध विद्धि A; चन्द्रग्रहेवेदविध्दि $E_N$ **7:113** सूर्यग्रासे तदक्षयम् ] A; सूर्यग्रासे तदक्षयत् C; सूर्यग्रासे तक्षयं $E_N$ (unmetrical) **7:114** दशकोटिर्भवेद्दानं ] *conj.*; दशकोटि भवे दानं A; दशकोटि भवेद्दानं C; दशकोटिम्भवेद्दानं $E_N$ **7:114** षडशीतिमुखेषु च ] *conj.*; षडाशीति ⏑̄ --- A; षडाशीतिमुखेसु च C; षडशीतिसुखेषुच $E_N$ **7:114** निखर्वं विष्णुपदयोः ] C; --- र्वं विष्णुपदयोः A; निषर्णविष्णुपदयोः $E_N$ **7:115** केन ] A; येन $CE_N$ **7:115** भगवन् ] $CE_N$; भगवन A **7:116** °रुद्धवक्त्रम् ] म्साC; °रुध्दवक्त्र $E_N$ **7:116** सकनकं ] $CE_N$; सकनक A **7:116** सोमतनुरीश इति ब्रुवाण ] C; --- वाण A; सोमतनुरीश इतिब्रुवाण $E_N$ **7:116** उद्यत्यनुष्णरुचि कार्तिकपौर्णमास्यां ] A; उद्यत्यनुष्णरु चिकार्तिकपुर्णमास्यां C; उद्यत्यनुष्णरुचि कार्तिक पौर्णमास्यां $E_N$ **7:117** अनुपूर्वशः ] AC; अनुपूर्वः $E_N$ (unmetrical) **7:118** यत्कृत्वा ] $AE_N$; यं कृत्वा C **7:118** कर्मणादपि ] A; तत्क्षणादपि $CE_N$ **7:118** नदीं ] $E_N$; नदी AC **7:118** करोति हि सेचनम् ] *em.*; करोति हि षेचनम् A; करोत्यभिषेचनम् $CE_N$

दक्षिणावर्त्तशंखेन तिलाक्षतयुतेन च।
प्रविश्य नाभिमात्राम्बु प्राङ्मुखः शुचिमानसः॥ 7:119॥

शिवं संस्मृत्य मतिमान्सर्वपापैः प्रमुच्यते।
अलाभे दक्षिणावर्त्तशंखस्य शृणु भामिनि॥ 7:120॥

पूर्वोक्तविधिमास्थाय शुक्लवासाः शिवं स्मरेत्।
निच्छिद्रभोजपत्रेण कर्तव्यमभिषेचनम्॥ 7:121॥

पुष्परत्नाम्बुपूर्णेन सो ऽपि निर्मलतां व्रजेत्।
स्नात्वा तीर्थे विपापः स्याद्गोपुच्छोद्धृतवारिणा॥ 7:122॥

प्रस्रावेण च रोहिण्यां श्रद्धया परयान्वितः।
यो धत्ते स्तनतो धारां क्षीरस्य शिरसा नरः॥ 7:123॥

शिवञ्च सुरभीञ्चैव स्मरन्पापैः प्रमुच्यते।
य एवं कुरुते स्नानमिहैव धनवान्भवेत्।
नश्यंत्युपद्रवाः सर्वे परतः स्वर्गमाप्नुयात्॥ 7:124॥

॥ ⊗ ॥ इति शिवधर्मसङ्ग्रहे सप्तमो ऽध्यायः॥ ⊗ ॥

---

**7:119** °शंखेन ] $E_N$; --- A; संखेन C **7:119** तिलाक्षतयुतेन च ] $CE_N$; --- न च A **7:120** शिवं ] $CE_N$; शिव A **7:120** मतिमान् ] $E_N$; मतिमां CA **7:120** सर्वपापैः प्रमुच्यते ] A; स पापैः परिमुच्यते $CE_N$ **7:121** शुक्लवासाः ] C; शुक्लवासा A; शुक्लवास $E_N$ **7:121** स्मरेत् ] $AE_N$; स्मरन् C **7:121** निच्छिद्रभोजपत्रेण ] C; निच्छिद्रयोजपत्रेण A; निश्छिद्राम्भोजपत्रेण $E_N$ **7:121** अभिषेचनम् ] $CE_N$; अभिसेचनम् A **7:122** पुष्परत्नाम्बुपूर्णेन ] C; पुष्प --- A; पुष्परत्नाम्बु पूर्णेषु $E_N$ **7:122** व्रजेत् ] AC; ब्रजेत् $E_N$ **7:122** तीर्थे विपापः ] AC; तीर्थमपापः $E_N$• स्याद् ] $CE_N$; स्या A **7:122** गोपुच्छोद्धृतवारिणा ] AC; गोपुच्छो धृतवारिणा $E_N$ **7:123** प्रस्रावेण च रोहिण्यां ] *conj.*; प्रस्रावेण च रोहिण्याः C; प्रस्रावेन च रोहिण्या A; प्रस्रवेण च रोहिण्याः $E_N$ **7:123** श्रद्धया परयान्वितः ] C; प्रश्रया परियान्वितः A; श्रध्दया परयान्वितः $E_N$ **7:123** यो धत्ते ] C; ये धत्ते A; योधत्ते $E_N$ **7:123** धारां ] $CE_N$; धारा A **7:124** सुरभीञ्चैव स्मरन् ] C; सुरभि चैव स्मरं A; सुरभिञ्चैव स्मरन् $E_N$ **7:124** य एवं ] C; य एव A; एवं यः $E_N$ **7:124** इहैव ] $AE_N$; इहेव $E_N$ **7:124** धनवान् भवेत् ] $CE_N$; --- A **7:124** उपद्रवाः ] $CE_N$; उपद्रवा A **7:124** परतः ] $CE_N$; परत A **7:124** शिवधर्मसङ्ग्रहे सप्तमो ऽध्यायः ] C; शिवधर्मसङ्ग्रहे सप्तमो ऽध्यायः पटलः A; शिव धर्म संग्रहे सप्तमोध्यायः $E_N$

देव्युवाच।
कतरं देवमाश्रित्य उपवासफलम्महत्।
कथं वा पूजनीयास्ते ब्रवीहि परमेश्वर॥ 8:1॥

ईश्वर उवाच।
प्रतिपत्सूपवासी तु ब्रह्माणं पूजयेन्नरः।
ब्रह्मणे नम इत्येवमुभयोरपि पक्षयोः॥ 8:2॥

गन्धपुष्पैश्च धूपैश्च भक्ष्यभोज्यसमन्वितम्।
अब्दमेकं समभ्यर्च्य क्रतूनां फलमाप्नुयात्॥ 8:3॥

अश्वमेधं राजसूयं सौवर्णञ्च गवामयम्।
सप्तभिः सोमसंस्थैश्च नरमेधसमन्वितैः॥ 8:4॥

ब्रह्मा स्वयंभूर्विरिञ्चिः पद्मयोनिः प्रजापतिः।
गीर्वाणः पद्महस्तश्च ओमित्येकाक्षरः प्रभुः॥ 8:5॥

चतुर्वेदधरः स्रष्टा परमेष्ठी चतुर्मुखः।
संज्ञाभिः पूजयेदाभिर्ब्रह्माणममितद्युतिम्॥ 8:6॥

सम्वत्सरेण युक्तात्मा स्वर्ग्गलोके महीयते।
यावज्जीवन्तु कुर्वाणो ब्रह्मलोके महीयते॥ 8:7॥

---

**8:1** कतरं ] $CE_N$; तरम् A (unmetrical) **8:1** ब्रवीहि परमेश्वर ] $CE_N$; प्रब्रवीमि महेश्वरः A **8:2** ईश्वर उवाच ] A; भगवानुवाच $CE_N$ **8:2** प्रतिपत्सूपवासी तु ब्रह्माणं ] *conj.*; प्रति --- ह्मणं A; प्रतिपत्सोपवासी तु ब्राह्मणं C; प्रतिपत्सोपवासीतु ब्राह्मणम् $E_N$ **8:2** पूजयेन्नरः ] A; भोजयेन्नरः $CE_N$ **8:2** ब्रह्मणे नम इत्येवम् ] C; ब्रह्मणे भूय इत्येवम् A; ब्रह्मणे नम इत्येषम् $E_N$ **8:3** गन्धपुष्पैश्च धूपैश्च ] A; गन्धधूपैश्च पुष्पैश्च $CE_N$ **8:3** °समन्वितम् ] AC; °समन्वितम्ः $E_N$ **8:3** अब्दमेकं समभ्यर्च्य क्रतूनां ] $CE_N$; अब्दमेक समंभ्यर्च्य क्रतूना A **8:4** अश्वमेधं ] $CE_N$; अश्वमेध A **8:4** सप्तभिः सोमसंस्थैश्च ] $CE_N$; --- श्च A **8:5** ब्रह्मा स्वयंभूर्विरिञ्चिः ] C; ब्रह्मा स्वयंभूविरिञ्चि A; ब्रह्मा स्वयंभूर्विरीञ्चः $E_N$ **8:5** गीर्वाणः पद्महस्तश्च ] A; ग्रीर्वाणः पद्मभूतश्च $CE_N$ **8:5** ओमित्येकाक्षरः ] $CE_N$; ओमित्येकाक्षर A **8:6** संज्ञाभिः पूजयेदेभिर्ब्रह्माणममितद्युतिम् ] *conj.*; संज्ञाभि पूजयेदेभिब्रह्मणममितद्युतिम् A; संज्ञाभिः पूजयेदाभिर्ब्रह्माणममितद्युतिम् C; संज्ञाभिः पूजयेदेभिब्रह्णममितं द्युति $E_N$ **8:7** सम्वत्सरेण युक्तात्मा स्वर्गलोके महीयते ] $CE_N$; ⏑⏑⏑⏑⏑ A **8:7** ब्रह्मलोके ] AC; ब्रह्यलोके $E_N$

द्वितीये पूजयेदग्निमाज्येनैव तु तर्प्पयेत्।
वैश्वानरो जातवेदा हुतभुग्घव्यवाहनः॥ 8:8॥

देववक्त्रः सर्वभक्षो घृणी च जगदाहकः।
विभावसुः सप्तजिह्वो वरनामेति कीर्त्तितम्॥ 8:9॥

प्रतिमासं समभ्यर्च्य पक्षयोरुभयोरपि।
वर्षेणैकेन शुद्धात्मा स गच्छेदग्निलोकताम्॥ 8:10॥

तृतीये पूजयेद्यक्षं गन्धधूपनिवेदनैः।
उभाभ्यामपि पक्षाभ्यां यावदब्दं भवेदिह॥ 8:11॥

धनन्दास्यन्ति यक्षा हि धनदाद्याः सुपूजिताः।
यावज्जीवन्तु कुर्वाणो धनदस्य पदं व्रजेत्॥ 8:12॥

धनदो यक्षराजश्च वित्तेशो निधिपालकः।
राक्षसाधिपतिश्चैव पिंगलाक्षो विमानगः॥ 8:13॥

रुद्रसखः कुवेरश्च पौलस्त्यकुलनन्दनः।
लोकपालेश्वरश्चैव यक्षेन्द्रः परिकीर्त्तितः॥ 8:14॥

अब्दन्तु पूजयेद्यस्तु यक्षभक्तिसमाश्रितः।
धनधान्यसमृद्धस्तु यावज्जीवं स यक्षराट्॥ 8:15॥

गणेशं पूजयेद्यस्तु गन्धपुष्पसमन्वितः।

---

**8:8** पूजयेदग्निमाज्येनैव ] $E_N$; पूजये देवि आज्येनैव A; पूजयेदग्निमोजेनैव C **8:8** हुतभुग्घव्यवाहनः ] A; हुतभुग् हव्यवाहनः C; हुत भुग्भव्यवाहनः $E_N$ **8:9** जगदाहकः ] AC; जगद्दाहकः $E_N$ **8:9** विभावसुः ] C$E_N$; विभावसु A **8:9** सप्तजिह्वो वरनामेति कीर्त्तितम् ] C; सप्तजिह्वो वर ⏑̱ म्सा; सप्तजिह्व वरनामेतिकीर्तनम् $E_N$ **8:11** तृतीये ] C; त्रितीये A; तृतीयं $E_N$ **8:11** पूजयेद्यक्षं ] A; ल्क् ⏑̱ न् C; यक्षाङ्° $E_N$ **8:11** गन्धधूपनिवेदनैः ] AC; गन्धधूपैर्निवेदनैः $E_N$ **8:11** उभाभ्यामपि ] C$E_N$; उभाभ्यांमपि A **8:11** यावदब्धं ] C$E_N$; यावदब्ध A **8:12** धनदाद्याः ] C$E_N$; धनदद्या ? A **8:12** धनदस्य पदं व्रजेत् ] C$E_N$; ⏑̱ --- A **8:14** रुद्रसखः ] A$E_N$; रुद्रशख C **8:14** पौलस्त्यकुलनन्दनः ] C; पौलस्त्रोकुवनन्दनः A; पौलस्त्यः कुलनन्दनः $E_N$ **8:14** लोकपालेश्वरश्चैव ] A$E_N$; लोकपालेश्वराश्चैव C **8:15** यक्षभक्तिसमाश्रितः ] AC; *om.* $E_N$ **8:15** धनधान्यसमृद्धस्तु ] C; धनधान्यस --- A; *om.* $E_N$ **8:15** यावज्जीवं स यक्षराट् ] C; --- क्षराट् A; यावज्जीबं स यक्षराट् $E_N$

भक्ष्यभोज्यसमाकीर्ण्णं चतुर्थ्युभयपक्षयोः॥ 8:16॥

अब्देनैकेन शुद्धात्मा स याति गणमन्दिरम्।
विघ्नैश्च नाभिभूयेत यो ऽर्चयेद्गणनायकम्॥ 8:17॥

विघ्नेश्वरं गणपतिमेकदन्तङ्गजाननम्।
गजकर्ण्णन्तथा त्र्यक्षन्नागयज्ञोपवीतिनम्॥ 8:18॥

चतुर्भुजञ्च धूम्राक्षं वक्रशुण्डम्विनायकम्।
महोदरञ्च संज्ञाभिः साधकः संयतेन्द्रियः॥ 8:19॥

मोदकैर्लड्डुकैश्चैव मूलकैश्चापि शोभनैः।
न तस्य दुर्लभं किञ्चित्पूजयेद्यो गणाधिपम्॥ 8:20॥

पञ्चम्यां पूजयेन्नागान्पुष्पैः सुरभिशोभनैः।
धूपैः सुरभिगन्धैश्च गुडक्षीरैः सपायसैः॥ 8:21॥

शर्करामधुपुष्पैश्च पक्षयोरुभयोरपि।
सम्वत्सरेण कामानि लभते कांक्षितानि तु॥ 8:22॥

यावज्जीवं समभ्यर्च्य नागलोकमवाप्नुयात्।
स्कन्दं षष्ठयां तु संपूज्य उपवाससमन्वितः॥ 8:23॥

गन्धपुष्पसुधूपेन भक्ष्यभोज्येन संयुतः।
उभाभ्यामपि यक्षाभ्यां पूजयित्वा समाहितः॥ 8:24॥

---

**8:16** चतुर्थ्यु° ] AC; चतुर्थ्यो° $E_N$ **8:17** अब्देनैकेन ] A; अब्देनेकेन C; अब्दैनैकेन $E_N$ **8:18** विघ्नेश्वरं ] $AC^cE_N$; विघ्नश्वरं $C^{ac}$ **8:18** गणपतिमेकदन्तङ्गजाननम् ] $E_N$; गणपतिमेकदन्त --- A; गणपतिमेकदन्तगजाननम् C **8:18** गजकर्ण्णन्तथा त्र्यक्षन्नागयज्ञोपवीतिनम् ] C; --- ज्ञोपवीतिनम् A; गजकर्ण्णन्तथा यक्षं नागयज्ञोपवीतिनम् $E_N$ **8:19** चतुर्भुजञ्च ] AC; चतुभुजश्च $E_N$ **8:19** धूम्राक्षं ] $CE_N$; धूम्राक्ष A **8:19** महोदरञ्च ] AC; महोदरश्च $E_N$ **8:19** संज्ञाभिः साधकः ] $CE_N$; संज्ञाभि साधक A **8:20** लड्डुकैश्चैव ] AC; न्लड्कैश्चैव $E_N$ (unmetrical) **8:20** यो गणाधिपम् ] AC; योगणाधिपम् $E_N$ **8:21** नागान् पुष्पैः सुरभिशोभनैः ] $CE_N$; नागा --- A **8:21** गुडक्षीरैः सपायसैः ] C; गुडक्षीरसपायसैः A; गुडक्षीरैःसपायसैः $E_N$ **8:22** °मधुपुष्पैश्च ] A; °मधुधूपैश्च C; °मधुपूपैश्च $E_N$ **8:22** कामानि लभते ] AC; कामानिलभते $E_N$ **8:23** उपवाससमन्वितः ] AC; उपवास समन्वितः $E_N$ **8:24** गन्धपुष्पसुधूपेन भक्ष्यभोज्येन संयुतः ] C; गन्धपुष्प --- A; गन्धधूपेषु धूपेन भक्ष्यभोज्येन संयुतं $E_N$ **8:24** उभाभ्यामपि ] $CE_N$; --- मपि A

स्कन्दो विशाखः क्रोञ्चारिरुमानन्दो ऽग्निगर्भजः।
नैगमेशो महासेनस्त्रिवर्णः कृत्तिकासुतः॥ 8:25॥

पञ्चच्छटः कुमारश्च देवसेनापतिर्गुहः।
षड्मुखः शक्तिहस्तश्च मयूरवरवाहनः॥ 8:26॥

नामभिः पूजयेदेभिः संयतो मार्ग्गशीर्षतः।
सर्वकामानवाप्नोति वर्षेणैकेन मानवः॥ 8:27॥

स्कन्दाग्निं जुहुयाद्यस्तु पक्षयोरुभयोरपि।
यावज्जीवं समभ्यर्च्य स्कन्दसायुज्यतां व्रजेत्॥ 8:28॥

सप्तम्यां मार्ग्गशीर्षादौ भास्करं पूजयेच्छुचिः।
उपवासेन युक्तात्मा पुष्पधूपविलेपनैः॥ 8:29॥

भक्ष्यभोज्यैश्च विविधैस्तथा होमजपादिभिः।
सम्वत्सरेण युक्तात्मा निर्मलः काममाप्नुयात्॥ 8:30॥

सूर्यलोकं व्रजत्याशु यावज्जीवं प्रपूजनात्।
च्युता धनाढ्या जायन्ते निरुजा दीर्घजीविनः॥ 8:31॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्।
हिरण्यगर्भस्त्रिशिखस्तपनो भास्करो रविः॥ 8:32॥

---

**8:25** विशाखः ] CE$_N$; विशाख A **8:25** °नन्दो ऽग्निगर्भजः ] AC; °नन्दाग्निगर्भजः E$_N$ **8:25** नैगमेशो ] CE$_N$; नैगमेवो A **8:25** महासेनस्त्रिवर्णः ] CE$_N$; महासेन तृवर्ण्णः A **8:26** पञ्चच्छटः ] C; पञ्चशिख A; पञ्चशिखा° E$_N$ **8:26** देवसेनापतिर्गुहः ] CE$_N$; देवसेनापति गुहः A **8:26** षड्मुखः ] AE$_N$; षण्मख C **8:27** मार्ग्गशीर्षतः ] CE$_N$; --- A **8:27** सर्वकामानवाप्नोति ] *em.*; सर्वकाममवाप्नोति C; --- र्वकाममवाप्नोति A; सर्वकाममवाप्नति E$_N$ **8:28** स्कन्दाग्निं जुहुयाद्यस्तु पक्षयोरुभयोरपि ] AC; जुदृयाघस्तु पक्षयोरुमयोरपि E$_N$ **8:28** यावज्जीवं समभ्यर्च्य ] C; यावज्जीव समभ्यर्च्य स्कन्दसायुज्यतां व्रजेत् A; स्कन्दाग्निं समभ्यर्चय E$_N$ (unmetrical) **8:29** मार्ग्गशीर्षादौ ] CE$_N$; मार्ग्गशीषादौ A **8:29** पूजयेच्छुचिः ] CE$_N$; पूजये शुचिः A **8:30** भक्ष्यभोज्यैश्च वि° ] AC; भक्ष्यभोज्यैश्चवि° E$_N$ **8:30** होमजपादिभिः ] CE$_N$; --- A **8:30** युक्तात्मा निर्मलः ] C; युक्तात्मा निर्म्मल A; युक्तात्म निर्मलाः E$_N$ **8:31** सूर्यलोकं ] CE$_N$; सूर्यलोक A **8:31** यावज्जीवं ] CE$_N$; यावज्जीव A **8:31** धनाढ्या ] C; धनाढ A; धनादया E$_N$ (unmetrical) **8:31** निरुजा दीर्घजीविनः ] AC; निरुजादीर्घजीविनः E$_N$ **8:32** आदित्यः ] CE$_N$; आदित्य A **8:32** त्रिशिखस्तपनो ] CE$_N$; तृशिखा ⏑̲ स्तपनो (unmetrical)

लोकसाक्षी जगन्नेत्रं नामभिस्त्वेभिरर्चयेत्।
सर्वकामानवाप्नोति पूजयेद्यो दिवाकरम्॥ 8:33॥

अष्टम्यां मार्गशीर्षस्य शिवनामानमर्चयेत्।
उपवासेन युक्तात्मा गोमूत्रप्राशनेन च॥ 8:34॥

अतिरात्रफलन्तस्य पक्षयोरुभयोरपि।
भक्ष्यभोज्यान्नपानाद्यैरेतत्फलमवाप्नुयात्॥ 8:35॥

देवदेवं समभ्यर्च्य मासे पौषे उपोषितः।
वाजपेयमवाप्नोति गोशकृत्प्राशनेन तु॥ 8:36॥

त्र्यम्बकं पूजयित्वा तु माघे कृष्णे ह्युपोषितः।
लभते हयमेधन्तु पयःसंप्राशनेन तु॥ 8:37॥

स्थाणुं फाल्गुनमासे तु पूजयेदुपवासितः।
दधि प्राश्य विशुद्धात्मा नृमेधफलमाप्नुयात्॥ 8:38॥

हरश्चैत्रे तु सम्पूज्य कृष्णाष्टम्यामुपोषितः।
आज्यं प्राश्य शुचिर्भूत्वा राजसूयमवाप्नुयात्॥ 8:39॥

वैशाखे शंकरं पूज्य उपवासी कुशोदकम्।

---

**8:33** लोकसाक्षी जगन्नेत्रं नामभिस्त्वेभिरर्चयेत् ] CE$_N$; --- त्वेभिरर्चयेत् A **8:33** सर्वकामानवाप्नोति ] *conj.*; सर्वकाममवाप्नोति ACE$_N$ **8:34** गोमूत्र° ] CE$_N$; गोमूत्रा° A **8:35** भक्ष्यभोज्यान्नपानाद्यैरेतत्फलमवाप्नुयात् ] C; भक्ष्यभोज्यानपानाद्यैरेतत्फलमाप् --- A; भक्ष्यभोज्यान्न पानाद्यैरेतत्फलमवाप्नुयात् E$_N$ **8:36** देवदेवं समभ्यर्च्य ] E$_N$; --- A; देवन्देव समभ्यर्च्य C **8:36** उपोषितः ] A; ह्युपोषितः C; हयुपोषित E$_N$ (unmetrical) **8:37** त्र्यम्बकं ] A; त्र्यम्बकं C; र्यम्बकं E$_N$ **8:37** माघे कृष्णे ] AC; माघेकृष्णे E$_N$ **8:37** ह्युपोषितः ] E$_N$; मुपोषितः A; ह्युशोदकः C **8:37** लभते हयमेधन्तु पयःसंप्राशनेन तु ] C; लभते हयमेधन्तु पीयसंप्राशनेन तु A; *om.* E$_N$ **8:38** स्थाणुं फाल्गुनमासे तु ] *em.*; स्थाणुं फाल्गुणमासे तु C; स्तृ?णुं फाल्गुणमासे तु A; स्थाणुं फाल्गुन मासेतु E$_N$ **8:38** दधि प्राश्य विशुद्धात्मा नृमेधफलमाप्नुयात् ] C; दधि प्राश्य विशुद्धात्मा नृमेधफलमाप्नु --- A; दधिप्राश्य विशुद्धात्मानृमेघपुल माप्नुयात् E$_N$ **8:39** हरश्चैत्रे तु सम्पूज्य ] C; --- ज्य A; हरश्चैत्रेतु सम्पूज्य E$_N$ **8:39** आज्यं प्राश्य शुचिर्भूत्वा राजसूयमवाप्नुयात् ] C; आज्यं प्राश्य विशुद्धात्मा निर्मलकाममाप्नुयात् A; आज्यं पाइय शुचिर्भूत्वा राजसूय मच्छाप्नुयात् E$_N$ (unmetrical) **8:40** शंकरं ] CE$_N$; शङ्कर A

प्राशयित्वा जितक्रोधः सौत्रामणिफलं लभेत्॥ 8:40॥

भवं ज्येष्ठे तु संपूज्य सोपवासी शुचिव्रतः।
प्राश्य शृङ्गोदकं गोस्तु सर्वयज्ञफलं लभेत्॥ 8:41॥

आषाढे नीलकण्ठन्तु कृष्णाष्टम्यां समर्च्चयेत्।
शङ्खस्यापस्ततः पीत्वा गोसहस्रफलं भवेत्॥ 8:42॥

पिङ्गलं श्रावणे पूज्य कृष्णाष्टम्यामुपोषितः।
सिद्धार्थमुदकं पीत्वा कन्यादानफलं लभेत्॥ 8:43॥

मासे भाद्रपदे रुद्रं पूजयित्वा ह्युपोषितः।
यवोदकं प्राशयित्वा रुद्रलोके महीयते॥ 8:44॥

ईशानञ्चाश्विने मासे कृष्णाष्टम्यां तु पूजयेत्।
तिलोदकं प्राशयित्वा बहुसौवर्णिकं फलम्॥ 8:45॥

उग्रन्तु कार्त्तिके मासे कृष्णाष्टम्यामुपोषितः।
सौवर्णमुदकं पीत्वा गाणापत्यमवाप्नुयात्॥ 8:46॥

सम्वत्सरन्ततः कृत्वा इष्टकामांल्लभेत सः।
भवेत्क्रतुफलं कामाद्गाणापत्यमकामतः॥ 8:47॥

उभाभ्यामपि पक्षाभ्यां विधिरेष प्रकीर्त्तितः।

---

**8:40** °फलं लभेत् ] AC; °मवाप्नुयात् $E_N$ **8:41** भवं ] AC; शिवं $E_N$ **8:41** शृङ्गोदकं गोस्तु ] C; शृङ्गोदक ⏑̱ स्तु A; शृङ्गोदकं यस्तु $E_N$ **8:42** आषाढे नीलकण्ठन्तु ] $CE_N$; ⏑̱ --- A **8:42** कृष्णाष्टम्यां समर्चयेत् ] C; --- ष्णष्टम्या समर्चयेत् A; कृष्णाष्टम्यामुपोषितः $E_N$ **8:42** पीत्वा गोसहस्रफलं ] AC; पीत्वागोसहस्रफलं $E_N$ **8:42** भवेत् ] A; लभेत् $CE_N$ **8:43** पिङ्गलं ] AC; पिङ्गाक्षं $E_N$ **8:43** सिद्धार्थमुदकं ] $CE_N$; सिद्धर्थमुदक A **8:44** रुद्रं ] $AE_N$; रु ⏑̱ C **8:44** रुद्रलोके महीयते ] $CE_N$; रुद्रलो --- A **8:45** ईशानञ्चाश्विने मासे ] $CE_N$; --- शानञ्चाश्विनो मासे A **8:45** कृष्णाष्टम्यां तु पूजयेत् ] A; कृष्णाष्टम्यां समर्चयेत् $CE_N$ **8:45** तिलोदकं ] $CE_N$; तिलोदक A **8:45** फलम् ] $CE_N$; लभेत् A **8:46** कृष्णाष्टम्यामुपोषितः ] C; कृष्णाष्टम्यांमुपोषितः A; कृष्णाष्टम्यमामुपोषितः $E_N$ (unmetrical) **8:46** सौवर्णमुदकं ] $CE_N$; सुवर्ण्णमुदक A **8:46** गाणापत्य° ] AC; गाणपत्य° $E_N$ **8:47** इष्टकामांल्लभेत ] *em.*; इष्टकामा लभेत A; इष्टान् कामान् लभेत C; इष्टान् कामांल्लभेत $E_N$ **8:47** भवेत्क्रतुफलं कामाद्गाणापत्यमकामतः ] C; भवेत्क्रतु --- त्यमकामतः A; भवेत् क्रतुफलं कामाग्दाणपत्यमकामतः $E_N$ **8:48** विधिरेष प्रकीर्त्तितः ] C; विधिरेषा प्रकीर्त्तिता A; विधिरेषः प्रकीर्तितः $E_N$

नवम्यां संप्रवक्ष्यामि महादेव्याः प्रपूजनम्॥ 8:48॥

उपवासेन संयुक्तः पूजयेन्नामभिः शुभैः।
उमा कात्यायनी देवी दुग्गर्ा भद्रा सुभद्रिका॥ 8:49॥

कालरात्री महागौरी रैवती भूतनायिका।
आर्या प्रकृतिरूपा च गणानाञ्चैव नायिका॥ 8:50॥

नामभिः पूजयेदेभिः पक्षयोरुभयोरपि।
पुष्पैर्धूपैश्च गन्धैश्च वस्त्रालङ्कारभूषणैः॥ 8:51॥

नैवेद्यैश्चोपहारैश्च कन्दमूलफलैस्तथा।
प्राशनैश्च विचित्रैश्च वरदां पूजयेत्सदा॥ 8:52॥

उदकं कुसुमं प्राश्य सक्तुलाजं सधानकम्।
कृसराञ्च पयो मूलं फलं पर्णन्तथैव च॥ 8:53॥

शाकानि च फलञ्चैव तिलानाञ्च खलिन्ततः।
मुद्गानपि समश्नीयात्तथा चैव निरश्नता॥ 8:54॥

प्राशयित्वा तथैतानि सर्वकामानवाप्नुयात्।
आर्द्रकं प्राशयित्वा तु शुक्लभोजी तथा पुनः॥ 8:55॥

लभते सर्वकामांस्तु नवमीसमुपोषितः।

---

**8:48** संप्रवक्षामि ] AC; संप्रवक्षामिः $E_N$ **8:49** संयुक्तः ] $CE_N$; संयुक्त A **8:49** दुग्गर्ा भद्रा ] A; दुग्गर्ा रुद्रा C; दुग्गर्ारुद्रा $E_N$ **8:50** रैवती भूतनायिका ] C; रैवती भूत ⏑̲ --- A; दैवती भूतनायिका $E_N$ **8:50** आर्या प्रकृतिरूपा च ] C; --- कृतिपूपा तु A; आर्या प्रकृतिरूपाच $E_N$ **8:51** पूजयेदेभिः ] $CE_N$; पूजयेदेदि A **8:51** पुष्पैर्धूपैश्च ] A; पुष्पै धूपैश्च C; पुष्पैर्घूपैश्च $E_N$ **8:51** वस्त्रालङ्कारभूषणैः ] $CE_N$; वस्त्राभरणभूषणैः A **8:52** वरदां ] $CE_N$; वरदा A **8:53** कुसुमं ] AC; कुशुमं $E_N$ **8:53** सक्तुलाजं ] A; सक्तुलांज C; सकुलाजं $E_N$ **8:53** सधानकम् ] $CE_N$; सधा --- A **8:53** कृसराञ्च पयो मूलं ] C; --- पयो मूल A; कृशराश्च पयोमूलं $E_N$ **8:53** फलं पर्णन्तथैव ] $E_N$; फलपर्ण्णन्तथैव A; फलं पर्ण्णतथैव C **8:54** खलिन्ततः ] $CE_N$; बलन्ततः A **8:54** समश्नीयात्तथा ] $CE_N$; समश्नीया तथा A **8:55** सर्वकामान् ] A; सर्वान्कामान् $CE_N$ **8:55** आर्द्रकं ] $E_N$; आद्रकं AC **8:55** प्राशयित्वा तु ] AC; प्राशयित्वातु $E_N$ **8:56** सर्वकामांस्तु ] C; सर्वकामन्तु A; सर्वकामास्तु $E_N$ **8:56** नवमीसमुपोषितः ] C; नवमीसमु --- A; नवमी समुपोषितः $E_N$

मरिचं प्राशनं कृत्वा नवमीन्नव यो ऽर्चयेत्॥ 8:56॥

सर्वकामानवाप्नोति देवी च वरदा भवेत्।
कुशप्रस्तरशायी च पञ्चगव्यकृताशनः॥ 8:57॥

नवमी नव संपूज्य देवी दद्याद्वरोत्तमम्।
यमन्दशम्यां संपूज्य मासे वै मार्गशीर्षके॥ 8:58॥

पुष्पैर्गन्धैश्च धूपैश्च भक्ष्यभोज्यसमन्वितैः।
यमाय धर्मराजाय मृत्यवे चान्तकाय च॥ 8:59॥

वैवस्वताय कालाय सर्वलोकक्षयाय च।
उग्रदण्डोग्रहस्ताय महिषासनयायिने॥ 8:60॥

शासित्रे च नमस्तुभ्यं नरकाधिपतये नमः।
नामभिः पूजयेदेभिस्तर्प्पयेच्च तिलोदकैः॥ 8:61॥

उभाभ्यामपि पक्षाभ्यां अब्दमेकं सुयन्त्रितः।
मुच्यते सर्वपापैस्तु न दुःखं नरकोद्भवम्॥ 8:62॥

यावज्जीवार्चनं कृत्वा स गच्छेत्परमाङ्गतिम्।
एकादश्यां तु यो धर्मं पूजयेत शुचिव्रतः॥ 8:63॥

---

**8:56** मरिचं प्राशनं कृत्वा ] $CE_N$; --- चं प्राशयित्वा तु A **8:56** नवमीन्नव यो ऽर्चयेत् ] A; नवमी नव यो ऽर्च्चयेत् C; नवमीं न तु यो ऽर्चयेत् $E_N$ **8:57** सर्वकामानवाप्नोति ] $CE_N$; सर्वकाममवाप्नोति A **8:58** देवी दद्याद् ] $CE_N$; देवी दद्या A **8:58** दशम्यां संपूज्य ] C; दशम्या सपूज्य A; दशम्यां सम्पूज्य $E_N$ **8:59** पुष्पैर्गन्धैश्च धूपैश्च भक्ष्यभोज्यसमन्वितैः ] *conj.*; पुष्पै गन्धैश्च धूपैश्च --- तैः A; पुष्पैर्गन्धैश्च संपूज्य भक्ष्यभोज्यसमन्वितम् C; पुष्पैर्गन्धैश्च सम्पूज्य भक्ष्य भोज्यसमन्वितः $E_N$ **8:59** चान्तकाय ] $CE_N$; चान्तरा?य A **8:60** सर्वलोकक्षयाय ] AC; सर्वलोक क्षयाय $E_N$ **8:60** °दण्डोग्रहस्ताय ] AC; °दण्दोग्रहस्ताय $E_N$ **8:60** °यायिने ] A; °गामिने $CE_N$ **8:61** शासित्रे च नमस्तुभ्यं नरकाधिपतये नमः ] $E_N$ (unmetrical); शासितारं नमस्तुभ्यं नरकाधिपताय च A; शासित्रे च नमस्तुभ्यं नरकायिपतये नमः C (unmetrical) **8:61** पूजयेदेभिस्तर्प्पयेच्च तिलोदकैः ] $CE_N$; पूजयेदेविस्तर्प्पयेच तिलोकदकैः A (unmetrical) **8:62** उभाभ्यामपि पक्षाभ्यां अब्दमेकं सुयन्त्रितः ] $CE_N$; उभा ⏓ --- ब्दमेक सुयन्त्रितं A **8:62** °पापैस्तु ] A; °पापैश्च $CE_N$ **8:62** नरकोद्भवम् ] AC; नरके भवेत् $E_N$ **8:63** परमाङ्गतिम् ] AC; पर माङ्गतिम् $E_N$ **8:63** पूजयेत ] A; पूजयेच्च $CE_N$

गन्धैर्धूपैश्च पुष्पैश्च भक्षैर्न्नानाविधैस्तथा।
धर्मः सत्यं दया क्षान्तिः शौचमाचारमेव च॥ 8:64॥

अहिंसा चाप्यदम्भश्च रक्षा लोकस्य साक्षिणे।
वृषभाय नमस्तुभ्यमदृष्टाय नमो नमः॥ 8:65॥

नामभिः पूजयेदेभिर्धर्मं सत्यं पराक्रमम्।
उभयोः पक्षयोश्चैव वर्षमेकं सुयन्त्रितः॥ 8:66॥

याम्यदुःखैर्विमुक्तस्तु जायते पृथिवीश्वरः।
यावज्जीवं समभ्यर्च्य तर्पयेच्च तिलोदकैः॥ 8:67॥

उत्तमां गतिमाप्नोति याङ्गत्वा न निवर्त्तते।
केशवं पूजयित्वा तु मार्गशीर्षे नरोत्तमः॥ 8:68॥

द्वादश्यां प्राश्य गोमूत्रं अग्निष्टोमफलं लभेत्।
पौषे नारायणं पूज्य द्वादश्यामुपवासितः॥ 8:69॥

ज्योतिष्टोमफलन्तस्य कृत्वा गोमयभक्षणम्।
माधवं माघमासे तु द्वादश्यां समुपोषितः॥ 8:70॥

पूजयित्वा पयः प्राश्य अश्वमेधफलं लभेत्।
गोविन्दं फाल्गुने ऽभ्यर्च्य द्वादश्यामुपवासितः॥ 8:71॥

षोडशीफलमाप्नोति कृत्वा तु दधिभक्षणम्।

---

**8:64** गन्धैर्धूपैश्च ] $E_N$; गन्धैधूपैश्च A; गन्धधूपैश्च C **8:64** भक्षैर्न्नाना° ] $E_N$; भक्षैनाना° AC **8:64** धर्मः ] AC; धर्मं $E_N$ **8:64** शौचमाचारमेव च ] *conj.*; शौचमा ? ⏓ ⏓ A; शौचमाचार एव च C; शौचमाहारमेव च $E_N$ **8:65** अहिंसा ] $CE_N$; --- A **8:65** रक्षा लोकस्य साक्षिणे ] AC; रक्षालोकश्च सक्षिणे $E_N$ **8:66** सत्यं ] $CE_N$; सत्य A **8:66** उभयोः ] $CE_N$; उभयो A **8:66** वर्षमेकं ] $CE_N$; वर्षमेक A **8:67** याम्यदुःखैर्विमुक्तस्तु ] $CE_N$; यम्यदुःखैविमुक्तस्तु A **8:67** तर्पयेच्च तिलोदकैः ] C; तर्पयेच तिलोदकैः A; तर्पयेच्चतिलोदकैः $E_N$ **8:68** उत्तमां गतिमाप्नोति ] $CE_N$; --- प्नोति A **8:68** तु ] AC; च $E_N$ **8:69** गोमूत्रं अग्निष्टोम ] A; गोमूत्रमग्निष्टोम $CE_N$ **8:69** नारायणं ] $E_N$; नारायण A; नारायनं C **8:69** द्वादश्यामुपवासितः ] A; द्वादश्यां समुपोषितः $CE_N$ **8:70** द्वादश्यां समुपोषितः ] $CE_N$; द्वादश्य --- A **8:71** लभेत् ] AC; लभेत $E_N$ **8:71** गोविन्दं फाल्गुने ऽभ्यर्च्य ] C; गोविन्द फाल्गुणे ऽभ्यर्च्य A; फाल्गुनेमासि गोविन्दं $E_N$ **8:71** द्वादश्यामुपवासितः ] A; द्वादश्यां समुपोषितः $CE_N$ **8:72** षोडशीफलमाप्नोति ] AC; षोडशी फलमाप्नोति $E_N$

चैत्रे विष्णुं समभ्यर्च्य द्वादश्यां समुपोषितः॥ 8:72॥

आज्यं वै प्राशयित्वा तु वाजपेयफलं लभेत्।
उपोषितस्तु वैशाखे पूजयेन्मधुसूदनम्॥ 8:73॥

द्वादश्यां प्राश्य दर्भोदमतिरात्रफलं लभेत्।
ज्येष्ठे त्रिविक्रमं पूज्य द्वादश्यामुपवासितः॥ 8:74॥

तिलोदकं प्राशयित्वा आप्तोर्यामफलं लभेत्।
आषाढे वामनं पूज्य द्वादश्यामुपवासितः॥ 8:75॥

फलं प्राश्य विशुद्धात्मा अश्वमेधफलं लभेत्।
श्रावणे श्रीधरं पूज्य द्वादश्यां समुपोषितः॥ 8:76॥

पर्णं प्राश्य विशुद्धात्मा राजसूयफलं लभेत्।
तथा भाद्रे हृषीकेशं संपूज्य विधिवद्बुधः॥ 8:77॥

गवामयस्य यज्ञस्य ततः फलमवाप्नुयात्।
मासे चाश्वयुजे देवं पद्मनाभन्तु पूजयेत्॥ 8:78॥

नरमेधस्य यज्ञस्य फलं लभति मानवः।
दामोदरन्तु संपूज्य कार्तिके मासि यो नरः॥ 8:79॥

उपोषितस्तु द्वादश्यां बहुसौवर्ण्णिकं फलम्।
सम्वत्सरन्तु संपूज्य सर्वकामानवाप्नुयात्॥ 8:80॥

---

**8:72** विष्णुं ] $CE_N$; विष्णु A **8:73** वाजपेयफलं ] C; वाजपेयफल A; वाजपेय फलं $E_N$ **8:73** उपोषितस्तु वैशाखे पूजयेन्म° ] $CE_N$; उपोषि --- जयेन्म° A **8:74** दर्भोदमतिरात्रफलं ] $CE_N$; दभोदमतिरात्रफल A **8:74** लभेत् ] AC; भवेत् $E_N$ **8:74** द्वादश्यामुपवासितः ] A; द्वादश्यां समुपोषितः $CE_N$ **8:75** आप्तोर्यामफलं ] C; आप्तोयामफल A; आप्तोर्योमफलं $E_N$ **8:75** वामनं ] $CE_N$; वामन A **8:75** द्वादश्यामुपवासितः ] A; द्वादश्यां सुसमाहितः $CE_N$ **8:76** अश्वमेधफलं लभेत् ] $CE_N$; अश्व --- त् A **8:77** पर्णं ] $CE_N$; पर्ण्णं A **8:77** राजसूयफलं ] AC; राजसूय फलं $E_N$ **8:77** तथा भाद्रे हृषीकेशं ] $CE_N$; हृषीकेशं भाद्रपदे A **8:78** ततः फलमवाप्नुयात् ] $AE_N$; तदुः फलं लन्भते फलं C **8:78** देवं ] $CE_N$; देव $E_N$ **8:78** पूजयेत् ] $CE_N$; पूजये --- A **8:79** नरमेधस्य यज्ञस्य फलं लभति मानवः ] C; --- ⏓ य ⏓ ⏓ ⏓ ⏓ ⏓ मानवः A; नरमेधस्य यज्ञस्य फलं भवति मानवः $E_N$ **8:80** उपोषितस्तु द्वादश्यां ] AC; उपोषितस्तुद्वादश्यां $E_N$ **8:80** फलम् ] $CE_N$; भवेत्A **8:80** सर्वकामानवाप्नुयात् ] C; सर्वकाममवाप्नुयात् A; सर्वकामवाप्नुयात् $E_N$ (unmetrical)

अपापी क्रतुमाप्नोति पापात्मा मुच्यतें ऽहसा।
यावज्जीवं समभ्यर्च्य पुष्पैर्गन्धैः सुगन्धकैः॥ 8:81॥

भक्ष्यभोज्यैश्च धूपैश्च छत्रध्वजवितानकैः।
हेमजैर्भूषणैर्दिव्यैर्मणिरत्नविचित्रकैः॥ 8:82॥

वस्त्रैः पूजां विचित्रैश्च कृत्वा विष्णुपदम्व्रजेत्।
अनङ्गन्तु त्रयोदश्यां पूजयेद्यो विधानवित्॥ 8:83॥

भक्ष्यभोज्यान्नपानैश्च गन्धधूपस्रगादिभिः।
अनङ्गं मन्मथं काममीशारिं मोहनन्तथा॥ 8:84॥

पञ्चबाणम्धनुर्हस्तमुन्मादञ्च वशङ्करम्।
रतिप्रियं प्रीतिकरं हृदयस्यापहारिणम्॥ 8:85॥

नामभिः पूजयेदेभिः कामदेवं महाबलम्।
मासे मार्गशिरस्यादौ यावत्कार्त्तिकमेव च॥ 8:86॥

सौभाग्यं धनधान्यञ्च पुत्रदारा भवन्ति च।
कामदेवस्य सायुज्यं यवज्जीवस्य पूजनात्॥ 8:87॥

---

**8:81** अपापी क्रतुमाप्नोति ] AC; सुयाजी क्रतु माप्नोती $E_N$ **8:81** पापात्मा मुच्यतें ऽहसा ] $CE_N$; पापात्मा मुच्यते तुसा A **8:81** यावज्जीवं समभ्यर्च्य ] C; यावज्जाव समभ्यच्य A; याज्जीवं समभ्यर्च्य $E_N$ (unmetrical) **8:81** पुष्पैर्गन्धैः सुगन्धकैः ] $E_N$; पुष्पै गन्धै सुगन्ध --- A; पुष्पैगन्धैः सुगन्धकैः C **8:82** भक्ष्यभोज्यैश्च ] $CE_N$; --- श्च A **8:82** छत्रध्वजवितानकैः ] AC; छत्र ध्वजवितानकैः $E_N$ **8:82** हेमजैर्भूषणैर्दिव्यैर्मणिरत्नविचित्रकैः ] C; होमजै भूषणै दिव्यै मणिरत्नविचित्रकैः A; हेमजैर्भूषणैर्दिव्यैर्मणिरत्न विचित्रकैः $E_N$ **8:83** वस्त्रैः पूजां विचित्रैश्च ] *conj.*; वस्त्रपूज्यविचित्रैश्च A; वस्त्रपूजाविचित्रैश्च $CE_N$ **8:83** अनङ्गन्तु ] A; अनङ्गञ्च A; अनङ्गश्च $E_N$ **8:84** भक्ष्यभोज्यान्नपानैश्च ] A; भक्ष्यभोज्यन्नपानैश्च C; भक्ष्यभोज्यान्नपानैष्नैश्च $E_N$ (unmetrical) **8:84** गन्धधूपस्रगादिभिः ] AC; गन्ध धूपस्रगादिभिः $E_N$ **8:84** अनङ्गं मन्मथं काममीशारिं मोहनन्तथा ] $CE_N$; अनङ्ग मन्मथ कामं ईशा --- A **8:85** पञ्चबाणम्धनुर्हस्तमुन्मादञ्च ] C; पञ्चबाणम्धनुहस्तमुन्मादञ्च A; पञ्चवाणधनुर्हस्त उन्मादश्च $E_N$ **8:85** हृदयस्यापहारिणम् ] AC; हृदयं पापहारिणम् $E_N$ **8:86** कामदेवं ] $E_N$; कामदेव AC **8:86** मासे ] $CE_N$; मासि A **8:87** सौभाग्यं धनधान्यञ्च ] AC; सौभाग्यधन धान्यं च $E_N$ **8:87** पुत्रदारा भवन्ति च ] C; पुत्रदार भवन्ति च $AE_N$ **8:87** सायुज्यं ] *em.*; सा --- A; सायोज्यं $CE_N$ **8:87** यवज्जीवस्य ] $CE_N$; --- A

चतुर्दश्यां पुनर्देवं पूजयेत्परमेश्वरम्।
हरं शर्वं भवं त्र्यक्षं शम्भुञ्चैव विभुं शिवम्॥ 8:88॥

स्थाणुञ्चाप्यथ रुद्रञ्च ईशानं शङ्करन्तथा।
पूजयेदेभिः संज्ञाभिर्देवदेवं वृषध्वजम्॥ 8:89॥

मार्गशीर्षात्समारभ्य यावदब्दं व्रतञ्चरेत्।
पुष्पैर्धूपैश्च गन्धैश्च भक्ष्यभोज्यैः सुशोभनैः॥ 8:90॥

अलंकारैश्च विविधैश्छत्रध्वजवितानकैः।
उभयोः पक्षयोश्चैव सर्वकामानवाप्नुयात्॥ 8:91॥

सम्वत्सरेण युक्तात्मा निष्कामस्तु गणो भवेत्।
यावज्जीवेन सायोज्यं पापी मुच्येत किल्बिषैः॥ 8:92॥

अमावास्यां पितॄणां हि मासे वै मार्ग्गशीर्षके।
कर्मणा श्राद्धयुक्तेन पिण्डेन च तिलोदकैः॥ 8:93॥

उद्दिश्य पितरं यस्तु विप्रान्श्राद्धे निमन्त्रयेत्।
आहिताग्नीनधीयानान्सुवृत्तान्सुपथे स्थितम्॥ 8:94॥

हीनाङ्गानतिरिक्ताङ्गान्चक्षुहीनाञ्च वर्ज्जयेत्।

---

**8:88** पुनर्देवं ] CE$_N$; पुनदेवं A **8:88** हरं शर्वं ] CE$_N$; हर शर्व A **8:88** शम्भुञ्चैव ] CE$_N$; शम्भु चैव A **8:88** विभुं शिवम् ] A; शिवं विभुम् C; रिभुं शिवम् E$_N$ **8:89** शङ्करन्तथा ] AE$_N$; शकंरन्तथा C **8:89** रुद्रञ्च ईशानं ] C; रुद्रञ्च ईशान A; रुद्रयं च ईशानं E$_N$ (unmetrical) **8:89** पूजयेदेभिः संज्ञाभिर्देवदेवं ] *conj.*; पूजयेदेभि संज्ञाभिदेवदेवं A; संज्ञाभि पूजयेदाभि देवदेवं C; संज्ञाभिः पूजयेदेभिर्देवदेवं E$_N$ **8:90** मार्गशीर्षात्समारभ्य ] E$_N$; मार्गशीर्षे समारभ्यः A; मार्गशीषात्समारभ्य C **8:90** यावदब्दं ] CE$_N$; यावदब्द A **8:90** पुष्पैर्धूपैश्च गन्धैश्च भक्ष्यभोज्यैः ] CE$_N$; पुष्पै --- भोज्यैः A **8:91** विविधैश्छत्रध्वजवितानकैः ] C; विविधैः छत्रध्वजवितानकैः A; विविधैश्छत्र ध्वजवितानकैः E$_N$ **8:91** सर्वकामानवाप्नुयात् ] *conj.*; सवकाममवाप्नुयात् A; सर्वकाममवाप्नुयात् C; सर्वकामनवाप्नुयात् E$_N$ **8:92** सायोज्यं ] CE$_N$; सायुज्य A **8:93** पितॄणां हि ] *em.*; पितृणां हि A; पितॄणान्तु CE$_N$ **8:93** मासे वै मार्ग्गशीर्षके ] CE$_N$; --- के A **8:93** श्राद्धयुक्तेन ] AC; श्राध्दयुक्तेन E$_N$ **8:94** उद्दिश्य ] E$_N$; उदिश्य AC **8:94** विप्रान् ] C; विप्रां A; विप्रान E$_N$ (unmetrical) **8:94** आहिताग्नीनधीयानान् सुवृत्तान् सुपथे स्थितम् ] C; आहिताग्नीमधीयानं सुवृत्तं सुपथे स्थितम् A; आहिताग्नी न धीयाना सुवृत्तान सुपथे स्थितान् E$_N$ **8:95** हीनाङ्गानतिरिक्ताङ्गान् चक्षुहीनाञ्च वर्जयेत् ] C; हीनांगानतिब्दक्ताङ्गां चक्षुहीनाञ्च वर्ज्जयेत् A; हीनाङ्गानतिरिक्ताङ्गांचक्षुर्हीनांच वर्जयेत् E$_N$

विप्रान्श्रेष्ठतमान्श्राद्धे सर्वरोगविवर्ज्जितान्॥ 8:95॥

आसने कुतपास्तीर्ण्णे नियुञ्जीतोत्तरामुखम्।
भूमौ दर्भोत्तरीयायान्त्रीन्पिण्डान्देवि निर्वपेत्॥ 8:96॥

प्रथमं पितरं मन्ये द्वितीयञ्च पितामहम्।
तृतीयं चैव कर्त्तव्यमेष मे प्रपितामहः॥ 8:97॥

एवं सम्भावयित्वा तु यस्तु भोजयते द्विजान्।
भोजनं खड्गमांसेन पायसं मधुसर्पिषा॥ 8:98॥

सुवर्ण्णं दक्षिणां दद्यादमावास्यान्तिलोदकम्।
पिण्डनिर्वपणञ्चैव कर्त्तव्यं दर्भसंस्तरे॥ 8:99॥

हुत्वाग्निं सर्पिषा तत्र येन मन्त्रेण तच्छृणु।
ओं अग्नये कव्यवाहनाय स्वधायाङ्गिरसे नमः॥ 8:100॥

ओं सोमाय च पितृपतये स्वधायांगिरसे नमः।
ओं यमायाग्निरोचिषे स्वधायाङ्गिरसे नमः॥ 8:101॥

अनेन विधिना पूर्वं हुत्वा सम्यग्घुतासनम्।
पिण्डनिर्वपणं कुर्यादवसव्येन पाणिना॥ 8:102॥

---

**8:95** विप्रान् श्रेष्ठतमान् श्राद्धे सर्वरोगविवर्जितान् ] C; विप्रां श्रेष्ठतमां श्राद्धे सर्वरोगविवर्ज्जिताम् A; विप्रान् श्रेष्ठतमान् श्राध्देसर्वरोगविवर्जितान् $E_N$ **8:96** नियुञ्जितोत्तरामुखम् ] C$E_N$; नियुञ्जितोत्तरामुखे A **8:96** भूमौ ] A$E_N$; भूमो C **8:96** दर्भोत्तरीयायान्त्रीन् पिण्डान्देवि निर्वपेत् ] C; दर्भत्तरीयायां त्रीं पिण्डान्देवि निर्वपेत् A; दर्भोत्तरीयायां त्रीन् पिण्डान् वि निर्वदेत् $E_N$ (unmetrical) **8:97** कर्त्तव्यमेष ] *em.*; कर्त्तव्यंमेष A; मन्तव्यमेष C; मन्तव्य एष $E_N$ **8:97** प्रपितामहः ] C$E_N$; प्रपितामहम् A **8:98** भोजयते ] C$E_N$; भोजयति A **8:98** खड्गमांसेन ] C$E_N$; खड्गमासेन A **8:98** मधुसर्पिषा ] C; मधुस --- म्सा; मधु सर्पिषा $E_N$ **8:99** सुवर्ण्णं दक्षिणां दद्यादमावास्यान् ] C; --- दक्षिणा दद्यामावास्या A; सुवणं दक्षिणान्दद्यादमावास्यान् $E_N$ **8:99** पिण्डनिर्वपणञ्चैव कर्त्तव्यं ] C; पिण्डनिर्वापन चैव कर्त्तव्य A; पिण्डनिर्वपणश्चैव कर्त्तव्यं $E_N$ **8:100** तच्छृणु ] C$E_N$; तशृणु A **8:101** पितृपतये ] C$E_N$; पितृमते A **8:101** यमायाग्निरोचिषे ] C$E_N$; यमायाग्निरो --- A **8:101** स्वधायाङ्गिरसे ] C$E_N$; --- रसे A **8:102** पूर्वं ] C$E_N$; पूर्व A **8:102** सम्यग्घुतासनम् ] *em.*; सम्यक् तासनः A (unmetrical); सम्य ⏑̄ हुतासनम् C; सम्यक हुतासनम् $E_N$ (unmetrical) **8:102** पिण्डनिर्वपणं कुर्यादवसव्येन ] C; पिण्डनिर्वापण कुर्यादवसव्येन A; पिण्डनिर्वापणं कुर्यादपसव्येन $E_N$

प्रथमं निर्वपेत्पिण्डमुद्दिश्य पितरन्नरः।
पितामहं ततः पिण्डं निर्वपेत द्वितीयकम्॥ 8:103॥

तृतीयं निर्वपेत्पिण्डमुद्दिश्य प्रपितामहम्।
तिलोदकेन तान्सिञ्चेत्प्रणम्य शिरसा क्षितौ॥ 8:104॥

अनेन विधिना दत्वा स्पृष्ट्वा वामेन दक्षिणम्।
श्राद्धेन पितरस्तेन यावदासप्तमं कुलम्॥ 8:105॥

उद्धृत्य नरकाद्देवि स्वयं स्वर्गे महीयते।
येषां पुत्रा दुराचाराः पितृदेवविवर्ज्जिताः॥ 8:106॥

न च तीर्थानि सेवन्ते ते नराः पापकर्मिणः।
ते मृता नरकं यान्ति दुःखानि प्राप्नुवन्ति ते॥ 8:107॥

नरके पच्यमानानां त्राता तेषां न विद्यते।
पापकर्मक्षयो येषां मोक्षन्तु नरकाद्भवेत्॥ 8:108॥

पितरः सोमपा विप्रे क्षत्रिये तु हविर्भुजः।
आज्यपा वैश्ययोनौ तु शूद्राणां तु सुकालिनः॥ 8:109॥

यावज्जीवन्तु कुर्वाणः पक्षयोरुभयोरपि।
पापात्मा मुच्यते पापैरपापी स्वर्गमाप्नुयात्॥ 8:110॥

वसवः पितरो ज्ञेया रुद्राश्चैव पितामहाः।
प्रपितामहास्तथादित्या एवं सञ्चिन्त्य पूजयेत्॥ 8:111॥

---

**8:103** पिण्डमुद्दिश्य पितरं नरः ] $E_N$; पिण्डंमुद्दिश्य पित्तरन्नरः A; पिण्डमुद्दिश्य पितरे नरः C **8:103** पितामहं ततः पिण्डं ] *conj.*; पितामहं ततो पिम्य? A; पि ⊔ C; पितामहं समुद्दिश्य $E_N$ **8:103** निर्वपेत ] AC; निर्वपेच्च $E_N$ **8:104** तिलोदकेन तान् सिञ्चेत् ] $CE_N$; ति --- A **8:105** स्पृष्ट्वा ] AC; स्पृत्वा $E_N$ **8:106** उद्धृत्य ] AC; उध्दृत्य $E_N$ **8:106** स्वगर्गे महीयते ] $AE_N$; ⊔ ते C **8:106** दुराचाराः ] $CE_N$; दुराचारा A **8:107** सेवन्ते ] $CE_N$; सेवन्ति A **8:107** पापकर्मिणः ] $E_N$; --- A; पापकारिणः C **8:107** मृता नरकं ] AC; मृतानरकं $E_N$ **8:107** ते ] A; च $CE_N$ **8:108** तेषां ] $AE_N$; तेषा C **8:108** मोक्षन्तु ] A; विमोक्षो $CE_N$ **8:109** हविर्भुजः ] AC; हविर्भूजः $E_N$ **8:109** वैश्ययोनौ ] AC; वैश्ययोन्यै $E_N$ **8:110** कुर्वाणः ] $CE_N$; कुर्वाण A **8:111** पितरो ज्ञेया ] AC; पितरश्चैव $E_N$ **8:111** पितामहाः ] $CE_N$; पितामहा A **8:111** एवं ] $CE_N$; एव A

पौर्णमास्यां दधि प्राश्यं यावकं ताम्रभाजने।
सङ्गृह्योद्गच्छते दद्याद्भक्त्या चन्द्रमसे नरः॥ 8:112॥

तेन दानेन भगवान्प्रीयते मृगलाञ्छनः।
प्रीयन्ते च सुराः सर्वे सोमस्यैति सलोकताम्॥ 8:113॥

शीतांशवे नमस्तुभ्यं महादेवस्य मूर्त्तये।
इदं बलिं गृहाण त्वं मामप्यनुगृहाण च॥ 8:114॥

प्रतिपदि भोजयेद्विप्रान्पूजयित्वा प्रजापतिम्।
सौवर्णमरविन्दन्तु कुर्यान्नामाङ्कितं ततः॥ 8:115॥

ताम्रपात्रे घृतापूर्णे क्षिप्त्वा दद्याद्द्विजन्मने।
ईप्सितं लभते कामं निष्कामो ब्रह्मलोकताम्॥ 8:116॥

सम्पूज्याग्निं द्वितीयायां ब्राह्मणांस्तर्पयेत्पुनः।
तानि नामानि सौवर्णे वह्नेरालिख्य यत्नतः॥ 8:117॥

ताम्रिके सर्पिषा पूर्णे भाजने प्रक्षिपेत च।
तोयपूर्ण्णे घटे स्थाप्य भक्ष्यभोज्यसमन्विते॥ 8:118॥

---

**8:112** पौर्णमास्यां दधिप्रायं यावकं ] $E_N$; पौर्ण्णमास्या दधिप्राश्य यावक A; पौर्णमास्यां दधिप्रायं यावकं C **8:112** सङ्गृह्योद्गच्छते दद्याद्भक्त्या चन्द्रमसे नरः ] C; सं --- द्याद्भ-क्त्या चन्द्रमसे नरः A; सङ्गृह्ये-ॠ-दग्छते दद्याद्भक्त्या चन्द्रमसेनरः $E_N$ **8:113** भगवान् ] $CE_N$; भगवां A **8:113** मृगलाञ्छनः ] $CE_N$; मृगलांच्छणः A **8:113** प्रीयन्ते ] $CE_N$; प्रीयेते A **8:114** शीतांशवे ] AC; शीतङ्गवे $E_N$ **8:114** इदं ] A; अमुं C; इमं $E_N$ **8:114** बलिं त्वं ] $CE_N$; बेलि त्वं A **8:114** मामप्यनुगृहाण च ] $E_N$; मामप्यनुग्रहाय च A; मामप्यनुगृहान च C **8:115** प्रतिपदि भोजयेद्विप्रान् ] $CE_N$; प्रतिङ्गोजये विप्रां A **8:115** पूजयित्वा प्रजापतिम् ] $CE_N$; पू --- ति A **8:115** सौवर्णमरविन्दन्तु ] AC; सौवर्णमरविन्दस्तु $E_N$ **8:115** कुर्यान्नामाङ्कितं ] $CE_N$; कुर्यानामाकितं A **8:115** ततः ] A; तथा $CE_N$ **8:116** घृतापूर्णे ] $CE_N$; घृतपूर्ण A **8:116** क्षिप्त्वा दद्याद् ] AC; क्षिप्ता-दद्याद् $E_N$ **8:116** ईप्सितं लभते कामं निष्कामो ] A; इप्सितान् लभते कामानकामो C; इप्सितांल्लभते कामान्निकामो $E_N$ **8:117** सम्पूज्याग्निं द्वितीयायां ] $CE_N$; सम्पूज्याग्नि द्वितीयं स्या A **8:117** ब्राह्मणांस्तर्पयेत्पुनः ] $E_N$; ब्राह्मणन्तर्पयेत्पुनः AC **8:117** व-ह्नेरालिख्य यत्नतः ] C; वह्नेरालि --- A; वन्हे रालिख्थ यत्नतः $E_N$ **8:118** ताम्रिके सर्पिषा पूर्णे ] $CE_N$; --- म्रिके सर्पिषा पूर्णे A **8:118** प्रक्षिपेत च ] $CE_N$; प्रक्षिपेव च ह A (unmetrical) **8:118** घटे ] AC; घृते $E_N$ **8:118** °समन्विते ] $CE_N$; °समन्वितैः A

उभाभ्यामपि पक्षाभ्यां दद्याद्विप्राय शोभने।
सर्वकामप्रदो वह्निरब्दैकेन भविष्यति॥ 8:119॥

यावज्जीवं कृतेनैव प्रयात्यनलमन्दिरम्।
संपूज्यैलविलन्तस्य नामाङ्काङ्काञ्चनीं गदाम्॥ 8:120॥

क्षिप्त्वा दद्यात्तृतीयायां सघृते ताम्रभाजने।
चतुर्थ्यां रदनं दद्याद्धेमं नामाङ्कितं शुभम्॥ 8:121॥

विघ्नेश्वरस्य देवस्य ताम्रपात्रे घृतान्विते।
विप्रान्सुभोजितान्कृत्वा दद्याद्गक्षं घटानपि॥ 8:122॥

सम्वत्सरेण सिद्धिः स्याद्यावज्जीवं गणेशता।
पञ्चम्यां हेमजं सर्पं दद्याद्विप्राय भोजिते॥ 8:123॥

घृतप्लुतं तु नामाङ्कं ताम्रभाजनसंस्थितम्।
अनन्तं वासुकिं वापि तक्षकं वा त्रिरेखिणम्॥ 8:124॥

पद्मं महाब्जं शंखं वा कुलिकं च महोरगम्।
संपूज्यान्यतमं वापि गन्धधूपस्रगादिभिः॥ 8:125॥

---

**8:119** उभाभ्यामपि ] $CE_N$; उभांभ्यामपि A **8:119** सर्वकामप्रदो वह्निरब्दैकेन ] C; सर्वकामपदो वह्निरब्दैकेन A; सर्वकामप्रदोबन्हिरब्दैकेन $E_N$ **8:120** यावज्जीवं ] *conj.*; यावज्जीव॰ $ACE_N$ **8:120** अनलमन्दिरम् ] AC; अमरमन्दिरम् $E_N$ **8:120** संपूज्यैलविलन्तस्य ] $CE_N$; संपूज्य भविलन्तस्य A **8:120** नामाङ्काङ्काञ्चनीं गदाम् ] $CE_N$; नामाअ --- A **8:121** क्षिप्त्वा दद्यात्तृतीयायां सघृते ताम्रभाजने ] $E_N$; क्षिप्त्वा दद्यात्तृतीयस्यां सघृतं ताम्रभाजने A; ⊔ C **8:121** चतुर्थ्यां रदनं दद्याद्धेमं ] C; चतुर्थ्या वरदं द्याद्धेम A; चतुर्थ्यां रदनन्दद्यादेध्मन् $E_N$ **8:122** विघ्नेश्वरस्य ] AC; विघ्नेवारस्य $E_N$ **8:122** घृतान्विते ] $CE_N$; घृताज्जिने A **8:122** विप्राअन् सुभोजितान् कृत्वा ] *em.*; विप्रां सुभोजितां कृत्वा A; विप्रां सुभोजितं कृत्वा C; विप्रञ्च भोजितं कृत्वा॰ $E_N$ **8:122** दद्याद्गक्षं घटानपि ] C; दद्याद्गक्षघटानपि A; दद्याद्गत्त्या घृतानपि $E_N$ **8:123** सिद्धिः स्याद्यावज्जीवं ] C; सिद्धि स्या यावज्जीव A; सिध्दिः स्पाद्यावज्जीवं $E_N$ **8:123** गणेशता ] C; गणेशताम् $AE_N$ **8:123** हेमजं सर्पं ] $E_N$; हेमजं सर्प A; हेमज सर्प्पं C **8:123** भोजिते ] $E_N$; --- AC **8:124** घृतप्लुतं तु ] $E_N$; --- तन्तु A; ⊔ ⪯ म्स्छ् **8:124** नामाङ्कं ] AC; नामाङ्क $E_N$ **8:124** ताम्रभाजनसंस्थितम् ] $CE_N$; ताम्रभाजनसस्थितम् A **8:124** अनन्तं ] $CE_N$; अनन्त A **8:124** त्रिरेखिणम् ] C; त्रिरेखिनम् $AE_N$ **8:125** महाब्जं ] C; महापद्मजं A (unmetrical); महाकुलं $E_N$ **8:125** संपूज्यान्यतमं वापि ] C; संपूज्यन्यतमं वापि A; संपूज्य च श तवापि $E_N$ **8:125** गन्धधूपस्रगादिभिः ] A; गन्धपुष्पस्रगादिभिः $CE_N$

भक्ष्यभोज्यान्नपानैश्च कामदं पापहारिणम्।
मयूरं हेमजं कृत्वा स्कन्दनामाङ्कितं शुभम्॥ 8:126॥

षष्ठ्यां दद्याच्च विप्राय ताम्रपात्रे घृतान्विते।
तोयपूर्णांश्च कलशान्भक्ष्यभोज्यसमन्वितान्॥ 8:127॥

दत्वा कामानवाप्नोति पक्षयोरुभयोरपि।
सम्वत्सरेण कामांस्तु चिन्तितांल्लभते नरः॥ 8:128॥

पापी मुच्येत पापेन शुद्धात्मा स्कन्दमाप्नुयात्।
अश्वं हेममयं दद्याद्रवेर्नामाङ्कितं बुधः॥ 8:129॥

पक्षयोरुभयोश्चैव सघृते ताम्रभाजने।
वर्षेणैकेन शुद्धात्मा मुच्यते सर्वकिल्बिषैः॥ 8:130॥

यावज्जीवकृतेनैव आदित्यपदमाप्नुयात्।
अष्टम्यां भवनामांकं वृषं दद्याद्द्विजन्मने॥ 8:131॥

उभाभ्यामपि पक्षाभ्यां सघृते ताम्रभाजने।
कलशैर्भक्ष्यसंयुक्तैः पयसा च सुपूरितैः॥ 8:132॥

सम्वत्सरेण शुद्धात्मा प्राप्नुयादीप्सितं फलम्।
यावज्जीवेन गणतां यो ऽर्चयेन्नामभिर्हरम्॥ 8:133॥

---

**8:126** कामदं पापहारिणम् ] AC; कामदर्पापहारिणम् $E_N$ **8:126** मयूरं ] $CE_N$; मयू-र A **8:126** °नामाङ्कितं शुभम् ] $CE_N$; °ना --- A **8:127** षष्ठ्यां दद्याच्च ] $CE_N$; षष्ठ्यान्तद्यातु A **8:127** तोयपूर्णांश्च कलशान् ] $E_N$; तोयपूर्णश्च कलशां A; ⪯ यपूर्णांश्च कलशान् C **8:127** °समन्वितान् ] $CE_N$; °समन्वितम् A **8:128** सम्वत्सरेण कामांस्तु ] *conj.*; सम्वत्सरेण कामस्तु A; सम्वत्सरेणकामांस्तु $E_N$ **8:128** चिन्तितांल्लभते ] $E_N$; चिन्तितं लभते A; चिन्तितान् लभते C **8:129** हेममयं ] $CE_N$; हिममयं A **8:129** दद्याद्रवेर्नामाङ्कितं बुधः ] $E_N$; दद्या ⪯ --- बुधः A; दद्याद्दवेर्नामाङ्कितं बुधः C **8:130** वर्षेणैकेन शुद्धात्मा ] $AE_N$; ⊔ त्मा C **8:131** आदित्य° ] $CE_N$; मादित्य° A **8:131** भवनामांकं ] AC; भव नामांकं $E_N$ **8:131** दद्याद्द्विजात्मने ] $CE_N$; दद्याविजात्मने A **8:132** पक्षाभ्यां ] $CE_N$; पक्षाभ्या A **8:132** कलशैर्भक्ष्यसंयुक्तैः ] $CE_N$; कलशैभक्ष्यसम्यु --- A **8:132** पयसा च सुपूरितैः ] C; --- सुपूरितैः A; पयसा च उपूरितैः $E_N$ **8:133** प्राप्नुयादीप्सितं फलम् ] A; --- प्सितं फलम् C; प्राप्नुयादीप्सितंफलम् $E_N$ **8:133** यो ऽर्चयेन्नामभिर्हरम् ] $CE_N$; यो ऽर्चये नामभिहरम् A

पूर्वोक्तविधिना सिंहं देव्या नामाङ्कितं शुभम्।
दत्वा नवम्यां विप्राय प्रयाति परमाङ्गतिम्॥ 8:134॥

यमनामाङ्कितं हेमं महिषं ताम्रभाजने।
आज्यपूर्णे विनिक्षिप्य पयोघटसमन्विते॥ 8:135॥

दत्त्वा दशम्यां विप्राय भोजिताय तपस्विने।
याम्यदुःखेन मुच्यन्ते महापातकिनो ऽपि ये॥ 8:136॥

सम्वत्सरेण युक्तात्मा जीवान्ते गतिरुत्तमा।
एकादश्यान्तु धर्मस्य वृषं दद्याद्विजन्मने॥ 8:137॥

नामाङ्कं सघृतं न्यस्य ताम्रपात्रे घृतान्विते।
स धर्मगतिमाप्नोति शुद्धः सम्वत्सरेण तु॥ 8:138॥

कामी च लभते कामान्निष्कामी धर्मलोकताम्।
द्वादश्यां गरुडं दद्यान्नानाभक्ष्यसमन्वितम्॥ 8:139॥

पूर्वोक्तेन विधानेन पयोघटसमन्वितम्।
विष्णोर्नाम समुच्चार्य पक्षयोरुभयोरपि॥ 8:140॥

सम्वत्सरेण शुद्धात्मा विपापः क्रतुमाप्नुयात्।

---

**8:134** सिंहं ] CE$_N$; सिंहा A **8:134** प्रयाति ] A; स याति CE$_N$ **8:135** यमनामाङ्कितं ] CE$_N$; यमनामाकितं A **8:135** महिषं ] CE$_N$; महिष A **8:135** आज्यपूर्णे ] C; आज्यपू ⏑ A; आज्यपूर्णं E$_N$ **8:135** पयोघटसमन्विते ] A; पयोघटसमन्वितम् C; पयाघृतसमन्वितम् E$_N$ **8:136** दत्त्वा दशम्यां विप्राय भोजिताय तपस्विने ] E$_N$; दत्त्वा दशम्या विप्राय भोजिताय तपस्विने A; दत्त्वा दशम्या विप्रा ⊔ C **8:136** याम्यदुःखेन मुच्यन्ते ] A; याम्यदुःखैः प्रमुच्यन्ते CE$_N$ **8:136** महापातकिनो ऽपि ये ] AE$_N$; महापातकिनो प्रिये C **8:137** जीवान्ते गतिरुत्तमा ] C; जीवन्ते गतिरुत्तमाः A; जीवान्ते गतिमुत्तमाम् E$_N$ **8:137** दद्याद्विजन्मने ] CE$_N$; दद्याद्विजन्मने A **8:138** नामाङ्कं सघृतं ] AE$_N$; नामाकं सघृते A **8:138** घृतान्विते ] CE$_N$; येपा? --- A **8:138** स धर्मगतिमाप्नोति शुद्धः सम्वत्सरेण तु ] E$_N$; स धर्मगतिमा ⊔ सरेण तु C; --- तिमाप्नोति शुद्धं संवत्सरेण तु A **8:139** कामान् निष्कामी ] *conj.*; कामं निष्कामी A; कामनकामी C; कामं निःकामी E$_N$ **8:139** दद्यान्नानाभक्ष्यसमन्वितम् ] C; दद्या नानाभक्षसमन्वितम् A; दद्यान्नानाभक्षसमन्वितम् E$_N$ **8:140** °समन्वितम् ] AC; °संमन्वितम् E$_N$ **8:140** विष्णो नाम समुच्चार्य ] C; विष्णोर्नाम समुचार्य A; विष्णुर्नाम समुच्चार्य E$_N$

यावज्जीवन्तु संपूज्य भोजनैश्च सदक्षिणैः॥ 8:141॥

विष्णुलोकमवाप्नोति विष्णुना सह मोदते।
सौवर्णन्धनुषं कृत्वा पञ्चबाणसमन्वितम्॥ 8:142॥

कामदेवं समभ्यर्च्य सघृते ताम्रभाजने।
भक्ष्याम्बुपूर्णघटकां विप्रान्संभोज्य दापयेत्॥ 8:143॥

सौभाग्यं धनधान्यञ्च विपाप्मा लभते ध्रुवम्।
यावज्जीवं च सम्पूज्य कामदेवपुरं व्रजेत्॥ 8:144॥

चतुर्दश्यां वृषन्दद्यात्सम्पूज्य परमेश्वरम्।
तस्य नामाङ्कितं कृत्वा ताम्रभाजनसंस्थितम्॥ 8:145॥

प्रदद्याद्विप्रमुख्येभ्यो भोजयित्वा यथाविधि।
उभाभ्यामपि पक्षाभ्यां घटं भक्ष्याम्बुपूरितम्॥ 8:146॥

अब्दात्पापविशुद्धिः स्याद्द्वादशाब्दैर्गणेश्वरः।
यावज्जीवकृतेनैव सायोज्यन्तु महेश्वरे॥ 8:147॥

पौर्णमास्याममावास्यां पक्षयोरुभयोरपि।
श्राद्धपिण्डाप्सुदानेन पितॄन्सन्तर्पयेन्नरः॥ 8:148॥

---

**8:141** यावज्जीवन्तु संपूज्य ] CE$_N$; --- A **8:142** सह मोदते ] AC; सहमोदते E$_N$ **8:142** कृत्वा ] A; दत्त्वा CE$_N$ **8:142** ॰बाण॰ ] CE$_N$; ॰बान॰ A **8:143** कामदेवं ] CE$_N$; कामदेव A **8:143** ताम्रभाजने ] AC; ताम्र भाजने E$_N$ **8:143** भक्ष्याम्बुपूर्णघटकां विप्रान् संभोज्य दापयेत् ] *conj.*; भक्षाम्बुपूर्णघटकां विप्रां संभोज्य दार्पयेत A (unmetrical); भक्ष्याम्बुपूर्णघटकं विप्रान् संभोज्य चार्चयेत् C; भक्षाम्बुपूर्णं घटकं विप्रान्संभोज्य चार्चयेत् E$_N$ **8:144** विपाप्मा लभते ] *em.*; विपापा लभते A; विप्राप्मा लभते C; विपाप्मालभते E$_N$ **8:144** च सम्पूज्य कामदेवपुरं ] C; --- पुरं A; च सम्पूज्य कामदेव पुरं E$_N$ **8:145** चतुर्दश्यां ] CE$_N$; चतुद्दश्या A **8:145** वृषन्दद्यात्सम्पूज्य ] C; वृषन्दद्यात्सपूज्य A; वृषंदद्यात्सम्पूज्य E$_N$ **8:145** ताम्रभाजनसंस्थितम् ] AC; ताम्र भाजनसंस्थितं E$_N$ **8:146** भोजयित्वा ] CE$_N$; योजयित्वा A **8:146** घटं भक्ष्याम्बुपूरितम् ] A; घटान् भक्ष्याम्बुपूरितान् C; घटान् भक्ष्याम्बुपूरितान् E$_N$ **8:147** अब्दात्पापविशुद्धिः स्याद् ] C; अब्दात्पापविशुद्धि स्यां A; अष्दात्पापविशुद्धिः स्याद् E$_N$ **8:147** द्वादशाब्दैर्गणेश्वरः ] E$_N$; द्वादशाब्दै गणेश्वरः AC **8:147** यावज्जीवकृतेनैव ] CE$_N$; यावज्जीव --- A **8:147** सायोज्यन्तु ] C; --- A; सायुज्यन्तु E$_N$ **8:147** महेश्वरे ] E$_N$; --- श्वरे A; महेश्वरः C **8:148** श्राद्धपिण्डाप्सुदानेन ] C; श्राद्धपिण्डासदानेन A; श्राध्दपिण्डासुदानेन E$_N$ **8:148** पितॄन् सन्तर्पयेन्नरः ] C; पितॄ तर्प्पयेन्नरः A; पितृन् सन्तर्पयेन्नरः E$_N$

सौवर्णं पुरुषं कृत्वा पितृनामाङ्कितं बुधः।
प्रदद्याद्विप्रमुख्येभ्यः ताम्रस्थन्तु घृतप्लुतम्॥ 8:149॥

भक्ष्याम्बुपूर्णघटकान्दत्वा चैव विकल्मषः।
अब्देनैकेन युक्तात्मा विपापी काममीप्सितम्॥ 8:150॥

यावज्जीवकृतेनैव सुतृप्ताः पितरो भवेत्।
पितॄणां पदमाप्नोति भ्रष्टो भवति चोत्तमः॥ 8:151॥

धनधान्यसमृद्धस्तु बहुपुत्रः प्रजायते।
देवानां पूजने ह्येष विधिरुक्तो मयानघाः।
देव्याशंकरसंवादं तन्मया परिकीर्त्तितम्॥ 8:152॥

॥ ⊗॥ इति शिवधर्मसंग्रहे ऽष्टमो ऽध्यायः॥ ⊗॥

देव्युवाच।

वेदधर्मः कथं देव कर्त्तव्यो विधिमिच्छता।
स्वर्गापवर्गहेतोश्च प्रसादाद्वक्तुमर्हसि॥ 9:1॥

ईश्वर उवाच।
मेखली दण्डधारी च सन्ध्योपासनतत्परः।

---

**8:149** सौवर्णं पुरुषं ] *em.*; सौवर्ण पुरुषं AC; सौवर्णपुरुषं $E_N$ **8:149** ताम्रस्थन्तु घृतप्लुतम् ] C; ताम्रंस्थन्तु घृतप्लुतम् A; ताम्रस्थन्तु घटप्लुतम् $E_N$ **8:150** भक्ष्याम्बुपूर्णघटकान् ] *conj.*; भक्षाबुपूर्णन्सटका? A; भक्ष्याम्बुपूर्णघटकं C; भक्षाम्बुपूर्णघटकं $E_N$ **8:150** विकल्मषः ] A$E_N$; विकल्मकः C **8:150** अब्देनैकेन युक्तात्मा विपापी काममीप्सितम् ] C$E_N$; अब्देनै ⍽ --- काममीप्सित A **8:151** यावज्जीवकृतेनैव ] C$E_N$; याज्जीवकृतेन तु A **8:151** सुतृप्ताः पितरो भवेत् ] A; भोजनैश्च सदक्षिणैः C$E_N$ **8:152** °समृद्धस्तु ] C; °समृद्धिस्तु A; °समृध्दन्तु $E_N$ **8:152** देवानां पूजने ह्येष ] A; देवाना पूजने ह्येष C; देवानां पूजयेद्धेष $E_N$ **8:152** मयानघाः ] *em.*; मयानघः A; मयानघ C; मयानद्याः $E_N$ **8:152** देव्याशंकरसंवादं ] AC; देव्या शंकरसंवाद $E_N$ **8:152** इति शिवधर्मसंग्रहे ] C; --- सङ्ग्रहे A; इति शिव धर्मसङ्ग्रहे $E_N$ **8:152** °अमो ऽध्यायः ] C$E_N$; °अमपटलः A **9:1** कर्त्तव्यो विधिमिच्छता ] C; कर्त्तव्यो विधिपृच्छता A; कर्त्तव्योविधिमिच्छता $E_N$ **9:1** वक्तुमर्हसि ] AC; बक्तुमर्हसि $E_N$ **9:2** सन्ध्योपासन° ] C$E_N$; सन्धोपासन° A

स्वाध्यायी होमजापी च भिक्षाशी त्यक्तमैथुनी॥ 9:2॥

मधुमांसनिवृत्तश्च सक्षारलवणानि च।
वृक्षारोहणमेकान्तं ताम्बूलञ्च न भक्षयेत्॥ 9:3॥

वर्जयेत्प्रेक्षणं कोपमघृष्टा स्नानमाचरेत्।
स्त्रीप्रेक्षणन्न कुर्वीत माल्यधूपञ्च वर्जयेत्॥ 9:4॥

वर्जयेदञ्जनं गन्धन्तथा विषमलंघनम्।
षट्त्रिंशदब्दिका चर्या गुरोस्त्रैवेदिकं व्रतम्॥ 9:5॥

तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा।
ब्रह्मचारिव्रतं ह्येतदुक्तमेव मया पुरा॥ 9:6॥

विप्लुतो नरकं याति आचारात्स्वर्ग्गतिं व्रजेत्।
कृतदारो गृहे यस्तु यजेद्यज्ञं सदक्षिणम्॥ 9:7॥

स्वाध्यायं सततं कुर्यात्सायं प्रातश्च हावनम्।
बलिञ्च वैश्वदेवानामतिथेश्चैव भोजनम्॥ 9:8॥

दर्शञ्च पौर्ण्णमासञ्च पशुबन्धेष्टिमेव च।
श्राद्धं सदक्षिणं कुर्यादृतुकाले स्त्रियं व्रजेत्॥ 9:9॥

---

**9:2** होमजापी च ] CE$_N$; जप --- A **9:2** भिक्षाशी त्यक्तमैथुनी ] C; शि त्यक्तमैथुनी A; भिक्षाशीत्यक्तमैथुनः E$_N$ **9:3** मधुमांसनिवृत्तश्च ] E$_N$; मधुमान्सनिवृत्तिश्च A; मधुमांसनिवृर्त्तिश्च C **9:3** सक्षारलवणानि च ] *conj.*; अक्षालवणानि च A; अक्षारलवणानि च CE$_N$ **9:3** °मेकान्तं ] C; मेकान्त A; °मेकान्तां E$_N$ **9:4** कोपमघृष्टा ] C; कोपमघृष्टा AE$_N$ **9:4** स्त्रीप्रेक्षणन्न कुर्वीत ] C; स्त्रीपेक्षणं न कुर्वीत A; स्त्रीप्रेक्षणं न कुर्कीत E$_N$ **9:4** माल्यधूपञ्च ] CE$_N$; माल्यपुष्पञ्च A **9:5** वर्जयेदञ्जनं गन्धन्तथा विषमलंघनम् ] CE$_N$; वर्जयेद्वञ्चन --- लंघनम् A **9:5** षट्त्रिंशदब्दिका चर्या ] *conj.*; षट्त्रिंशदाब्दिकाञ्चर्या A; षट्त्रिंशदब्दिकाञ्चर्यां C; षडिवंशदब्दिकां E$_N$ (unmetrical) **9:5** गुरोस्त्रैवेदिकं ] CE$_N$; गुरोस्त्रैवेदिक A **9:6** ह्येतदुक्तमेव ] CE$_N$; ह्येततदुक्तमे A **9:7** विप्लुतो नरकं याति ] C; विप्लतो नरकं यान्ति A; विप्लुता नरकं यान्ति E$_N$ **9:7** आचारात्स्वर्ग्गतिं ] CE$_N$; आचारा स्वर्ग्गति A **9:7** यजेद्यज्ञं सदक्षिणम् ] CE$_N$; यजेद्यस्तुज्ञ सदक्षिण A (unmetrical) **9:8** सततं कुर्यात्सायं प्रातश्च ] CE$_N$; तं कुर्या? सायं प्रातश्च A **9:8** हावनम् ] AE$_N$; हानवम् C **9:8** °मतिथेश्चैव ] E$_N$; °मतिथिश्चैव AC **9:9** दर्शञ्च ] C; दर्शनं AE$_N$ **9:9** पौर्ण्णमासञ्च ] *conj.*; पौर्णमास्याञ्च A; पौर्णमास्यान्तु CE$_N$ **9:9** श्राद्धं ] CE$_N$; श्राद्ध A

वर्ज्जयेत्परदारादीनाचाराद्गतिमाप्नुयात्।
अहिंसा निर्मलत्वं हि तत्नस्त्येयविवर्जनात्॥ 9:10॥

कामक्रोधनिवृत्तिश्च गुरुपूजनमेव च।
क्षमा दमो दया दानं सत्यं शौचं धृतिर्घृणा॥ 9:11॥

विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम्।
जीवेच्छिलोञ्छवृत्त्यैव प्रमृतेनैव वा पुनः॥ 9:12॥

वाणिज्यादि त्यजेत्कर्म भूतद्रोहञ्च सर्वदा।
जपाग्निहोमसंयुक्तः स स्वर्ग्गफलभाग्भवेत्॥ 9:13॥

पञ्चयज्ञमकुर्वाणो नरकं स ध्रुवं व्रजेत्।
अष्टम्याञ्च चतुर्दश्यामुपोष्य प्रयतात्मवान्॥ 9:14॥

बह्वृचं शिवसंकल्पं जपेत्संपूज्य शंकरम्।
एवं सम्वत्सरैकन्तु भक्त्या यः कुरुते द्विजः॥ 9:15॥

सर्पनिर्मोकवत्पापैर्मुच्यते नात्र संशयः।
तथैवैकादशं रुद्रञ्जपेदध्वपुरोहितः॥ 9:16॥

---

**9:10** आचाराद्गतिमाप्नुयात् ] *em.*; आचारागतिमाप्नुयात् A; आराद्गतिमाप्नुयात् C (unmetrical); स्वाचाराद्गतिमाप्नुयात् $E_N$ **9:10** अहिंसा निर्मलत्वं हि ] C; अहिंसा निर्मल --- A; अहिंसानिर्मलत्वं हि $E_N$ **9:10** तत्नस्त्येयविवर्जनात् ] C; --- विवर्जनात् A; तमस्तेयविवर्जनात् $E_N$ **9:11** शौचं धृतिर्घृणा ] C; शौच धृतिघृणा A; शौचं धृतिर्घृणा कृपा (unmetrical) **9:12** °आस्तिक्यम् ] $CE_N$; आस्तिक्य A **9:12** एतद्ब्राह्मणलक्षणम् ] $E_N$; एतद्ब्राह्मणवक्षणम् A; एद्ब्राह्मणलक्षणम् C (unmetrical) **9:12** जीवेच्छिलोञ्छवृत्त्यैव ] $CE_N$; जीवे शिलांच्छवृत्येव A **9:12** प्रमृतेनैव ] AC; प्रसृतेनैव $E_N$ **9:13** वाणिज्यादि ] $AE_N$; वानिज्यादि C **9:13** जपाग्निहोमसंयुक्तः ] $CE_N$; जपाग्निहोत्रसंयु --- A **9:13** स स्वर्ग्गफलभाग्भवेत् ] $CE_N$; --- भाग्भवेत् A **9:14** पञ्चयज्ञमकुर्वाणो ] AC; पञ्च यज्ञमकुर्वाणो $E_N$ **9:14** नरकं ] $CE_N$; नरक A **9:14** चतुर्दश्यामुपोष्य ] $CE_N$; चतुर्दश्यां मुपोष्य A **9:15** बह्वृचं शिवसंकल्पं जपेत्संपूज्य ] C; ब्रह्मत्य शिवसंकल्प जपेत्सपूज्य A; बह्व वं शिवसङ्कल्पञ्जपेत्सपूज्य $E_N$ **9:15** एवं सम्वत्सरैकन्तु ] $E_N$; एवं सम्वत्सरैक तु A; एवं सत्सरैकं तु C (unmetrical) **9:15** भक्त्या यः ] $CE_N$; भिक्षा य A **9:16** सर्पनिर्मोकवत्पापैर्मुच्यते नात्र संशयः ] $E_N$; सर्प्पनिर्मोचकवत्पापै मुच्यते नात्र सशयः A; सर्पनिर्मोचकवत्पापैर्मुच्यते नात्र संशयः C (unmetrical) **9:16** तथैवैकादशं ] $E_N$; त --- A; तथैवेकादशं C **9:16** रुद्रञ्जपेदध्वपुरोहितः ] $CE_N$; --- द्रं जपेदधुत्पुराहितः A

दक्षिणायां स्थितो मूर्त्तौ संपूज्य परमेश्वरम्।
स सर्वकलुषैर्मुक्तः शुद्धस्फटिकनिर्मलः॥ 9:17॥

रत्नालोकविमानेन याति माहेश्वरं पदम्।
अथवोद्धृत्य तत्रैव मानस्तोकशतं शतम्॥ 9:18॥

प्रत्यहं तु जपेद्देवि गणत्वं यो ऽभिवाञ्छति।
वामदेवं जपेत्सोमं देवव्रतमथापि वा॥ 9:19॥

पूर्वोक्तविधिमास्थाय च्छन्दोगः शुचिमानसः।
दिवाकर इव व्योम्नि भ्राजमानः स्वतेजसा॥ 9:20॥

स गच्छेत्परमं स्थानं यत्र यान्ति बहुश्रुताः।
जपेद्रुद्रगणान्विद्वानथर्वशिर एव वा॥ 9:21॥

अथवाभ्यर्च्य देवेशं याति माहेश्वरम्पदम्।
विविक्षुर्देवदेवस्य शरीरं ब्रह्मवित्तमः॥ 9:22॥

पवित्रं परमं पुण्यं व्रतं भौतिकमाचरेत्।
यज्ञब्रह्मार्पणेनैव यजेद्यज्ञं सदक्षिणं॥ 9:23॥

आत्मध्यानरतश्चैव सिद्ध्यते देवधर्मवित्।
ध्यायन्प्रणवयोगेन सर्वगं ब्रह्म सर्वदा॥ 9:24॥

षोडशारेण चक्रेण यदिच्छेत्सिद्धिमात्मनः।

---

**9:17** दक्षिणायां स्थितो मूर्त्तौ ] *conj.*; दक्षिणांगस्थितो मूत्तौ A; दक्षिणायां स्थितो मूर्त्ते C; दक्षिणायां स्थितं मूर्त्तौ $E_N$ **9:17** °कलुषैर्मुक्तः ] C; °कलुषै मुक्तः A; °कलुषर्मुक्तः $E_N$ **9:17** शुद्धस्फटिकनिर्मलः ] AC; शुद्धः स्फटिकनिर्मलः $E_N$ **9:19** तु जपेद्देवि ] *em.*; तज्जपेद्देवि $CE_N$ **9:19** यो ऽभिवाञ्छति ] $CE_N$; यो ऽभिवाञ् --- A **9:19** वामदेवं जपेत्सोमं ] $CE_N$; --- ज्ञपेद्साम A **9:20** पूर्वोक्त° ] AC; पूर्वोक्ति° $E_N$ **9:20** च्छन्दोगः ] $CE_N$; च्छन्दोग A **9:20** भ्राजमानः ] $CE_N$; भ्राजमान A **9:21** परमं ] $CE_N$; परम A **9:21** °गणान् ] $CE_N$; °गण A **9:22** याति ] $CE_N$; यान्ति A **9:22** माहेश्वरम्पदम् ] $CE_N$; माहेश्वर --- A **9:22** विविक्षुर्देवदेवस्य शरीरं ] $CE_N$; --- देवदेवस्य शरीर A **9:23** यज्ञब्रह्मार्पणेनैव ] $CE_N$: यज्ञबर्पणेनैव A (unmetrical) **9:23** यजेद्यज्ञं सदक्षिणं ] AC; यजेद्यज्ञान् सदक्षिणान् $E_N$ **9:24** आत्मध्यान° ] AC; आत्मज्ञान° $E_N$ **9:24** ध्यायन्प्रणवयोगेन सर्वगं ] *conj.*; ध्यायं प्रणवां योगेन सर्वत्मा A; ध्यायेत्प्रणवयोगेन सर्वगं C; ध्यायेन् प्रणवयोगेन सर्वगं $E_N$ **9:25** यदिच्छेत्सिद्धिमात्मनः ] *conj.*; यदि ⏑̲ --- A; यदीच्छेत्सिद्धिमात्मनः $CE_N$

श्रद्धया चैकचित्तेन सर्वद्वंद्वसहेन च॥ 9:25॥

नित्यञ्चालुब्धचित्तेन सर्वमेकत्वदर्शिना।
एवं यो वर्तते नित्यञ्जपध्यानाग्निकर्म्मसु॥ 9:26॥

न चासौ दुर्गतिं याति ब्रह्मलोकञ्च गच्छति।
केवलं कर्मकारी स्यादात्मध्यानविवर्जितः॥ 9:27॥

अजित्वा सर्वगं ब्रह्म स्वर्गमात्रफलं लभेत्।
अत ऊर्ध्वं वनेवासी जितक्रोधो जितेन्द्रियः॥ 9:28॥

वसेद्वनगतो विद्वान्वर्तयन्कुशबिन्दुना।
कन्दमूलफलैः शाकैः श्यामानीवारकङ्गुभिः॥ 9:29॥

सायं प्रातश्च तैरेव होमयेज्जातवेदसम्।
अफालकृष्टैर्वनजैर्देवब्राह्मणतर्पणम्॥ 9:30॥

पितॄणान्तर्प्पणञ्चैव जपहोमरतः सदा।
सर्वभूतहितो नित्यं सर्वदुःखसहिष्णुकः॥ 9:31॥

अभ्रावकाश्यं शीतोष्णे पञ्चाग्निर्जलशायिता।
कुशवल्कलवासांसि कृष्णाजिनधरः सदा॥ 9:32॥

---

**9:25** चैकचित्तेन ] CE$_N$; --- चित्तेन A **9:25** सर्वद्वंद्वसहेन च ] AC; सर्व द्वंद्वसहेन च E$_N$ **9:26** °चालुब्धचित्तेन ] CE$_N$; °चालुप्तचित्तेन A **9:26** °दर्शिना ] AC; °दशिना E$_N$ **9:27** कर्मकारी स्यादात्मध्यानविवर्जितः ] C; धर्मकारी स्यादात्मध्यानविवर्जितः A; कर्मकारीस्यादात्मध्यान विवर्जितः E$_N$ **9:28** °फलं लभेत् ] CE$_N$; --- A **9:28** अत ] CE$_N$; --- A **9:29** वनगतो ] AC; बनगतो E$_N$ **9:29** वर्तयन्कुशबिन्दुना ] C; वर्तय कुशबिन्दुना A; वर्तयन् कुशविन्दुना E$_N$ **9:29** कन्दमूलफलैः शाकैः ] CE$_N$; कन्दमूलफलै शाकै A **9:29** °कङ्गुभिः ] CE$_N$; °कोङ्गुभिः A **9:30** तैरेव ] AE$_N$; तेरेव C **9:30** होमयेज् ] CE$_N$; होमये A **9:30** अफालकृष्टैर्वनजैर्देवब्राह्मणतर्पणम् ] *conj.*; अफलकृष्टैर्वनक्षै देवब्राह्मणतर्प्पणाम् A; अट्टालकृष्टैर्व्वनजैर्देवब्राह्मणतर्पणैः E$_N$ **9:31** पितॄणान्तर्प्पणञ्चैव ] CE$_N$; पितॄणान्तर्प्पण चैव A **9:31** जपहोमरतः सदा ] CE$_N$; जापहोमरत सादा A **9:31** सर्वभूतहितो नित्यं ] CE$_N$; --- त्यं A **9:32** अभ्रावकाश्यं शीतोष्णे ] C; अभ्रावकाशा सातोष्ण A; अभ्रावकाश्यं शीतोष्णौ E$_N$ **9:32** पञ्चाग्निर्जलशायिता ] C; पञ्चाग्निजलशायिता A; पञ्चाग्निर्ज्जलशायि वा E$_N$ **9:32** °वासांसि कृष्णाजिनधरः ] CE$_N$; वासांस्या कृष्णाजिनधर A

कृच्छ्रातिकृच्छ्रतप्तादिपराकैश्चान्द्रायणैस्तथा।
शीर्णपर्णोदकाहारैरात्मानं परिशोधयेत्॥ 9:33॥

मृगचारी वसेत्तैस्तु कष्टां वृत्तिं समास्थितः।
ब्राह्मणः स्वर्गगामी स्याद्विप्लुतो नरकं व्रजेत्॥ 9:34॥

कायस्थमग्निं कृत्वा तु खमाकाशे तु विन्यसेत्।
चेष्टायां विन्यसेद्वायुमनले ऽग्निं पयो ऽम्भसि॥ 9:35॥

कायं भूमौ मनश्चन्द्रे दिक्षु श्रोत्रे तु विन्यसेत्।
विष्णुं पादे गले रुद्रं अग्निं वाचि विनिक्षिपेत्॥ 9:36॥

मित्रे पाय्विन्द्रियं न्यास्य शिश्ने चैव प्रजापतिम्।
संन्यासन्तु ततः कृत्वा लोभक्रोधादिवर्जितः॥ 9:37॥

अद्रोहः सर्वभूतानां सर्वमात्मनि पश्यति।
त्रिदण्डी कुण्डिपात्री च भैक्षग्रासाष्टभुक्सदा॥ 9:38॥

न शश्वदुपभुञ्जीत भैक्षवृत्तिसमाश्रितः।
ग्रामैकरात्रमुषितो न वसेत्पञ्चरात्रिकः॥ 9:39॥

---

**9:33** कृच्छ्रातिकृच्छ्रतप्तादिपराकैश्चान्द्रायणैस्तथा ] C (unmetrical); कृच्छ्रादिकृच्छ्रतप्तादिपराकेन्तापणैस्तथा A; कृच्छ्रातिकृच्छ्रतप्तादिपराश्चान्द्रायणैस्तथा $E_N$ **9:33** शीर्ण° ] AC; शा-ई-र्ण° $E_N$ **9:33** आत्मानं ] C$E_N$; आत्मान A **9:34** वसेत्तैस्तु कष्टां वृत्तिं समास्थितः ] $E_N$; वसेचैस्तु कष्टवृत्ति समास्थिता A; वसेत्तैस्तु कष्टा वृत्ति समास्थितः C **9:34** ब्राह्मणः स्वर्गगामी स्याद्विप्लुतो नरकं व्रजेत् ] $E_N$; --- र्गगामी स्याद्विप्लुतो नरकं व्रजेत् A; ब्राह्मणः स्वर्गगामी स्याद्विप्लुतो नरक् व्रजेत् C **9:35** कायस्थमग्निं कृत्वा तु ] A; अग्निं कृत्वा तु कायस्थं C$E_N$ **9:35** खमाकाशे ] C$E_N$; क्षमांसाख्ये A **9:35** चेष्टायां ] A$E_N$; चेष्टाया C **9:35** पयो ऽम्भसि ] C$E_N$; पयो भसि A **9:36** श्रोत्रे ] A$E_N$; श्रोत्त C **9:36** विन्यसेत् ] AC; विक्षिपेत् $E_N$ **9:36** विष्णुं ] C; विष्णु A; *om.* $E_N$ **9:36** पादे गले रुद्रं अग्निं वाचि विनिक्षिपेत् ] AC; *om.* $E_N$ **9:37** पाय्विन्द्रियं ] C; पाय्वीन्द्रिय A; पथ्विन्द्रि $E_N$ **9:37** शिश्ने चैव प्रजापतिम् ] C$E_N$; शि --- ति A **9:37** संन्यासन्तु ] *em.*; सन्यासन्तु AC$E_N$ **9:37** कृत्वा लोभक्रोधादिवर्जितः ] *em.*; कृत्वा लोभक्रोधादिवर्जितं A; कृत्वा लोभमोहविवर्जितः C; कृत्वालोभमोहविवर्जितः $E_N$ **9:38** अद्रोहः सर्वभूतानां ] $E_N$; अद्रोह सर्वभूताना A; अद्रोहस्य वभूताना C **9:38** भैक्षग्रासाष्टभुक् सदा ] *conj.*; भैक्षग्रासाष्टस्सदा A; भैक्षस्यष्टभुक सदा C (unmetrical); भैक्षग्रासाष्टतुट् सदा $E_N$ **9:39** समाश्रितः ] A$E_N$; समाश्रितिः C **9:39** उपभुञ्जीत ] C$E_N$; उपयुञ्जीत A **9:39** भैक्षवृत्ति° ] AC; भैक्षवृत्तिं $E_N$ **9:39** ग्रामैक° ] A$E_N$; ग्राषैक° C **9:39** °रात्रिकः ] $E_N$; °रात्रिकं A; °रात्रकः C

वर्षास्वेकत्र संवासी नगरे पञ्चरात्रिकः।
दम्भकल्कविनिर्मुक्तः सर्वद्वंद्वसहिष्णुकः॥ 9:40॥

ग्रामसङ्गविवर्ज्जी स्यात्सङ्गदोषविवर्जितः।
समः सर्वेषु भूतेषु अनारंभी अहिंसकः॥ 9:41॥

आत्मध्यानरतिर्नित्यं ब्रह्मभावसमन्वितः।
एवं यो वर्तते नित्यं स याति ब्रह्मलौकिकम्॥ 9:42॥

ब्रह्मणा सह मोदेत ब्रह्मण्येव तु लीयते।
विप्लुतो नरकं याति कामलोभसमन्वितः॥ 9:43॥

यथोक्तकारी ब्रह्मात्मा ब्रह्मलोकञ्च गच्छति।
वेदधर्मो मया प्रोक्तः स्वर्गनैश्रेयसः पदम्।
उत्तरेणैव वक्त्रेण व्याख्यातश्च समासतः॥ 9:44॥

॥ ⊗॥ इति शिवधर्मसंग्रहे नवमो ऽध्यायः॥ ⊗॥

---

**9:40** संवासी नगरे पञ्चरात्रिकः ] C; --- पञ्चरात्रिकः A; सन्न्यासी नगरे पञ्चरात्रिकः $E_N$ **9:40** दम्भकल्कविनिर्मुक्तः ] $CE_N$; दंभकर्ण्णविनिर्मुक्तः A **9:40** सर्वद्वंद्वसहिष्णुकः ] $AE_N$; सर्वर्द्वंद्वसहिष्णुकः C **9:41** ग्रामसङ्गविवर्ज्जी स्यात् ] C; ग्रामकर्मविवर्ज्जी स्यात् $E_N$; ग्रामसङ्गविवजी स्या A **9:41** सङ्गदोषविवर्जितः ] $CE_N$; संगदोषविवर्जिता A **9:41** समः सर्वेषु भूतेषु ] C; सम सर्वेषु भूतेषु A; दयालु सर्वभूतेषु $E_N$ **9:41** अनारंभी ] AC; अनासक्ति $E_N$ **9:42** आत्मध्यानरतिर्नित्यं ] *em.*; आत्मध्यानरति नित्यं A; आत्मभावरतिर्नित्यं $CE_N$ **9:42** स याति ब्रह्मलौकिकम् ] AC; सयाति ब्रह्मलोकिकं $E_N$ **9:43** ब्रह्मणा सह मोदेत ] C; --- न्ते A; ब्रह्मणा सह मोदन्ते $E_N$ **9:43** कामलोभसमन्वितः ] AC; कामलोभ समन्वितः $E_N$ **9:44** यथोक्तकारी ] AC; यण्थोक्तकारी $E_N$ **9:44** ब्रह्मात्मा ] $AE_N$; ब्रह्मत्मा C **9:44** ब्रह्मलोकञ्च ] A; ब्रह्मलोकं स $CE_N$ **9:44** वेदधर्मो मया प्रोक्तः ] C; वेदधर्म मया प्रोक्तः A; वेदधर्म मया प्रोक्ताः $E_N$ **9:44** स्वर्गनैश्रेयसः पदम् ] A; स्वर्ग्गनैश्रेयसम्पदम् C; स्वर्ग नैश्रेयसम्पदम् $E_N$ **9:44** व्याख्यातश्च समासतः ] $CE_N$; व्याख्याता च समास्सतः A **9:44** इति शिवधर्मसंग्रहे ] $CE_N$; इति शिवधर्म --- A **9:44** नवमो ऽध्यायः ] C; --- पटलः A; नवमो ऽध्याय $E_N$